# Shri Shiva Mahapuranam 4 Kotirudra Samhita

# श्रीशिवमहापुराणम् ४ कोटिरुद्रसंहिता

## Document Information

Text title : shivapurANam 4 koTirudrasaMhitA

File name : shivapurANam4koTirudrasaMhitA.itx

Category : shiva, purANa, shivapurANa

Location : doc_purana

Proofread by : Revathy Rajaraman and team members Malati Shekar, Latha Murali, Meenakshi Premanand, Jayalakshmi, Gayathri, Uma Mahesh, Sripriya, Sornavalli

Latest update : January 23, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2026

*sanskritdocuments.org*

# श्रीशिवमहापुराणम् ४ कोटिरुद्रसंहिता

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥ चतुर्थी कोटिरुद्रसंहिता

## ४.१. प्रथमोऽध्यायः । ज्योतिर्लिङ्गतदुपलिंङ्गमाहात्म्यवर्णनम् ।

यो धत्ते निजमाययैव भुवनाकारं विकारोज्झितो ।
यस्याहुः करुणाकटाक्षविभवौ स्वर्गापवर्गाभिधौ ।
प्रत्यग्बोधसुखाद्वयं हृदि सदा पश्यन्ति यं योगिन-
स्तस्मै शैलसुताञ्चितार्धवपुषे शश्वन्नमस्तेजसे ॥ १॥

कृपाललितवीक्षणं स्मितमनोज्ञवक्राम्बुजं
शशाङ्ककलयोज्वलं शमितघोरतापत्रयम् ।
करोतु किमपि स्फुरत्परमसौख्यसच्चिद्वपु-
र्धराधरसुताभुजोद्वलयितं महो मङ्गलम् ॥ २॥

ऋषय ऊचुः
सम्यगुक्तं त्वया सूत लोकानां हितकाम्यया ।
शिवावतारमाहात्म्यं नानाख्यानसमन्वितम् ॥ ३॥

पुनश्च कथ्यतां तात शिवमाहात्म्यमुत्तमम् ।
लिङ्गसम्बन्धि सुप्रीत्या धन्यस्त्वं शैवसत्तम ॥ ४॥

शृण्वन्तस्त्वन्मुखाम्भोजान्न तृप्ताः स्मो वयं प्रभो ।
शैवं यशोऽमृतं रम्यं तदेव पुनरुच्यताम् ॥ ५॥

पृथिव्यां यानि लिङ्गानि तीर्थे तीर्थे शुभानि हि ।
अन्यत्र वा स्थले यानि प्रसिद्धानि स्थितानि वै ॥ ६॥

तानि तानि च दिव्यानि लिङ्गानि परमेशितुः ।

व्यासशिष्य समाचक्ष्व लोकानां हितकाम्यया ॥ ७॥

सूत उवाच ।
साधु पृष्टमृषिश्रेष्ठा लोकानां हितकाम्यया ।
कथयामि भवत्स्नेहात्तानि सङ्क्षेपतो द्विजाः ॥ ८॥

सर्वेषां शिवलिङ्गानां मुने सङ्ख्या न विद्यते ।
सर्वा लिङ्गमयी भूमिः सर्वं लिङ्गमयं जगत् ॥ ९॥

लिङ्गयुक्तानि तीर्थानि सर्वं लिङ्गे प्रतिष्ठितम् ।
सङ्ख्या न विद्यते तेषां तानि किञ्चिद्ब्रवीम्यहम् ॥ १०॥

यत्किञ्चिद् दृश्यते दृश्यं वर्ण्यते स्मर्यते च यत् ।
तत्सर्वं शिवरूपं हि नान्यदस्तीति किञ्चन ॥ ११॥

तथापि श्रूयतां प्रीत्या कथयामि यथाश्रुतम् ।
लिङ्गानि च ऋषिश्रेष्ठाः पृथिव्यां यानि तानि ह ॥ १२॥

पाताले चापि वर्तन्ते स्वर्गे चापि तथा भुवि ।
सर्वत्र पूज्यते शम्भुः स देवासुरमानुषैः ॥ १३॥

त्रिजगच्छम्भुना व्याप्तं सदेवासुरमानुषम् ।
अनुग्रहाय लोकानां लिङ्गरूपेण सत्तमाः ॥ १४॥

अनुग्रहाय लोकानां लिङ्गानि च महेश्वरः ।
दधाति विविधान्यत्र तीर्थे चान्यस्थले तथा ॥ १५॥

यत्र यत्र यदा शम्भुर्भक्त्या भक्तैश्च संस्मृतः ।
तत्र तत्रावतीर्याथ कार्यं कृत्वा स्थितस्तदा ॥ १६॥

लोकानामुपकारार्थं स्वलिङ्गं चाप्यकल्पयत् ।
तल्लिङ्गं पूजयित्वा तु सिद्धिं समधिगच्छति ॥ १७॥

पृथिव्यां यानि लिङ्गानि तेषां सङ्ख्या न विद्यते ।
तथापि च प्रधानानि कथ्यन्ते च मया द्विजाः ॥ १८॥

प्रधानेषु च यानीह मुख्यानि प्रवदाम्यहम् ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते मानवः क्षणात् ॥ १९॥

ज्योतिर्लिङ्गानि यानीह मुख्यमुख्यानि सत्तम ।
तान्यहं कथयाम्यद्य श्रुत्वा पापं व्यपोहति ॥ २०॥

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् ।
उज्जयिन्यां महाकालमोङ्कारे परमेश्वरम् ॥ २१॥

केदारं हिमवत्पृष्ठे डाकिन्यां भीमशङ्करम् ।
वाराणस्यां च विश्वेशं त्र्यम्बकं गौतमीतटे ॥ २२॥

वैद्यनाथं चिताभूमौ नागेशं दारुकावने ।
सेतुबन्धे च रामेशं घुश्मेशं च शिवालये ॥ २३॥

द्वादशैतानि नामानि प्रातरुत्थाय यः पठेत् ।
सर्वपापविनिर्मुक्तः सर्वसिद्धिफलं लभेत् ॥ २४॥

यं यं काममपेक्ष्यैव पठिष्यन्ति नरोत्तमाः ।
प्राप्स्यन्ति कामं तं तं हि परत्रेह मुनीश्वराः ॥ २५॥

ये निष्कामतया तानि पठिष्यन्ति शुभाशयाः ।
तेषां च जननीगर्भे वासो नैव भविष्यति ॥ २६॥

एतेषां पूजनेनैव वर्णानां दुःखनाशनम् ।
इहलोके परत्रापि मुक्तिर्भवति निश्चितम् ॥ २७॥

ग्राह्यमेषां च नैवेद्यं भोजनीयं प्रयत्नतः ।
तत्कर्तुः सर्वपापानि भस्मसाद्यान्ति वै क्षणात् ॥ २८॥

ज्योतिषां चैव लिङ्गानां ब्रह्मादिभिरलं द्विजाः ।
विशेषतः फलं वक्तुं शक्यते न परैस्तथा ॥ २९॥

एकं च पूजितं येन षण्मासं तन्निरन्तरम् ।
तस्य दुःखं न जायेत मातृकुक्षिसमुद्भवम् ॥ ३०॥

हीनयोनौ यदा जातो ज्योतिर्लिङ्गं च पश्यति ।
तस्य जन्म भवेत्तत्र विमले सत्कुले पुनः ॥ ३१॥

सत्कुले जन्म सम्प्राप्य धनाढ्यो वेदपारगः ।
शुभकर्म तदा कृत्वा मुक्तिं यात्यनपायिनीम् ॥ ३२॥

म्लेच्छो वाप्यन्त्यजो वापि षण्ढो वापि मुनीश्वराः ।
द्विजो भूत्वा भवेन्मुक्तस्तस्मात्तद्दर्शनं चरेत् ॥ ३३॥

ज्योतिषां चैव लिङ्गानां किञ्चित्प्रोक्तं फलं मया ।

ज्योतिषां चोपलिङ्गानि श्रूयन्तामृषिसत्तमाः ॥ ३४॥

सोमेश्वरस्य यल्लिङ्गमन्तकेशमुदाहृतम् ।
मह्याः सागरसंयोगे तल्लिङ्गमुपलिङ्गकम् ॥ ३५॥

मल्लिकार्जुनसम्भूतमुपलिङ्गमुदाहृतम् ।
रुद्रेश्वरमिति ख्यातं भृगुकक्षे सुखावहम् ॥ ३६॥

महाकालभवं लिङ्गं दुग्धेशमिति विश्रुतम् ।
नर्मदायां प्रसिद्धं तत्सर्वपापहरं स्मृतम् ॥ ३७॥

ॐकारजं च यल्लिङ्गं कर्दमेशमिति श्रुतम् ।
प्रसिद्धं बिन्दुसरसि सर्वकामफलप्रदम् ॥ ३८॥

केदारेश्वरसञ्जातं भूतेशं यमुनातटे ।
महापापहरं प्रोक्तं पश्यतामर्चतां तथा ॥ ३९॥

भीमशङ्करसम्भूतं भीमेश्वरमिति स्मृतम् ।
सह्याचले प्रसिद्धं तन्महाबलविवर्द्धनम् ॥ ४०॥

विश्वेश्वराच्च यज्जातं शरण्येश्वर विश्रुतम् ।
त्र्यम्बकस्य च यत्प्रोक्तं सिद्धेश्वर इति श्रुतम् ॥ ४१॥

वैद्यनाथाच्च यज्जातं वैजनाथ इति स्मृतम् ।
नागेश्वरसमुद्भूतं भूतेश्वरमुदाहृतम् ॥ ४२॥

मल्लिकासरस्वतीतीरे दर्शनात्पापहारकम् ।
रामेश्वराच्च यज्जातं गुप्तेश्वरमिति स्मृतम् ॥ ४३॥

घुश्मेशाच्चैव यज्जातं व्याघ्रेश्वरमिति स्मृतम्
ज्योतिर्लिङ्गोपलिङ्गानि प्रोक्तानीह मया द्विजाः ॥ ४४॥

दर्शनात्पापहारीणि सर्वकामप्रदानि च ।
एतानि सुप्रधानानि मुख्यतां हि गतानि च ।
अन्यानि चापि मुख्यानि श्रूयन्तामृषिसत्तमाः ॥ ४५॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां ज्योतिर्लिङ्गतदुपलिंङ्गमाहात्म्यवर्णनं नाम प्रथमोऽध्यायः ॥ ४.१॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥

॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.२. द्वितीयोऽध्यायः । शिवलिङ्गमाहात्म्यवर्णनम् ।

सूत उवाच ।
गङ्गातीरे सुप्रसिद्धा काशी खलु विमुक्तिदा ।
सा हि लिङ्गमयी ज्ञेया शिववासस्थली स्मृता ॥ १॥

लिङ्गं तत्रैव मुख्यं च सम्प्रोक्तमविमुक्तकम् ।
कृत्तिवासेश्वरः साक्षात्तत्तुल्यो वृद्धकालकः ॥ २॥

तिलभाण्डेश्वरश्चैव दशाश्वमेध एव च ।
गङ्गासागरसंयोगे सङ्गमेश इति स्मृतः ॥ ३॥

भूतेश्वरो यः सम्प्रोक्तो भक्तसर्वार्थदः सदा ।
नारीश्वर इति ख्यातः कौशिक्याः स समीपगः ॥ ४॥

वर्तते गण्डकीतीरे बटुकेश्वर एव सः ।
पूरेश्वर इति ख्यातः फल्गुतीरे सुखप्रदः ॥ ५॥

सिद्धनाथेश्वरश्चैव दर्शनात्सिद्धिदो नृणाम् ।
दूरेश्वर इति ख्यातः पत्तने चोत्तरे तथा ॥ ६॥

शृङ्गेश्वरश्च नाम्ना वै वैद्यनाथस्तथैव च ।
जप्येश्वरस्तथा ख्यातो यो दधीचिरणस्थले ॥ ७॥

गोपेश्वरः समाख्यातो रङ्गेश्वर इति स्मृतः ।
वामेश्वरश्च नागेशः कामेशो विमलेश्वरः ॥ ८॥

व्यासेश्वरश्च विख्यातः सुकेशश्च तथैव हि ।
भाण्डेश्वरश्च विख्यातो हुङ्कारेशस्तथैव च ॥ ९॥

सुरोचनश्च विख्यातो भूतेश्वर इति स्वयम् ।
सङ्गमेशस्तथा प्रोक्तो महापातकनाशनः ॥ १०॥

ततश्च तप्तकातीरे कुमारेश्वर एव च ।
सिद्धेश्वरश्च विख्यातः सेनेशश्च तथा स्मृतः ॥ ११॥

रामेश्वर इति प्रोक्तो कुम्भेशश्च परो मतः ।

नन्दीश्वरश्च पुञ्जेशः पूर्णायां पूर्णकस्तथा ॥ १२॥

ब्रह्मेश्वरः प्रयागे च ब्रह्मणा स्थापितः पुरा ।
दशाश्वमेधतीर्थे हि चतुर्वर्गफलप्रदः ॥ १३॥

तथा सोमेश्वरस्तत्र सर्वापद्विनिवारकः ।
भारद्वाजेश्वरश्चैव ब्रह्मवर्चःप्रवर्द्धकः ॥ १४॥

शूलटङ्केश्वरः साक्षात्कामनाप्रद ईरितः ।
माधवेशश्च तत्रैव भक्तरक्षाविधायकः ॥ १५॥

नागेशाख्यः प्रसिद्धो हि साकेतनगरे द्विजाः ।
सूर्यवंशोद्भवानां च विशेषेण सुखप्रदः ॥ १६॥

पुरुषोत्तमपुर्यां तु भुवनेशः सुसिद्धिदः ।
लोकेशश्च महालिङ्गः सर्वानन्दप्रदायकः ॥ १७॥

कामेश्वरः शम्भुलिङ्गो गङ्गेशः परशुद्धिकृत् ।
शुक्रेश्वरः शुक्रसिद्धो लोकानां हितकाम्यया ॥ १८॥

तथा वटेश्वरः ख्यातः सर्वकामफलप्रदः ।
सिन्धुतीरे कपालेशो वक्रेशः सर्वपापहा ॥ १९॥

धौतपापेश्वरः साक्षादंशेन परमेश्वरः ।
भीमेश्वर इति प्रोक्तः सूर्येश्वर इति स्मृतः ॥ २०॥

नन्दीश्वरश्च विज्ञेयो ज्ञानदो लोकपूजितः ।
नाकेश्वरो महापुण्यस्तथा रामेश्वरः स्मृतः ॥ २१॥

विमलेश्वरनामा वै कण्टकेश्वर एव च ।
पूर्वसागरसंयोगे धर्तुकेशस्तथैव च ॥ २२॥

चन्द्रेश्वरश्च विज्ञेयश्चन्द्रकान्तिफलप्रदः ।
सर्वकामप्रदश्चैव सिद्धेश्वर इति स्मृतः ॥ २३॥

बिल्वेश्वरश्च विख्यातश्चान्धकेशस्तथैव च ।
यत्र वा ह्यन्धको दैत्यः शङ्करेण हतः पुरा ॥ २४॥

अयं स्वरूपमंशेन धृत्वा शम्भुः पुनः स्थितः ।
शरणेश्वरविख्यातो लोकानां सुखदः सदा ॥ २५॥

कर्दमेशः परः प्रोक्तः कोटीशश्चार्बुदाचले ।
अचलेशश्च विख्यातो लोकानां सुखदः सदा ॥ २६॥

नागेश्वरस्तु कौशिक्यास्तीरे तिष्ठति नित्यशः ।
अनन्तेश्वरसंज्ञश्च कल्याणशुभभाजनः ॥ २७॥

योगेश्वरश्च विख्यातो वैद्यनाथेश्वरस्तथा ।
कोटीश्वरश्च विज्ञेयः सप्तेश्वर इति स्मृतः ॥ २८॥

भद्रेश्वरश्च विख्यातो भद्रनामा हरः स्वयम् ।
चण्डीश्वरस्तथा प्रोक्तः सङ्गमेश्वर एव च ॥ २९॥

पूर्वस्यां दिशि जातानि शिवलिङ्गानि यानि च ।
सामान्यान्यपि चान्यानि तानीह कथितानि ते ॥ ३०॥

दक्षिणस्यां दिशि तथा शिवलिङ्गानि यानि च ।
सञ्जातानि मुनिश्रेष्ठ तानि ते कथयाम्यहम् ॥ ३१॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां शिवलिङ्गमाहात्म्यवर्णनं नाम द्वितीयोऽध्यायः ॥ ४.२॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.३. तृतीयोऽध्यायः । कोटिरुद्रसंहितायामनसूयात्रितपोवर्णनम् ।

सूत उवाच ।
ब्रह्मपुर्यां चित्रकूटे लिङ्गं मत्तगजेन्द्रकम् ।
ब्रह्मणा स्थापितं पूर्वं सर्वकामसमृद्धिदम् ॥ १॥

तत्पूर्वदिशि कोटीशं लिङ्गं सर्ववरप्रदम् ।
गोदावर्याः पश्चिमे तल्लिङ्गं पशुपतिनामकम् ॥ २॥

दक्षिणस्यां दिशि कश्चिदत्रीश्वर इति स्वयम् ।
लोकानामुपकारार्थमनसूयासुखाय च ॥ ३॥

प्रादुर्भूतः स्वयं देवो ह्यनावृष्ट्यामजीवयत् ।

स एव शङ्करः साक्षादंशेन स्वयमेव हि ॥ ४॥

ऋषय ऊचुः ।
सूत सूत महाभाग कथमत्रीश्वरो हरः ।
उत्पन्नः परमो दिव्यस्तत्त्वं कथय सुव्रत ॥ ५॥

सूत उवाच ।
साधु पृष्टमृषिश्रेष्ठाः कथयामि कथां शुभाम् ।
यां कथां सततं श्रुत्वा पातकैर्मुच्यते ध्रुवम् ॥ ६॥

दक्षिणस्यां दिशि महत् कामदं नाम यद्वनम् ।
चित्रकूटसमीपेऽस्ति तपसां हितदं सताम् ॥ ७॥

तत्र च ब्रह्मणः पुत्रो ह्यत्रिनामा ऋषिः स्वयम् ।
तपस्तेपेऽतिकठिनमनसूयासमन्वितः ॥ ८॥

पूर्वं कदाचित्तत्रैव ह्यनावृष्टिरभून्मुने ।
दुःखदा प्राणिनां दैवाद्विकटा शतवार्षिकी ॥ ९॥

वृक्षाः शुष्कास्तदा सर्वे पल्लवानि फलानि च ।
नित्यार्थं न जलं क्वापि दृष्टमासीन्मुनीश्वराः ॥ १०॥

आर्द्रीभावो न लभ्येत खरा वाता दिशो दश ।
हाहाकारो महानासीत्पृथिव्यां दुःखदोऽति हि ॥ ११॥

संवर्तं चैव भूतानां दृष्ट्वात्रिगृहिणी प्रिया ।
साध्वी चैवाब्रवीदत्रिं मया दुःखं न सह्यते ॥ १२॥

समाधौ च विलीनोऽभूदासने संस्थितः स्वयम् ।
प्राणायामं त्रिरावृत्त्या कृत्वा मुनिवरस्तदा ॥ १३॥

ध्यायति स्म परं ज्योतिरात्मस्थमात्मना च सः ।
अत्रिर्मुनिवरो ज्ञानी शङ्करं निर्विकारकम् ॥ १४॥

स्वामिनि ध्यानलीने च शिष्यास्ते दूरतो गताः ।
अन्नं विना तदा ते तु मुक्त्वा तं स्वगुरुं मुनिम् ॥ १५॥

एकाकिनी तदा जाता सानसूया पतिव्रता ।
सिषेवे सा च सततं तं मुदा मुनिसत्तमम् ॥ १६॥

पार्थिवं सुन्दरं कृत्वा मन्त्रेण विधिपूर्वकम् ।

मानसैरुपचारैश्च पूजयामास शङ्करम् ॥ १७॥

तुष्टाव शङ्करं भक्त्या संसेवित्वा मुहुर्मुहुः ।
बद्धाञ्जलिपुटा भूत्वा प्रक्रम्य स्वामिनं शिवम् ॥ १८॥

दण्डवत्प्रणिपातेन प्रतिप्रक्रमणं तदा ।
चकार सुचरित्रा सानसूया मुनिकामिनी ॥ १९॥

दैत्याश्च दानवाः सर्वे दृष्ट्वा तु सुन्दरीं तदा ।
विह्वलाश्चाभवँस्तत्र तेजसा दूरतः स्थिताः ॥ २०॥

अग्निं दृष्ट्वा यथा दूरे वर्तन्ते तद्वदेव हि ।
तथैनां च तदा दृष्ट्वा नायान्तीह समीपगाः ॥ २१॥

अत्रेश्च तपसश्चैवानसूयाशिवसेवनम् ।
विशिष्यते स्म विप्रेन्द्रा मनोवाक्कायसंस्कृतम् ॥ २२॥

तावत्कालं तु सा देवी परिचर्यां चकार ह ।
यावत्कालं मुनिवरः प्राणायामपरायणः ॥ २३॥

तौ दम्पती तदा तत्र स्वस्वकार्यपरायणौ ।
संस्थितौ मुनिशार्दूल नान्यः कश्चित्परः स्थितः ॥ २४॥

एवं जाते तदा काले ह्यत्रिश्च ऋषिसत्तमः ।
ध्याने च परमे लीनो न व्यबुध्यत किञ्चन ॥ २५॥

अनसूयापि सा साध्वी स्वामिनं वै शिवं तथा ।
भेजे नान्यत्परं किञ्चिज्जानीते स्म च सा सती ॥ २६॥

तस्यैव तपसा सर्वे तस्याश्च भजनेन च ।
देवाश्च ऋषयश्चैव गङ्गाद्याः सरितस्तथा ॥ २७॥

दर्शनार्थं तयोः सर्वाः परप्रीत्या समाययुः ।
दृष्ट्वा च तत्तपः सेवां विस्मयं परमं ययुः ॥ २८॥

तयोस्तदद्भुतं दृष्ट्वा समूचुर्भजनं वरम् ।
उभयोः किं विशिष्टं च तपसो भजनस्य च ॥ २९॥

अत्रेश्चैव तपःप्रोक्तमनसूयानुसेवनम् ।
तत्सर्वमुभयोर्दृष्ट्वा समूचुर्भजनं वरम् ॥ ३०॥

पूर्वैश्च ऋषिभिश्चैव दुष्करं तु तपः कृतम् ।
एतादृशं तु केनापि क्व कृतं नैतदब्रुवन् ॥ ३१॥

धन्योऽयं च मुनिर्धन्या तथेयमनसूयिका ।
यदैताभ्यां परं प्रीत्या क्रियते सुतपः पुनः ॥ ३२॥

एतादृशं शुभं चैतत्तपो दुष्करमुत्तमम् ।
त्रिलोक्यां क्रियते केन साम्प्रतं ज्ञायते न हि ॥ ३३॥

तयोरेव प्रशंसां च कृत्वा ते तु यथागतम् ।
गतास्ते च तदा तत्र गङ्गाञ्च गिरिशं विना ॥ ३४॥

गङ्गा मद्भजनप्रीता साध्वी धर्मविमोहिता ।
कृत्वोपकारमेतस्यागमिष्यामीत्युवाच सा ॥ ३५॥

शिवोऽपि ध्यानसम्बद्धो मुनेरत्रेर्मुनीश्वराः ।
पूर्णांशेन स्थितस्तत्र कैलासं न जगाम ह ॥ ३६॥

पञ्चाशच्च तथा चात्र चत्वारि ऋषिसत्तमाः ।
वर्षाणि च गतान्यासन् वृष्टिर्नैवाभवत्तदा ॥ ३७॥

यावच्चाप्यत्रिणा ह्येवं तपसा ध्यानमाश्रितम् ।
अनसूया तदा नैव गृह्णामीतीषणा कृता ॥ ३८॥

एवं च क्रियमाणे हि मुनिना तपसि स्थिते ।
अनसूयासुभजने यज्जातं श्रूयतामिति ॥ ३९॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायामनसूयात्रितपोवर्णनं नाम तृतीयोऽध्यायः ॥ ४.३॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
कोटिरुद्रसंहिता

## ४.४. चतुर्थोऽध्यायः । अत्रीश्वरमाहात्म्यवर्णनम् ।

सूत उवाच ।
कदाचित्स ऋषिश्रेष्ठो ह्यत्रिर्ब्रह्मविदां वरः ।

जागृतश्च जलं देहि प्रत्युवाच प्रियामिति ॥ १॥

सापि साध्वी त्ववश्यं च गृहीत्वाथ कमण्डलुम् ।
जगाम विपिने तत्र जलं मे नीयते कुतः ॥ २॥

किं करोमि क्व गच्छामि कुतो नीयेत वै जलम् ।
इति विस्मयमापन्ना तां गङ्गां हि ददर्श सा ॥ ३॥

तामनुव्रजती यावत् साब्रवीच्च तदा हि ताम् ।
गङ्गा सरिद्वरा देवी बिभ्रती सुन्दरां तनुम् ॥ ४॥

गङ्गोवाच ।
प्रसन्नास्मि च ते देवि कुत्र यासि वदाधुना ।
धन्या त्वं सुभगे सत्यं तवाज्ञां च करोम्यहम् ॥ ५॥

सूत उवाच ।
तद्वचश्च तदा श्रुत्वा ऋषिपत्नी तपस्विनी ।
प्रत्युवाच वचः प्रीत्या स्वयं सुचकिता द्विजाः ॥ ६॥

अनसूयोवाच ।
का त्वं कमलपत्राक्षि कुतो वा त्वं समागता ।
तथ्यं ब्रूहि कृपां कृत्वा साध्वी सुप्रवदा सती ॥ ७॥

सूत उवाच ।
इत्युक्ते च तया तत्र मुनिपत्न्या मुनीश्वराः ।
सरिद्वरा दिव्यरूपा गङ्गा वाक्यमथाब्रवीत् ॥ ८॥

गङ्गोवाच ।
स्वामिनः सेवनं दृष्ट्वा शिवस्य च परात्मनः ।
साध्वि धर्मं च ते दृष्ट्वा स्थितास्मि तव सन्निधौ ॥ ९॥

अहं गङ्गा समायाता भजनात्ते शुचिस्मिते ।
वशीभूता ह्यहं जाता यदिच्छसि वृणीष्व तत् ॥ १०॥

सूत उवाच ।
इत्युक्ते गङ्गया साध्वी नमस्कृत्य पुरः स्थिता ।
उवाचेति जलं देहि चेत्प्रसन्ना ममाधुना ॥ ११॥

इत्येतद्वचनं श्रुत्वा गर्तं कुर्विति साब्रवीत् ।

शीघ्रं चायाच्च तत्कृत्वा स्थिता तत्क्षणमात्रतः ॥ १२॥

तत्र सा च प्रविष्टा च जलरूपमभूत्तदा ।
आश्चर्यं परमं गत्वा गृहीतं च जलं तया ॥ १३॥

उवाच वचनं चैतल्लोकानां सुखहेतवे ।
अनसूया मुनेः पत्नी दिव्यरूपां सरिद्वराम् ॥ १४॥

अनसूयोवाच ।
यदि त्वं सुप्रसन्ना मे वर्तसे च कृपा मयि ।
स्थातव्यं च त्वया तावत् मत्स्वामी यावदाव्रजेत् ॥ १५॥

सूत उवाच ।
इति श्रुत्वानसूयाया वचनं सुखदं सताम् ।
गङ्गोवाच प्रसन्नाति ह्यत्रेर्दास्यसि मेऽनघे ॥ १६॥

इत्युक्ते च तया तत्र ह्यनयापि कृतं तथा ।
स्वामिने तज्जलं दिव्यं दत्त्वा तत्पुरतः स्थिता ॥ १७॥

स ऋषिश्चापि सुप्रीत्या स्वाचम्य विधिपूर्वकम् ।
पपौ दिव्यं जलं तच्च पीत्वा सुखमवाप ह ॥ १८॥

अहो नित्यं जलं यच्च पीयते तज्जलं न हि ।
विचार्येति च तेनाशु परितश्चावलोकितम् ॥ १९॥

शुष्कान्वृक्षान्समालोक्य दिशो रूक्षतरास्तथा ।
उवाच तामृषिश्रेष्ठो न जातं वर्षणं पुनः ॥ २०॥

तदुक्तं तत् समाकर्ण्य नेति नेति प्रियां तदा ।
तामुवाच पुनः सोऽपि जलं नीतं कुतस्त्वया ॥ २१॥

इत्युक्ते तु तदा तेन विस्मयं परमं गता ।
अनसूया स्वमनसि सचिन्ता तु मुनीश्वराः ॥ २२॥

निवेद्यते मया चेद्वै तदोत्कर्षो भवेन्मम ।
निवेद्यते यदा नैव व्रतभङ्गो भवेन्मम ॥ २३॥

नोभयं च तथा स्याद्वै निवेद्यं तत्तथा मम ।
इति यावद्विचार्येत तावत्पृष्टा पुनः पुनः ॥ २४॥

अथानुग्रहतः शम्भोः प्राप्तबुद्धिः पतिव्रता ।

उवाच श्रूयतां स्वामिन्यज्जातं कथयामि ते ॥ २५॥

अनसूयोवाच ।
शङ्करस्य प्रतापाच्च तवैव सुकृतैस्तथा ।
गङ्गा समागतात्रैव तदीयं सलिलं त्विदम् ॥ २६॥

सूत उवाच ।
एवं वचस्तदा श्रुत्वा मुनिर्विस्मयमानसः ।
प्रियामुवाच सुप्रीत्या शङ्करं मनसा स्मरन् ॥ ७॥

अत्रिरुवाच ।
प्रिये सुन्दरि त्वं सत्यमथ वाचं व्यलीककाम् ।
ब्रवीषि च यथार्थं त्वं न मन्ये दुर्लभं त्विदम् ॥ २८॥

असाध्यं योगिभिर्यच्च देवैरपि सदा शुभे ।
तच्चैवाद्य कथं जातं विस्मयः परमो मम ॥ २९॥

यद्येवं दृश्यते चेद्वै तन्मन्येऽहं न चान्यथा ।
इति तद्वचनं श्रुत्वा प्रत्युवाच पतिं प्रिया ॥ ३०॥

अनसूयोवाच ।
आगम्यतां मया सार्धं त्वया नाथ महामुने ।
सरिद्वराया गङ्गाया द्रष्टुमिच्छा भवेद्यदि ॥ ३१॥

सूत उवाच ।
इत्युक्त्वा तु समादाय पतिं तं सा पतिव्रता ।
गता द्रुतं शिवं स्मृत्वा यत्र गङ्गा सरिद्वरा ॥ ३२॥

दर्शयामास तां तत्र गङ्गां पत्ये पतिव्रता ।
गर्ते च संस्थितां तत्र स्वयं दिव्यस्वरूपिणीम् ॥ ३३॥

तत्र गत्वा ऋषिश्रेष्ठो गर्तं च जलपूरितम् ।
आकण्ठं सुन्दरं दृष्ट्वा धन्येयमिति चाब्रवीत् ॥ ३४॥

किं मदीयं तपश्चैव किमन्येषां पुनस्तदा ।
इत्युक्त्वा मुनिशार्दूलो भक्त्या तुष्टाव तां तदा ॥ ३५॥

ततो हि स मुनिस्तत्र सुस्नातः सुभगे जले ।
आचम्य पुनरेवात्र स्तुतिं चक्रे पुनः पुनः ॥ ३६॥

अनसूयापि संस्नाता सुन्दरे तज्जले तदा ।
नित्यं चक्रे मुनिः कर्म सानसूयापि सुव्रता ॥ ३७॥

ततः सोवाच तां गङ्गा गम्यते स्वस्थलं मया ।
इत्युक्ते च पुनः साध्वी तामुवाच सरिद्वराम् ॥ ३८॥

अनसूयोवाच ।
यदि प्रसन्ना देवेशि यद्यस्ति च कृपा मयि ।
त्वया स्थेयं निश्चलत्वादस्मिन्देवि तपोवने ॥ ३९॥

महतां च स्वभावश्च नाङ्गीकृत्य परित्यजेत् ।
इत्युक्त्वा च करौ बद्ध्वा तां तुष्टाव पुनः पुनः ॥ ४०॥

ऋषिश्चापि तथोवाच त्वया स्थेयं सरिद्वरे ।
सानुकूला भव त्वं हि सनाथान्देवि नः कुरु ॥ ४१॥

तदीयं तद्वचः श्रुत्वा रम्यं गङ्गा सरिद्वरा ।
प्रसन्नमानसा गङ्गानसूयां वाक्यमब्रवीत् ॥ ४२॥

गङ्गोवाच ।
शङ्करार्चनसम्भूतफलं वर्षस्य यच्छसि ।
स्वामिनश्च तदा स्थास्ये देवानामुपकारणात् ॥ ४३॥

तथा दानैर्न मे तुष्टिस्तीर्थस्नानैस्तथा च वै ।
यज्ञैस्तथाथवा योगैर्यथा पातिव्रतेन च ॥ ४४॥

पतिव्रतां यथा दृष्ट्वा मनसः प्रीणनं भवेत् ।
तथा नान्यैरुपायैश्च सत्यं मे व्याहृतं सति ॥ ४५॥

पतिव्रतां स्त्रियं दृष्ट्वा पापनाशो भवेन्मम ।
शुद्धा जाता विशेषेण गौरीतुल्या पतिव्रता ॥ ४६॥

तस्माच्च यदि लोकस्य हिताय तत्प्रयच्छसि ।
तर्ह्यहं स्थिरतां यास्ये यदि कल्याणमिच्छसि ॥ ४७॥

सूत उवाच ।
इत्येवं वचनं श्रुत्वानसूया सा पतिव्रता ।
गङ्गायै प्रददौ पुण्यं सर्वं तद्वर्षसम्भवम् ॥ ४८॥

महतां च स्वभावो हि परेषां हितमावहेत् ।

सुवर्णं चन्दनं चेक्षुरसस्तत्र निदर्शनम् ॥ ४९॥

एतद् दृष्ट्वानसूयं तत्कर्म पातिव्रतं महत् ।
प्रसन्नोऽभून्महादेवः पार्थिवादाविराशु वै ॥ ५०॥

शम्भुरुवाच ।
दृष्ट्वा ते कर्म साध्व्येतत् प्रसन्नोऽस्मि पतिव्रते ।
वरं ब्रूहि प्रिये मत्तो यतः प्रियतरासि मे ॥ ५१॥

अथ तौ दम्पती शम्भुमभूतां सुन्दराकृतिम् ।
पञ्चवक्त्रादिसंयुक्तं हरं प्रेक्ष्य सुविस्मितौ ॥ ५२॥

नत्वा स्तुत्वा करौ बद्ध्वा महाभक्तिसमन्वितौ ।
अवोचेतां समभ्यर्च्य शङ्करं लोकशङ्करम् ॥ ५३॥

दम्पती ऊचतुः ।
यदि प्रसन्नो देवेश प्रसन्ना जगदम्बिका ।
अस्मिंस्तपोवने तिष्ठ लोकानां सुखदो भव ॥ ५४॥

प्रसन्ना च तदा गङ्गा प्रसन्नश्च शिवस्तदा ।
उभौ तौ च स्थितौ तत्र यत्रासीदृषिसत्तमः ॥ ५५॥

अत्रीश्वरश्च नाम्नासीदीश्वरः परदुःखहा ।
गङ्गा सापि स्थिता तत्र तदा गर्तेऽथ मायया ॥ ५६॥

तद्दिनं हि समारभ्य तत्राक्षय्यजलं सदा ।
हस्तमात्रे हि तद्गर्ते गङ्गा मन्दाकिनी ह्यभूत् ॥ ५७॥

तत्रैव ऋषयो दिव्याः समाजग्मुः सहाङ्गनाः ।
तीर्थात्तीर्थाच्च ते सर्वे ये पुरा निर्गता द्विजाः ॥ ५८॥

यवाश्च व्रीहयश्चैव यज्ञयागपरायणाः ।
युक्ता ऋषिवरैस्तैश्च होमं चक्रुश्च ते जनाः ॥ ५९॥

कर्मभिस्तैश्च सन्तुष्टा वृष्टिं चक्रुर्घनास्तदा ।
आनन्दः परमो लोके बभूवाति मुनीश्वराः ॥ ६०॥

अत्रीश्वरस्य माहात्म्यमित्युक्तं वः सुखावहम् ।
भुक्तिमुक्तिप्रदं सर्वकामदं भक्तिवर्धनम् ॥ ६१॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायामत्रीश्वरमाहात्म्यवर्णनं नाम चतुर्थोऽध्यायः ॥ ४.४॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
कोटिरुद्रसंहिता

## ४.५. पञ्चमोऽध्यायः । ब्राह्मणीमरणवर्णनम् ।

सूत उवाच ।
कालञ्जरे गिरौ दिव्ये नीलकण्ठो महेश्वरः ।
लिङ्गरूपः सदा चैव भक्तानन्दप्रदः सदा ॥ १॥

महिमा तस्य दिव्योऽस्ति श्रुतिस्मृतिप्रकीर्तितः ।
तीर्थं तदाख्यया तत्र स्नानात्पातकनाशकृत् ॥ २॥

रेवातीरे यानि सन्ति शिवलिङ्गानि सुव्रताः ।
सर्वसौख्यकराणीह तेषां सङ्ख्या न विद्यते ॥ ३॥

सा च रुद्रस्वरूपा हि दर्शनात्पापहारिका ।
तस्यां स्थिताश्च ये केचित्पाषाणाः शिवरूपिणः ॥ ४॥

तथापि च प्रवक्ष्यामि यथान्यानि मुनीश्वराः ।
प्रधानशिवलिङ्गानि भुक्तिमुक्तिप्रदानि च ॥ ५॥

आर्तेश्वरसुनामा हि वर्तते पापहारकः ।
परमेश्वर इति ख्यातः सिंहेश्वर इति स्मृतः ॥ ६॥

शर्मेशश्च तथा चात्र कुमारेश्वर एव च ।
पुण्डरीकेश्वरः ख्यातो मण्डपेश्वर एव च ॥ ७॥

तीक्ष्णेशनामा तत्रासीद्दर्शनात्पापहारकः ।
धुन्धुरेश्वरनामासीत्पापहा नर्मदातटे ॥ ८॥

शूलेश्वर इति ख्यातस्तथा कुम्भेश्वरः स्मृतः ।
कुबेरेश्वरनामापि तथा सोमेश्वरः स्मृतः ॥ ९॥

नीलकण्ठो मङ्गलेशो मङ्गलायतनो महान् ।

महाकपीश्वरो देवः स्थापितो हि हनूमता ॥ १०॥

ततश्च नन्दिको देवो हत्याकोटिनिवारकः ।
सर्वकामार्थदश्चैव मोक्षदो हि प्रकीर्तितः ॥ ११॥

नन्दीकेशं च यश्चैव पूजयेत्परया मुदा ।
नित्यं तस्याखिला सिद्धिर्भविष्यति न संशयः ॥ १॥

तत्र तीरे च यः स्नाति रेवायां मुनिसत्तमाः ।
तस्य कामाश्च सिध्यन्ति सर्वं पापं विनश्यति ॥ १३॥

ऋषय ऊचुः ।
एवं तस्य च माहात्म्यं कथं तत्र महामते ।
नन्दिकेशस्य कृपया कथ्यतां च त्वयाधुना ॥ १४॥

सूत उवाच ।
सम्यक् पृष्टं भवद्भिश्च कथयामि यथाश्रुतम् ।
शौनकाद्याश्च मुनयः सर्वे हि शृणुतादरात् ॥ १५॥

पुरा युधिष्ठिरेणैवं पृष्टश्च ऋषिसत्तमः ।
यथोवाच तथा वच्मि भवत्स्नेहानुसारतः ॥ १६॥

रेवायाः पश्चिमे तीरे कर्णिकी नाम वै पुरी ।
विराजते सुशोभाढ्या चतुर्वर्णसमाकुला ॥ १७॥

तत्र द्विजवरः कश्चिदुतथ्यकुलसम्भवः ।
काश्यां गतश्च पुत्राभ्यामर्पयित्वा स्वपत्निकाम् ॥ १८॥

तत्रैव स मृतो विप्रः पुत्राभ्यां च श्रुतं तदा ।
तदीयं चैव तत्कृत्यं चक्राते पुत्रकावुभौ ॥ १९॥

पत्नी च पालयामास पुत्रौ पुत्रहितैषिणी ।
किञ्चिच्च वर्जयित्वा च विभक्तं वै धनं तया ॥ २०॥

स्वीयं च रक्षितं किञ्चिद्धनं मरणहेतवे ।
ततश्च द्विजपत्नी हि कियत्काले गते च सा ॥ २१॥

कदाचिन्म्रियमाणा सा विविधं पुण्यमाचरत् ।
न मृता दैवयोगेन द्विजपत्नी च सा द्विजाः ॥ २२॥

यदा प्राणान्न मुमुचे माता दैवात्तयोश्च सा ।

तद् दृष्ट्वा जननीकष्टं पुत्रकावूचतुस्तदा ॥ २३॥

पुत्रावूचतुः ।
किं न्यूनं विद्यते मातः कष्टं यद्विद्यते महत् ।
व्रियतां तद् द्रुतं प्रीत्या तदावां करवावहे ॥ २४॥

सूत उवाच ।
तच्छ्रुत्वोक्तं तया तत्र न्यूनं मे विद्यते बहु ।
तदेव क्रियते चेद्वै सुखेन मरणं भवेत् ॥ ५॥

ज्येष्ठपुत्रश्च यस्तस्यास्तेनोक्तं कथ्यतां त्वया ।
करिष्यामि तदेतद्धि तया च कथितं तदा ॥ ६॥

द्विजपत्न्युवाच ।
शृणु पुत्र वचः प्रीत्या पुरासीन्मे मनःस्पृहा ।
काश्यां गन्तुं तथा नासीदिदानीं म्रियते पुनः ॥ ७॥

ममास्थीनि त्वया पुत्र क्षेपणीयान्यतन्द्रितम् ।
गङ्गाजले शुभं तेऽद्य भविष्यति न संशयः ॥ ८॥

सूत उवाच ।
इत्युक्ते च तया मात्रा स ज्येष्ठतनयोऽब्रवीत् ।
मातरं मातृभक्तस्तु सुव्रतां मरणोन्मुखीम् ॥ २९॥

पुत्र उवाच ।
मातस्त्वया सुखेनैव प्राणास्त्याज्या न संशयः ।
तव कार्यं पुरा कृत्वा पश्चात्कार्यं मदीयकम् ॥ ३०॥

इति हस्ते जलं दत्त्वा यावत्पुत्रो गृहं गतः ।
तावत्सा च मृता तत्र हरस्मरणतत्परा ॥ ३१॥

तस्याश्चैव तु यत्कृत्यं तत्सर्वं संविधाय सः ।
मासिकं कर्म कृत्वा तु गमनाय प्रचक्रमे ॥ ३॥

द्वयोः श्रेष्ठतरो यो वै सुवादो नाम विश्रुतः ।
तदस्थीनि समादाय निःसृतस्तीर्थकाम्यया ॥ ३३॥

सङ्गृह्य सेवकं कञ्चित्तेनैव सहितस्तदा ।
आश्वास्य भार्यां पुत्राँश्च मातुः प्रियचिकीर्षया ॥ ३४॥

श्राद्धदानादिकं भोज्यं कृत्वा विधिमनुत्तमम् ।
मङ्गलस्मरणं कृत्वा निर्जगाम गृहाद् द्विजः ॥ ३५॥

तद्दिने योजनं गत्वा विंशति ग्रामके शुभे ।
उवासास्तं गते भानौ गृहे विप्रस्य कस्यचित् ॥ ३६॥

चक्रे सन्ध्यादि सत्कर्म स द्विजो विधिपूर्वकम् ।
स्तवादि कृतवांस्तत्र शम्भोरद्भुतकर्मणः ॥ ३७॥

सेवकेन तदा युक्तो ब्राह्मणः संस्थितस्तदा ।
यामिनी च गता तत्र मुहूर्तद्वयसम्मिता ॥ ३८॥

एतस्मिन्नन्तरे तत्रैकमाश्चर्यमभूत्तदा ।
शृणुतादरतस्तच्च मुनयो वो वदाम्यहम् ॥ ३९॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां नन्दिकेश्वरमाहात्म्ये ब्राह्मणीमरणवर्णनं नाम पञ्चमोऽध्यायः ॥ ४.५॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.६. षष्ठोऽध्यायः । ब्राह्मणीस्वर्गतिवर्णनम् ।

सूत उवाच ।
गौश्चैकाप्यभवत्तत्र ह्यङ्गणे बन्धिता शुभा ।
तदैव ब्राह्मणो रात्रावाजगाम बहिर्गतः ॥ १॥

स उवाच प्रियां स्वीयां दृष्ट्वा गामङ्गणे स्थिताम् ।
अदुग्धां खेदनिर्विण्णो दोग्धुकामो मुनीश्वराः ॥ २॥

गौः प्रिये नैव दुग्धा ते सेत्युक्त्वा वत्समानयत् ।
दोहनार्थं समाहूय स्त्रियं शीघ्रतरं तदा ॥ ३॥

वत्सं कीले स्वयं बद्धुं यत्नं चैवाकरोत्तदा ।
ब्राह्मणः स गृहस्वामी मुनयो दुग्धलालसः ॥ ४॥

वत्सोऽपि कर्षमाणश्च पादे वै पादपीडनम् ।

चकार ब्राह्मणश्चैव कष्टं प्राप्तश्च सुव्रताः ॥ ५॥

तेन पादप्रहारेण स द्विजः क्रोधमूर्छितः ।
वत्सं च ताडयामास कूपैर्दृढतरं तदा ॥ ६॥

वत्सोऽपि पीडितस्तेन श्रान्तश्चैवाभवत्तदा ।
दुग्धा गौर्मोचितो वत्सो न क्रोधेन द्विजन्मना ॥ ७॥

गौर्दोग्धुं च महत्प्रीत्या रोदनं चाकरोत्तदा ।
दृष्ट्वा च रोदनं तस्या वत्सो वाक्यमथाब्रवीत् ॥ ८॥

वत्स उवाच ।
कथं च रुद्यते मातः किं ते दुःखमुपस्थितम् ।
तन्निवेदय मे प्रीत्या तच्छ्रुत्वा गौरवोचत ॥ ९॥

श्रूयतां पुत्र मे दुःखं वक्तुं शक्नोम्यहं न हि ।
दुष्टेन ताडितस्त्वं च तेन दुःखं ममाप्यभूत् ॥ १०॥

सूत उवाच ।
स्वमातुर्वचनं श्रुत्वा स वत्सः प्रत्यबोधयत् ।
प्रत्युवाच स्वजननीं प्रारब्धपरिनिष्ठितः ॥ ११॥

किं कर्त्तव्यं क्व गन्तव्यं कर्मबद्धा वयं यतः ।
कृतं चैव यथा पूर्वं भुज्यते च तथाधुना ॥ १२॥

हसता क्रियते कर्म रुदता परिभुज्यते ।
दुःखदाता न कोऽप्यस्ति सुखदाता न कश्चन ॥ १३॥

सुखदुःखे परो दत्त इत्येषा कुमतिर्मता ।
अहं चापि करोम्यत्र मिथ्याज्ञानं तदोच्यते ॥ १४॥

स्वकर्मणा भवेद्दुःखं सुखं तेनैव कर्मणा ।
तस्माच्च पूज्यते कर्म सर्वं कर्मणि संस्थितम् ॥ १५॥

त्वं चैवाहं च जननी इमे जीवादयश्च ये ।
ते सर्वे कर्मणा बद्धा न शोच्याः कर्हिचित्त्वया ॥ १६॥

सूत उवाच ।
एवं श्रुत्वा स्वपुत्रस्य वचनं ज्ञानगर्भितम् ।
पुत्रशोकान्विता दीना सा च गौरब्रवीदिदम् ॥ १७॥

गौरुवाच ।
वत्स सर्वं विजानासि कर्माधीनाः प्रजा इति ।
तथापि मायया ग्रस्ता दुःखं प्राप्नोम्यहं पुनः ॥ १८॥

रोदनं च कृतं भूरि दुःखशान्तिर्भवेन्न हि ।
इत्येतद्वचनं श्रुत्वा प्रसूं वत्सोऽब्रवीदिदम् ॥ १९॥

वत्स उवाच ।
यद्येवं च विजानासि पुनश्च रुदनं कुतः ।
कृत्वा च साध्यते किञ्चित्तस्माद्दुःखं त्यजाधुना ॥ २०॥

सूत उवाच ।
एवं पुत्रवचः श्रुत्वा तन्माता दुःखसंयुता ।
निःश्वस्याति तदा धेनुर्वत्सं वचनमब्रवीत् ॥ २१॥

गौरुवाच ।
मम दुःखं तदा गच्छेद्यदा दुःखं तथाविधम् ।
भवेद्धि ब्राह्मणस्यापि सत्यमेतद्ब्रवीम्यहम् ॥ २२॥

प्रातश्चैव मया पुत्र शृङ्गाभ्यां हि हनिष्यते ।
हतस्य जीवितं सद्यो यास्यत्यस्य न संशयः ॥ २३॥

वत्स उवाच ।
प्रथमं यत्कृतं कर्म तत्फलं भुज्यतेऽधुना ।
अस्याश्च ब्रह्महत्याया मातः किं फलमाप्स्यसे ॥ २४॥

समाभ्यां पुण्यपापाभ्यां भवेज्जन्म च भारते ।
तयोः क्षये च भोगेन मातर्मुक्तिरवाप्यते ॥ २५॥

कदापि कर्मणो नाशः कदा भोगः प्रजायते ।
तस्माच्च पुनरेवं त्वं कर्म मा कर्तुमुद्यता ॥ २६॥

अहं कुतस्ते पुत्रोऽद्य त्वं माता कुत एव च ।
वृथाभिमानः पुत्रत्वे मातृत्वे च विचार्यताम् ॥ २७॥

क्व माता क्व पिता विद्धि क्व स्वामी क्व कलत्रकम् ।
न कोऽपि कस्य चास्तीह सर्वेऽपि स्वकृतम्भुजः ॥ २८॥

एवं ज्ञात्वा त्वया मातर्दुःखं त्याज्यं सुयत्नतः ।

सुभगाचरणं कार्यं परलोकसुखेप्सया ॥ ९॥

गौरुवाच ।
एवं जानाम्यहं पुत्र माया मां न जहात्यसौ ।
त्वद्दुःखेन समं दुःखं तस्मै दास्ये तदेव हि ॥ ३०॥

पुनश्च ब्रह्महत्याया नाशो यत्र भवेदिह ।
तत्स्थलं च मया दृष्टं हत्या मे हि गमिष्यति ॥ ३१॥

सूत उवाच ।
इत्येतद्वचनं श्रुत्वा स्वमातुर्गौर्द्विजोत्तमाः ।
मौनत्वं स्वीकृतं तत्र वत्सेनोक्तं न किञ्चन ॥ ३॥

तयोस्तदद्भुतं वृत्तं श्रुत्वा पान्थो द्विजस्तदा ।
हृदा विचारयामास विस्मितो हि मुनीश्वराः ॥ ३३॥

इदमत्यद्भुतं वृत्तं दृष्ट्वा प्रातर्मया खलु ।
गन्तव्यं पुनरेवातो गन्तव्यं तत्स्थलं पुनः ॥ ३४॥

सूत उवाच ।
विचार्येति हृदा विप्रः स द्विजाः सेवकेन च ।
सुष्वाप तत्र जननीभक्तः परमविस्मितः ॥ ३५॥

प्रातःकाले तदा जाते गृहस्वामी समुत्थितः ।
बोधयामास तं पान्थं वचनं चेदमब्रवीत् ॥ ३६॥

द्विज उवाच ।
स्वपिषि त्वं किमर्थं हि प्रातःकालो भवत्यलम् ।
स्वयात्रां कुरु तं देशं गमनेच्छा च यत्र ह ॥ ३७॥

तेनोक्तं श्रूयतां ब्रह्मन् शरीरे सेवकस्य मे ।
वर्तते हि व्यथा स्थित्वा मुहूर्तं गम्यते ततः ॥ ३८॥

सूत उवाच ।
इत्येवं च मिषं कृत्वा सुष्वाप पुरुषस्तदा ।
तद्वृत्तमखिलं ज्ञातुमद्भुतं विस्मयावहम् ॥ ३९॥

दोहनस्य तदा काले ब्राह्मणः स्वसुतं प्रति ।
उवाच गन्तुकामश्च कार्यार्थं कुत्रचिच्च सः ॥ ४०॥

पितोवाच ।
मया तु गम्यते पुत्र कार्यार्थं कुत्रचित्पुनः ।
धेनुर्दोह्या त्वया वत्स सावधानादियं निजा ॥ ४१॥

सूत उवाच ।
इत्युक्त्वा ब्राह्मणवरः स जगाम च कुत्रचित् ।
पुत्रः समुत्थितस्तत्र वत्सं च मुक्तवांस्तदा ॥ ४२॥

माता च तस्य दोहार्थमाजगाम स्वयं तदा ।
द्विजपुत्रस्तदा वत्सं खिन्नं कीलेन ताडितम् ॥ ४३॥

बन्धनार्थं हि गोः पार्श्वमनयद्दुग्धलालसः ।
पुनर्गौश्च तदा क्रुद्धा शृङ्गेनाताडयच्च तम् ॥ ४४॥

पपात मूर्च्छां सम्प्राप्य सोऽपि मर्मणि ताडितः ।
लोकाश्च मिलितास्तत्र गवा बालो विहिंसितः ॥ ४५॥

जलं जलं वदन्तस्ते पित्राद्या यत्र संस्थिताः ।
यत्नश्च क्रियते यावत्तावद् बालो मृतस्तदा ॥ ४६॥

मृते च बालके तत्र हाहाकारो महानभूत् ।
तन्माता दुःखिता ह्यासीद् रुरोद च पुनः पुनः ॥ ४७॥

किं करोमि क्व गच्छामि को मे दुःखं व्यपोहयेत् ।
रुदित्वेति तदा गां च ताडयित्वा व्यमोचयत् ॥ ४८॥

श्वेतवर्णा तदा सा गौर्द्रुतं श्यामा व्यदृश्यत ।
अहो च दृश्यतां लोकाश्चुक्रुशुश्च परस्परम् ॥ ४९॥

ब्राह्मणश्च तदा पान्थो दृष्ट्वाश्चर्यं विनिर्गतः ।
यत्र गौश्च गता तत्र तामनु ब्राह्मणो गतः ॥ ५०॥

ऊर्ध्वपुच्छं तदा कृत्वा शीघ्रं गौर्नर्मदां प्रति ।
आगत्य नन्दिकस्यास्य समीपे नर्मदाजले ॥ ५१॥

सन्निमज्य त्रिवारं तु श्वेतत्वं च गता हि सा ।
यथागतं गता सा च ब्राह्मणो विस्मयं गतः ॥ ५२॥

अहो धन्यतमं तीर्थं ब्रह्महत्यानिवारणम् ।
स्वयं ममज्ज तत्रासौ ब्राह्मणः सेवकस्तथा ॥ ५३॥

निमज्ज्य हि गतौ तौ च प्रशंसन्तौ नदीं च ताम् ।
मार्गे च मिलिता काचित्सुन्दरी भूषणान्विता ॥ ५४॥

तयोक्तं तं च भोः पान्थ कुतो यासि सुविस्मितः ।
सत्यं ब्रूहि च्छलं त्यक्त्वा विप्रवर्य ममाग्रतः ॥ ५५॥

सूत उवाच ।
एवं वचस्तदा श्रुत्वा द्विजेनोक्तं यथातथम् ।
पुनश्चायं द्विजस्तत्र स्त्रियोक्तः स्थीयतां त्वया ॥ ५६॥

तयोक्तं च समाकर्ण्य स्थितः स ब्राह्मणस्ततः ।
प्रत्युवाच विनीतात्मा कथ्यते किं वदेति च ॥ ५७॥

सा चाह पुनरेवात्र त्वया दृष्टं स्थलं च यत् ।
तत्राधुना क्षिपास्थीनि मातुः किं गम्यतेऽन्यतः ॥ ५८॥

तव माता पान्थवर्य साक्षाद्दिव्यमयं वरम् ।
देहं धृत्वा द्रुतं साक्षाच्छम्भोर्यास्यति सद्गतिम् ॥ ५९॥

वैशाखे चैव सम्प्राप्ते सप्तम्याश्च दिने शुभे ।
सिते पक्षे सदा गङ्गा ह्यायाति द्विजसत्तम ॥ ६०॥

अद्यैव सप्तमी या सा गन्गाऽहं यामि तत्र वै ।
इत्युक्त्वान्तर्दधे देवी सा गङ्गा मुनिसत्तमाः ॥ ६१॥

निवृत्तश्च द्विजः सोऽपि मात्रस्थ्यर्द्धं स्ववस्त्रतः ।
क्षिपेद्यावत्तत्र तीर्थे तावच्चित्रमभूत्तदा ॥ ६२॥

दिव्यदेहत्वमापन्ना स्वमाता च व्यदृश्यत ।
धन्योऽसि कृतकृत्योऽसि पवित्रं च कुलं त्वया ॥ ६३॥

धनं धान्यं तथा चायुर्वंशो वै वर्धतां तव ।
इत्याशिषं मुहुर्दत्त्वा स्वपुत्राय दिवं गता ॥ ६४॥

तत्र भुक्त्वा सुखं भूरि चिरकालं महोत्तमम् ।
शङ्करस्य प्रसादेन गता सा ह्युत्तमां गतिम् ॥ ६५॥

ब्राह्मणश्च सुतस्तस्याः क्षिप्त्वास्थीनि पुनस्ततः ।
प्रसन्नमानसोऽभूत्स शुद्धात्मा स्वगृहं गतः ॥ ६६॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां नन्दिकेश्वरलिङ्गमाहात्म्यवर्णने ब्राह्मणीस्वर्गतिवर्णनं नाम षष्ठोऽध्यायः ॥ ४.६॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.७. सप्तमोऽध्यायः । नन्दिकेश्वरशिवलिङ्गमाहात्म्यवर्णनम् ।

ऋषय ऊचुः ।
कथं गङ्गा समायाता वैशाखे सप्तमीदिने ।
नर्मदायां विशेषेण सूतैतद्वर्णय प्रभो ॥ १॥

ईश्वरश्च कथं जातो नन्दिकेशो हि नामतः ।
वृत्तं तदपि सुप्रीत्या कथय त्वं महामते ॥ २॥

सूत उवाच ।
साधु पृष्टमृषिश्रेष्ठा नन्दिकेशाश्रितं वचः ।
तदहं कथयाम्यद्य श्रवणात्पुण्यवर्धनम् ॥ ३॥

ब्राह्मणी ऋषिका नाम्नी कस्यचिच्च द्विजन्मनः ।
सुता विवाहिता कस्मैचिद् द्विजाय विधानतः ॥ ४॥

पूर्वकर्मप्रभावेण पत्नी सा हि द्विजन्मनः ।
सुव्रतापि च विप्रेन्द्रा बालवैधव्यमागता ॥ ५॥

अथ सा द्विजपत्नी हि ब्रह्मचर्यव्रतान्विता ।
पार्थिवार्चनपूर्वं हि तपस्तेपे सुदारुणम् ॥ ६॥

तस्मिन्नवसरे दुष्टो मूढनामासुरो बली ।
ययौ तत्र महामायी कामबाणेन ताडितः ॥ ७॥

तपन्तीं तां समालोक्य सुन्दरीमतिकामिनीम् ।
तया भोगं ययाचे स नानालोभं प्रदर्शयन् ॥ ८॥

अथ सा सुव्रता नारी शिवध्यानपरायणा ।
तस्मिन्दृष्टिं दधौ नैव कामदृष्ट्या मुनीश्वराः ॥ ९॥

न मानितवती तं च ब्राह्मणी सा तपोरता ।
अतीव हि तपोनिष्ठासीच्छिवध्यानमाश्रिता ॥ १०॥

अथ मूढः स दैत्येन्द्रः तया तन्व्या तिरस्कृतः ।
चुक्रोध विकटं तस्यै पश्चाद्रूपमदर्शयत् ॥ ११॥

अथ प्रोवाच दुष्टात्मा दुर्वचो भयकारकम् ।
त्रासयामास बहुशस्तां च पत्नीं द्विजन्मनः ॥ १२॥

तदा सा भयसन्त्रस्ता बहुवारं शिवेति च ।
बभाषे स्नेहतस्तन्वी द्विजपत्नी शिवाश्रया ॥ १३॥

विह्वलातीव सा नारी शिवनामप्रभाषिणी ।
जगाम शरणं शम्भोः स्वधर्मावनहेतवे ॥ १४॥

शरणागतरक्षार्थं कर्तुं सद्वृत्तमाहितम् ।
आनन्दार्थं हि तस्यास्तु शिव आविर्बभूव ह ॥ १५॥

अथ तं मूढनामानं दैत्येन्द्रं कामविह्वलम् ।
चकार भस्मसात्सद्यः शङ्करो भक्तवत्सलः ॥ १६॥

ततश्च परमेशानो कृपादृष्ट्या विलोक्य ताम् ।
वरं ब्रूहीति चोवाच भक्तरक्षणदक्षधीः ॥ १७॥

श्रुत्वा महेशवचनं सा साध्वी द्विजकामिनी ।
ददर्श शाङ्करं रूपमानन्दजनकं शुभम् ॥ १८॥

ततः प्रणम्य तं शम्भुं परमेशं सुखावहम् ।
तुष्टाव साञ्जलिः साध्वी नतस्कन्धा शुभाशया ॥ १९॥

ऋषिकोवाच ।
देवदेव महादेव शरणागतवत्सल ।
दीनबन्धुस्त्वमीशानो भक्तरक्षाकरः सदा ॥ २०॥

त्वया मे रक्षितो धर्मो मूढनाम्नोऽसुरादिह ।
यदयं निहतो दुष्टो जगद्रक्षा कृता त्वया ॥ २१॥

स्वपादयोः परां भक्तिं देहि मे ह्यनपायिनीम् ।
अयमेव वरो नाथ किमन्यदधिकं ह्यतः ॥ २२॥

अन्यदाकर्णय विभो प्रार्थनां मे महेश्वर ।

लोकानामुपकारार्थमिह त्वं संस्थितो भव ॥ २३॥

सूत उवाच ।
इति स्तुत्वा महादेवमृषिका सा शुभव्रता ।
तूष्णीमासाथ गिरिशः प्रोवाच करुणाकरः ॥ २४॥

गिरिश उवाच ।
ऋषिके सुचरित्रा त्वं मम भक्ता विशेषतः ।
दत्ता वराश्च ते सर्वे तुभ्यं ये ये हि याचिताः ॥ २५॥

एतस्मिन्नन्तरे तत्र हरिब्रह्मादयः सुराः ।
शिवाविर्भावमाज्ञाय ययुर्हर्षसमन्विताः ॥ २६॥

शिवं प्रणम्य सुप्रीत्या समानर्चुश्च तेऽखिलाः ।
तुष्टुवुर्नतका विप्राः करौ बद्धा सुचेतसः ॥ २७॥

एतस्मिन्समये गङ्गा साध्वीं तां स्वर्धुनी जगौ ।
ऋषिकां सुप्रसन्नात्मा प्रशंसन्ती च तद्विधिम् ॥ २८॥

गङ्गोवाच ।
ममार्थं चैव वैशाखे मासि देयं त्वया वचः ।
स्थित्यर्थं दिनमेकं मे सामीप्यं कार्यमेव हि ॥ २९॥

सूत उवाच ।
गङ्गावचनमाकर्ण्य सा साध्वी प्राह सुव्रता ।
तथास्त्विति वचः प्रीत्या लोकानां हितहेतवे ॥ ३०॥

आनन्दार्थं शिवस्तस्याः सुप्रसन्नश्च पार्थिवे ।
तस्मिँल्लिङ्गे लयं यातः पूर्णांशेन तया हरः ॥ ३१॥

देवाः सर्वे सुप्रसन्नाः प्रशंसन्ति शिवं च ताम् ।
स्वं स्वं धाम ययुर्विष्णुर्ब्रह्माद्या अपि स्वर्णदी ॥ ३२॥

तद्दिनात्पावनं तीर्थमासीदीदृशमुत्तमम् ।
नन्दिकेशः शिवः ख्यातः सर्वपापविनाशनः ॥ ३३॥

गङ्गापि प्रतिवर्षं तद्दिने याति शुभेच्छया ।
क्षालनार्थं स्वपापस्य यद् गृहीतं नृणां द्विजाः ॥ ३४॥

तत्र स्नातो नरः सम्यङ् नन्दिकेशं समर्च्य च ।

ब्रह्महत्यादिभिः पापैर्मुच्यते ह्यखिलैरपि ॥ ३५॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां नन्दिकेश्वरशिवलिङ्गमाहात्म्यवर्णनं नाम सप्तमोऽध्यायः ॥ ४.७॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.८. अष्टमोऽध्यायः । महाबलमाहात्म्यवर्णनम् ।

सूत उवाच ।
द्विजाः शृणुत सद्भक्त्या शिवलिङ्गानि तानि च ।
पश्चिमायां दिशायां वै यानि ख्यातानि भूतले ॥ १॥

कपिलायां नगर्यां तु कालरामेश्वराभिधे ।
शिवलिङ्गे महादिव्ये दर्शनात्पापहारके ॥ २॥

पश्चिमे सागरे चैव महासिद्धेश्वरः स्मृतः ।
धर्मार्थकामदश्चैव तथा मोक्षप्रदोऽपि हि ॥ ३॥

पश्चिमाम्बुधितीरस्थं गोकर्णं क्षेत्रमुत्तमम् ।
ब्रह्महत्यादिपापघ्नं सर्वकामफलप्रदम् ॥ ५॥

गोकर्णे शिवलिङ्गानि विद्यन्ते कोटिकोटिशः ।
असङ्ख्यातानि तीर्थानि तिष्ठन्ति च पदे पदे ॥ ५॥

बहुनात्र किमुक्तेन गोकर्णस्थानि सर्वशः ।
शिवप्रत्यक्षलिङ्गानि तीर्थान्यम्भांसि सर्वशः ॥ ६॥

गोकर्णे शिवलिङ्गानां तीर्थानामपि सर्वशः ।
वर्ण्यते महिमा तात पुराणेषु महर्षिभिः ॥ ७॥

कृते युगे स हि श्वेतस्त्रेतायां सोऽतिलोहितः ।
द्वापरे पीतवर्णश्च कलौ श्यामो भविष्यति ॥ ८॥

आक्रान्तसप्तपातालकुहरोऽपि महाबलः ।
प्राप्ते कलियुगे घोरे मृदुतामुपयास्यति ॥ ९॥

महापातकिनश्चात्र समभ्यर्च्य महाबलम् ।
शिवलिङ्गं च गोकर्णे प्रयाताः शाङ्करं पदम् ॥ १०॥

गोकर्णे तत्र मुनयो गत्वा पुण्यर्क्षवासरे ।
येऽर्चयन्ति च तं भक्त्या ते रुद्राः स्युर्न संशयः ॥ ११॥

यदा कदाचिद्गोकर्णे यो वा को वापि मानवः ।
पूजयेच्छिवलिङ्गं तत्स गच्छेद् ब्रह्मणः पदम् ॥ १२॥

ब्रह्मविष्ण्वादिदेवानां शङ्करो हितकाम्यया ।
महाबलाभिधानेन देवः सन्निहितः सदा ॥ १३॥

घोरेण तपसा लब्धं रावणाख्येन रक्षसा ।
तल्लिङ्गं स्थापयामास गोकर्णे गणनायकः ॥ १४॥

विष्णुर्ब्रह्मा महेन्द्रश्च विश्वेदेवा मरुद्गणाः ।
आदित्या वसवो दस्रौ शशाङ्कश्च सतारकः ॥ १५॥

एते विमानगतयो देवाश्च सह पार्षदैः ।
पूर्वद्वारं निषेवन्ते तस्य वै प्रीतिकारणात् ॥ १६॥

यमो मृत्युः स्वयं साक्षाच्चित्रगुप्तश्च पावकः ।
पितृभिः सह रुद्रैश्च दक्षिणद्वारमाश्रितः ॥ १७॥

वरुणः सरितां नाथो गङ्गादिसरितां गणैः ।
महाबलं च सेवन्ते पश्चिमद्वारमाश्रिताः ॥ १८॥

तथा वायुः कुबेरश्च देवेशी भद्रकालिका ।
मातृभिश्चण्डिकाद्याभिरुत्तरद्वारमाश्रिताः ॥ १९॥

सर्वे देवाः सगन्धर्वाः पितरः सिद्धचारणाः ।
विद्याधराः किम्पुरुषाः किन्नरा गुह्यकाः खगाः ॥ २०॥

नानापिशाचा वेताला दैतेयाश्च महाबलाः ।
नागाः शेषादयः सर्वे सिद्धाश्च मुनयोऽखिलाः ॥ २१॥

प्रणुवन्ति च तं देवं प्रणमन्ति महाबलम् ।
लभन्त ईप्सितान्कामान् रमन्ते च यथासुखम् ॥ २२॥

बहुभिस्तत्र सुतपस्तप्तं सम्पूज्य तं विभुम् ।
लब्धा हि परमा सिद्धिरिहामुत्रापि सौख्यदा ॥ २३॥

गोकर्णे शिवलिङ्गं तु मोक्षद्वार उदाहृतः ।
महाबलाभिधानोऽसौ पूजितः संस्तुतो द्विजाः ॥ २४॥

माघासितचतुर्दश्यां महाबलसमर्चनम् ।
विमुक्तिदं विशेषेण सर्वेषां पापिनामपि ॥ २५॥

अस्यां शिवतिथौ सर्वे महोत्सवदिदृक्षवः ।
आयान्ति सर्वदेशेभ्यश्चातुर्वर्ण्यमहाजनाः ॥ २६॥

स्त्रियो वृद्धाश्च बालाश्च चतुराश्रमवासिनः ।
दृष्ट्वा तत्रैत्य देवेशं लेभिरे कृतकृत्यताम् ॥ २७॥

महाबलप्रभावात्ते तच्च लिङ्गं शिवस्य तु ।
सम्पूज्यैकाथ चाण्डाली शिवलोकं गता द्रुतम् ॥ २८॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां महाबलमाहात्म्यवर्णनं नामाष्टमोऽध्यायः ॥ ४.८॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.९. नवमोऽध्यायः । चाण्डालीसद्गतिवर्णनम् ।

ऋषय ऊचुः ।
सूत सूत महाभाग धन्यस्त्वं शैवसत्तमः ।
चाण्डाली का समाख्याता तत्कथां कथय प्रभो ॥ १॥

सूत उवाच ।
द्विजाः शृणुत सद्भक्त्या तां कथां परमाद्भुताम् ।
शिवप्रभावसम्मिश्रां शृण्वतां भक्तिवर्धिनीम् ॥ २॥

चाण्डाली सा पूर्वभवेऽभवद् ब्राह्मणकन्यका ।
सौमिनी नाम चन्द्रास्या सर्वलक्षणसंयुता ॥ ३॥

अथ सा समये कन्या युवतिः सौमिनी द्विजाः ।

पित्रा दत्ता च कस्मैचिद्विधिना द्विजसूनवे ॥ ४॥

सा भर्तारमनुप्राप्य किञ्चित्कालं शुभव्रता ।
रेमे तेन द्विजश्रेष्ठा नवयौवनशालिनी ॥ ५॥

अथ तस्याः पतिर्विप्रस्तरुणः सुरुजार्दितः ।
सौमिन्याः कालयोगात्तु पञ्चत्वमगमद् द्विजाः ॥ ६॥

मृते भर्तरि सा नारी दुःखितातिविषण्णधीः ।
किञ्चित्कालं शुभाचारा सुशीलोवास सद्मनि ॥ ७॥

ततः सा मन्मथाविष्टहृदया विधवापि च ।
युवावस्थाविशेषेण बभूव व्यभिचारिणी ॥ ८॥

तज्ज्ञात्वा गोत्रिणस्तस्या दुष्कर्म कुलदूषणम् ।
समेतास्तत्यजुर्दूरं नीत्वा तां सकचग्रहाम् ॥ ९॥

कश्चिच्छूद्रवरस्तां वै विचरन्तीं निजेच्छया ।
दृष्ट्वा वने स्त्रियं चक्रे निनाय स्वगृहं ततः ॥ १०॥

अथ सा पिशिताहारा नित्यमापीतवारुणी ।
अजीजनत्सुतां तेन शूद्रेण सुरतप्रिया ॥ ११॥

कदाचिद्भर्तरि क्वापि याते पीतसुराथ सा ।
इयेष पिशिताहारं सौमिनी व्यभिचारिणी ॥ १२॥

ततो मेषेषु बद्धेषु गोभिः सह बहिर्व्रजे ।
निशामुखे तमोऽन्धे हि खड्गमादाय सा ययौ ॥ १३॥

अविमृश्य मदावेशान्मेषबुद्ध्यामिषप्रिया ।
एकं जघान गोवत्सं क्रोशन्तमतिदुर्भगा ॥ १४॥

हतं तं गृहमानीय ज्ञात्वा गोवत्समङ्गना ।
भीता शिव शिवेत्याह केनचित्पुण्यकर्मणा ॥ १५॥

सा मुहूर्तं शिवं ध्यात्वामिषभोजनलालसा ।
छित्त्वा तमेव गोवत्सं चकाराहारमीप्सितम् ॥ १६॥

एवं बहुतिथे काले गते सा सौमिनी द्विजाः ।
कालस्य वशमापन्ना जगाम यमसङ्क्षयम् ॥ १७॥

यमोऽपि धर्ममालोक्य तस्याः कर्म च पौर्विकम् ।
निवर्त्य निरयावासाच्चक्रे चाण्डालजातिकाम् ॥ १८॥

साथ भ्रष्टा यमपुराच्चाण्डालीगर्भमाश्रिता ।
ततो बभूव जन्मान्धा प्रशान्ताङ्गारमेचका ॥ १९॥

जन्मान्धा साथ बाल्येऽपि विध्वस्तपितृमातृका ।
ऊढा न केनचिद्दुष्टा महाकुष्ठरुजार्दिता ॥ २०॥

ततः क्षुधार्दिता दीना यष्टिपाणिर्गतेक्षणा ।
चाण्डालोच्छिष्टपिण्डेन जठराग्निमतर्पयत् ॥ २१॥

एवं कृच्छ्रेण महता नीत्वा स्वविपुलं वयः ।
जरया ग्रस्तसर्वाङ्गी दुःखमाप दुरत्ययम् ॥ २२॥

कदाचित्साथ चाण्डाली गोकर्णं तं महाजनान् ।
आयास्यन्त्यां शिवतिथौ गच्छतो बुबुधेऽध्वगान् ॥ २३॥

अथासावपि चाण्डाली वसनाशनतृष्णया ।
महाजनान् याचयितुं सञ्चचार शनैः शनैः ॥ २४॥

गत्वा तत्राथ चाण्डाली प्रार्थयन्ती महाजनान् ।
यत्र तत्र चचारासौ दीनवाक्प्रसृताञ्जलिः ॥ २५॥

एवमभ्यर्थयन्त्यास्तु चाण्डाल्याः प्रसृताञ्जलौ ।
एकः पुण्यतमः पान्थः प्राक्षिपद्बिल्वमञ्जरीम् ॥ २६॥

तामञ्जलौ निपतितां सा विमृश्य पुनः पुनः ।
अभक्ष्यमिति मत्वाथ दूरे प्राक्षिपदातुरा ॥ २७॥

तस्याः कराद्विनिर्मुक्ता रात्रौ सा बिल्वमञ्जरी ।
पपात कस्यचिद्दिष्ट्या शिवलिङ्गस्य मस्तके ॥ २८॥

सैवं शिवचतुर्दश्यां रात्रौ पान्थजनान् मुहुः ।
याचमानापि यत्किञ्चिन्न लेभे दैवयोगतः ॥ २९॥

एवं शिवचतुर्दश्या व्रतं जातं च निर्मलम् ।
अज्ञानतो जागरणं परमानन्ददायकम् ॥ ३०॥

ततः प्रभाते सा नारी शोकेन महतावृता ।
शनैर्निववृते दीना स्वदेशायैव केवलम् ॥ ३१॥

श्रान्ता चिरोपवासेन निपतन्ती पदे पदे ।
अतीत्य तावतीं भूमिं निपपात विचेतना ॥ ३२॥

अथ सा शम्भुकृपया जगाम परमं पदम् ।
आरुह्य सुविमानं च नीतं शिवगणैर्द्रुतम् ॥ ३३॥

आदौ यदेषा शिवनाम नारी
प्रमादतो वाप्यसती जगाद ।
तेनेह भूयः सुकृतेन विप्रा
महाबलस्थानमवाप दिव्यम् ॥ ३४॥

श्रीगोकर्णे शिवतिथावुपोष्य शिवमस्तके ।
कृत्वा जागरणं सा हि चक्रे बिल्वार्चनं निशि ॥ ३५॥

अकामतः कृतस्यास्य पुण्यस्यैव च तत्फलम् ।
भुनक्त्यद्यापि सा चैव महाबलप्रसादतः ॥ ३६॥

एवंविधं महालिङ्गं शङ्करस्य महाबलम् ।
सर्वपापहरं सद्यः परमानन्ददायकम् ॥ ३७॥

एवं वः कथितं विप्रा माहात्म्यं परमं मया ।
महाबलाभिधानस्य शिवलिङ्गवरस्य हि ॥ ३८॥

अथान्यदपि वक्ष्यामि माहात्म्यं तस्य चाद्भुतम् ।
श्रुतमात्रेण येनाशु शिवे भक्तिः प्रजायते ॥ ३९॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां चाण्डालीसद्गतिवर्णनं नाम नवमोऽध्यायः ॥ ४.९॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.१०. दशमोऽध्यायः । महाबलाह्वशिवलिङ्गमाहात्म्यवर्णनम् ।

सूत उवाच ।

श्रीमतीक्ष्वाकुवंशे हि राजा परमधार्मिकः ।
आसीन्मित्रसहो नाम श्रेष्ठः सर्वधनुष्मताम् ॥ १॥

तस्य राज्ञः सुधर्मिष्ठा मदयन्ती प्रिया शुभा ।
दमयन्ती नलस्येव बभूव विदिता सती ॥ २॥

स एकदा हि मृगयास्नेही मित्रसहो नृपः ।
महद्बलेन संयुक्तो जगाम गहनं वनम् ॥ ३॥

विहरंस्तत्र स नृपः कमठाह्वं निशाचरम् ।
निजघान महादुष्टं साधुपीडाकरं खलम् ॥ ४॥

अथ तस्यानुजः पापी जयेयं छद्मनैव तम् ।
मत्वा जगाम नृपतेरन्तिकं छद्मकारकः ॥ ५॥

तं विनम्राकृतिं दृष्ट्वा भृत्यतां कर्तुमागतम् ।
चक्रे महानसाध्यक्षमज्ञानात्स महीपतिः ॥ ६॥

अथ तस्मिन्वने राजा कियत्कालं विहृत्य सः ।
निवृत्तो मृगयां हित्वा स्वपुरीमाययौ मुदा ॥ ७॥

पितुः क्षयाहे सम्प्राप्ते निमन्त्र्य स्वगुरुं नृपः ।
वसिष्ठं गृहमानिन्ये भोजयामास भक्तितः ॥ ८॥

रक्षसा सूदरूपेण सम्मिश्रितनरामिषम् ।
शाकामिषं पुरः क्षिप्तं दृष्ट्वा गुरुरथाब्रवीत् ॥ ९॥

गुरुरुवाच ।
धिक् त्वां नरामिषं राजंस्त्वयैतच्छद्मकारिणा ।
खलेनोपहृतं मह्यं ततो रक्षो भविष्यसि ॥ १०॥

रक्षःकृतं च विज्ञाय तदैवं स गुरुस्तदा ।
पुनर्विमृश्य तं शापं चकार द्वादशाब्दिकम् ॥ ११॥

स राजानुचितं शापं विज्ञाय क्रोधमूर्छितः ।
जलाञ्जलिं समादाय गुरुं शप्तुं समुद्यतः ॥ १॥

तदा च तत्प्रिया साध्वी मदयन्ती सुधर्मिणी ।
पतित्वा पादयोस्तस्य शापं तं हि न्यवारयत् ॥ १३॥

ततो निवृत्तशापस्तु तस्या वचनगौरवात् ।

तत्याज पादयोरम्भः पादौ कल्मषतां गतौ ॥ १४॥

ततःप्रभृति राजा भूत्स लोकेऽस्मिन्मुनीश्वराः ।
कल्मषाङ्घ्रिरिति ख्यातः प्रभावात्तज्जलस्य हि ॥ १५॥

राजा मित्रसहः शापाद् गुरोर्ऋषिवरस्य हि ।
बभूव राक्षसो घोरो हिंसको वनगोचरः ॥ १६॥

स बिभ्रद्राक्षसं रूपं कालान्तकयमोपमम् ।
चखाद विविधाञ्जन्तून् मानुषादीन्वनेचरः ॥ १७॥

स कदाचिद्वने क्वापि रममाणौ किशोरकौ ।
अपश्यदन्तकाकारो नवोढौ मुनिदम्पती ॥ १८॥

राक्षसः स नराहारः किशोरं मुनिनन्दनम् ।
जग्धुं जग्राह शापार्त्तो व्याघ्रो मृगशिशुं यथा ॥ १९॥

कक्षे गृहीतं भर्तारं दृष्ट्वा भीता च तत्प्रिया ।
सा चक्रे प्रार्थनां तस्मै वदती करुणं वचः ॥ २०॥

प्रार्थ्यमानोऽपि बहुशः पुरुषादः स निर्घृणः ।
चखाद शिर उत्कृत्य विप्रसूनोर्दुराशयः ॥ २१॥

अथ साध्वी च सा दीना विलप्य भृशदुःखिता ।
आहृत्य भर्तुरस्थीनि चितां चक्रे किलोल्बणाम् ॥ २२॥

भर्तारमनुगच्छन्ती संविशन्ती हुताशनम् ।
राजानं राक्षसाकारं सा शशाप द्विजाङ्गना ॥ २३॥

अद्यप्रभृति नारीषु यदा त्वं सङ्गतो भवेः ।
तदा मृतिस्तवेत्युक्त्वा विवेश ज्वलनं सती ॥ २४॥

सोऽपि राजा गुरोः शापमनुभूय कृतावधिम् ।
पुनः स्वरूपमास्थाय स्वगृहं मुदितो ययौ ॥ २५॥

ज्ञात्वा विप्रसतीशापं मदयन्ती रतिप्रियम् ।
पतिं निवारयामास वैधव्याद्तिबिभ्यती ॥ २६॥

अनपत्यो विनिर्विण्णो राज्यभोगेषु पार्थिवः ।
विसृज्य सकलां लक्ष्मीं वनमेव जगाम ह ॥ २७॥

स्वपृष्ठतः समायान्तीं ब्रह्महत्यां सुदुःखदाम् ।
ददर्श विकटाकारां तर्जयन्तीं मुहुर्मुहुः ॥ २८॥

तस्या निर्भद्रमन्विच्छन् राजा निर्विण्णमानसः ।
चकार नानोपायान्स जपव्रतमखादिकान् ॥ २९॥

नानोपायैर्यदा राज्ञस्तीर्थस्नानादिभिर्द्विजाः ।
न निवृत्ता ब्रह्महत्या मिथिलां स ययौ तदा ॥ ३०॥

बाह्योद्यानगतस्तस्याश्चिन्तया परयार्दितः ।
ददर्श मुनिमायान्तं गौतमं पार्थिवश्च सः ॥ ३१॥

अभिसृत्य स राजेन्द्रो गौतमं विमलाशयम् ।
तद्दर्शनाप्तकिञ्चित्कः प्रणनाम मुहुर्मुहुः ॥ ३॥

अथ तत्पृष्टकुशलो दीर्घमुष्णं च निःश्वसन् ।
तत्कृपादृष्टिसम्प्राप्तसुखः प्रोवाच तं नृपः ॥ ३३॥

राजोवाच ।
मुने मां बाधते ह्येषा ब्रह्महत्या दुरत्यया ।
अलक्षिता परैस्तात तर्जयन्ती पदे पदे ॥ ३४॥

यन्मया शापदग्धेन विप्रपुत्रश्च भक्षितः ।
तत्पापस्य न शान्तिर्हि प्रायश्चित्तसहस्रकैः ॥ ३५॥

नानोपायाः कृता मे हि तच्छान्त्यै भ्रमता मुने ।
न निवृत्ता ब्रह्महत्या मम पापात्मनः किमु ॥ ३६॥

अद्य मे जन्मसाफल्यं सम्प्राप्तमिव लक्षये ।
यतस्त्वद्दर्शनादेव ममानन्दभरोऽभवत् ॥ ३७॥

अद्य मे तव पादाब्जशरणस्य कृतैनसः ।
शान्तिं कुरु महाभाग येनाहं सुखमाप्नुयाम् ॥ ३८॥

सूत उवाच ।
इति राज्ञा समादिष्टो गौतमः करुणार्द्रधीः ।
समादिदेश घोराणामघानां साधु निष्कृतिम् ॥ ३९॥

गौतम उवाच ।
साधु राजेन्द्र धन्योऽसि महाघेभ्यो भयं त्यज ।

शिवे शास्तरि भक्तानां क्व भयं शरणैषिणाम् ॥ ४० ॥

शृणु राजन्महाभाग क्षेत्रमन्यत्प्रतिष्ठितम् ।
महापातकसंहारि गोकर्णाख्यं शिवालयम् ॥ ४१ ॥

तत्र स्थितिर्न पापानां महद्भ्यो महतामपि ।
महाबलाभिधानेन शिवः सन्निहितः स्वयम् ॥ ४२ ॥

सर्वेषां शिवलिङ्गानां सार्वभौमो महाबलः ।
चतुर्युगे चतुर्वर्णः सर्वपापापहारकः ॥ ४३ ॥

पश्चिमाम्बुधितीरस्थं गोकर्णं तीर्थमुत्तमम् ।
तत्रास्ति शिवलिङ्गं तन्महापातकनाशकम् ॥ ४४ ॥

तत्र गत्वा महापापाः स्नात्वा तीर्थेषु भूरिशः ।
महाबलं च सम्पूज्य प्रयाताः शाङ्करं पदम् ॥ ४५ ॥

तथा त्वमपि राजेन्द्र गोकर्णं गिरिशालयम् ।
गत्वा सम्पूज्य तल्लिङ्गं कृतकृत्यत्वमाप्नुयाः ॥ ४६ ॥

तत्र सर्वेषु तीर्थेषु स्नात्वाभ्यर्च्य महाबलम् ।
सर्वपापविनिर्मुक्तः शिवलोकं त्वमाप्नुयाः ॥ ४७ ॥

सूत उवाच ।
इत्यादिष्टः स मुनिना गौतमेन महात्मना ।
महाहृष्टमना राजा गोकर्णं प्रत्यपद्यत ॥ ४८ ॥

तत्र तीर्थेषु सुस्नात्वा समभ्यर्च्य महाबलम् ।
निर्धूताशेषपापौघोऽलभच्छम्भोः परं पदम् ॥ ४९ ॥

य इमां शृणुयान्नित्यं महाबलकथां प्रियाम् ।
त्रिसप्तकुलजैः सार्धं शिवलोके व्रजत्यसौ ॥ ५० ॥

इति वश्च समाख्यातं माहात्म्यं परमाद्भुतम् ।
महाबलस्य गिरिशलिङ्गस्य निखिलाघहृत् ॥ ५१ ॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां महाबलाह्वशिवलिङ्ग-
माहात्म्यवर्णनं नाम दशमोऽध्यायः ॥ ४.१० ॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥

॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.११. एकादशोऽध्यायः । चन्द्रभालपशुपतिनाथलिङ्गमाहात्म्यवर्णनम् ।

ऋषय ऊचुः ।
सूत सूत महाभाग धन्यस्त्वं शिवसक्तधीः ।
महाबलस्य लिङ्गस्य श्राविवेतयं कथाद्भुता ॥ १॥

उत्तरस्यां दिशायां च शिवलिङ्गानि यानि च ।
तेषां माहात्म्यमनघं वद त्वं पापनाशकम् ॥ २॥

सूत उवाच ।
शृणुतादरतो विप्रा औत्तराणां विशेषतः ।
माहात्म्यं शिवलिङ्गानां प्रवदामि समासतः ॥ ३॥

गोकर्णं क्षेत्रमपरं महापातकनाशनम् ।
महावनं च तत्रास्ति पवित्रमतिविस्तरम् ॥ ४॥

तत्रास्ति चन्द्रभालाख्यं शिवलिङ्गमनुत्तमम् ।
रावणेन समानीतं सद्भक्त्या सर्वसिद्धिदम् ॥ ५॥

तस्य तत्र स्थितिर्वैद्यनाथस्येव मुनीश्वराः ।
सर्वलोकहितार्थाय करुणासागरस्य च ॥ ६॥

स्नानं कृत्वा तु गोकर्णे चन्द्रभालं समर्च्य च ।
शिवलोकमवाप्नोति सत्यं सत्यं न संशयः ॥ ७॥

चन्द्रभालस्य लिङ्गस्य महिमा परमाद्भुतः ।
न शक्यो वर्णितुं व्यासाद्भक्तिस्नेहरतस्य हि ॥ ८॥

चन्द्रभालमहादेवलिङ्गस्य महिमा महान् ।
यथाकथञ्चित्सम्प्रोक्तः परलिङ्गस्य वै शृणु ॥ ९॥

दाधीचं शिवलिङ्गं तु मिश्रर्षिवरतीर्थके ।
दधीचिना मुनीशेन सुप्रीत्या च प्रतिष्ठितम् ॥ १०॥

तत्र गत्वा च तत्तीर्थे स्नात्वा सम्यग्विधानतः ।
शिवलिङ्गं समर्चेद्वै दाधीचेश्वरमादरात् ॥ ११॥

दधीचमूर्तिस्तत्रैव समर्च्या विधिपूर्वकम् ।
शिवप्रीत्यर्थमेवाशु तीर्थयात्राफलार्थिभिः ॥ १॥

एवं कृते मुनिश्रेष्ठाः कृतकृत्यो भवेन्नरः ।
इह सर्वसुखं भुक्त्वा परत्र गतिमाप्नुयात् ॥ १३॥

नैमिषारण्यतीर्थे तु निखिलर्षिप्रतिष्ठितम् ।
ऋषीश्वरमिति ख्यातं शिवलिङ्गं सुखप्रदम् ॥ १४॥

तद्दर्शनात्पूजनाच्च जनानां पापिनामपि ।
भुक्तिर्मुक्तिश्च तेषां तु परत्रेह मुनीश्वराः ॥ १५॥

हत्याहरणतीर्थे तु शिवलिङ्गमघापहम् ।
पूजनीयं विशेषेण हत्याकोटिविनाशनम् ॥ १६॥

देवप्रयागतीर्थे तु ललितेश्वरनामकम् ।
शिवलिङ्गं सदा पूज्यं नरैः सर्वाघनाशनम् ॥ १७॥

नयपालाख्यपुर्यां तु प्रसिद्धायां महीतले ।
लिङ्गं पशुपतीशाख्यं सर्वकामफलप्रदम् ॥ १८॥

शिरोभागस्वरूपेण शिवलिङ्गं तदस्ति हि ।
तत्कथां वर्णयिष्यामि केदारेश्वरवर्णने ॥ १९॥

तदारान्मुक्तिनाथाख्यं शिवलिङ्गं महाद्भुतम् ।
दर्शनादर्चनात्तस्य भुक्तिर्मुक्तिश्च लभ्यते ॥ २०॥

इति वश्च समाख्यातं लिङ्गवर्णनमुत्तमम् ।
चतुर्दिक्षु मुनिश्रेष्ठाः किमन्यच्छ्रोतुमिच्छथ ॥ २१॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां चन्द्रभालपशुपतिनाथलिङ्गमाहात्म्यवर्णनं
नामैकादशोऽध्यायः ॥ ४.११॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.१२. द्वादशोऽध्यायः । लिङ्गस्वरूपकारणवर्णनम् ।

ऋषय ऊचुः ।
सूत जानासि सकलं वस्तु व्यासप्रसादतः ।
तवाज्ञातं न विद्येत तस्मात्पृच्छामहे वयम् ॥ १॥

लिङ्गं च पूज्यते लोके तत्त्वया कथितं च यत् ।
तत्तथैव न चान्यद्वा कारणं विद्यते त्विह ॥ २॥

बाणरूपा श्रुता लोके पार्वती शिववल्लभा ।
एतत्किं कारणं सूत कथय त्वं यथाश्रुतम् ॥ ३॥

सूत उवाच ।
कल्पभेदकथा चैव श्रुता व्यासान्मया द्विजाः ।
तामेव कथयाम्यद्य श्रूयतामृषिसत्तमाः ॥ ४॥

पुरा दारुवने जातं यद् वृत्तं तु द्विजन्मनाम् ।
तदेव श्रूयतां सम्यक् कथयामि यथाश्रुतम् ॥ ५॥

दारुनाम वनं श्रेष्ठं तत्रासन् ऋषिसत्तमाः ।
शिवभक्ताः सदा नित्यं शिवध्यानपरायणाः ॥ ६॥

त्रिकालं शिवपूजां च कुर्वन्ति स्म निरन्तरम् ।
नानाविधैः स्तवैर्दिव्यैस्तुष्टुवुस्ते मुनीश्वराः ॥ ७॥

ते कदाचिद्वने याताः समिधाहरणाय च ।
सर्वे द्विजर्षभाः शैवाः शिवध्यानपरायणाः ॥ ८॥

एतस्मिन्नन्तरे साक्षाच्छङ्करो नीललोहितः ।
विरूपं च समास्थाय परीक्षार्थं समागतः ॥ ९॥

दिगम्बरोऽतितेजस्वी भूतिभूषणभूषितः ।
स चेष्टामकरोद्दुष्टां हस्ते लिङ्गं विधारयन् ॥ १०॥

मनसा च प्रियं तेषां कर्तुं वै वनवासिनाम् ।
जगाम तद्वनं प्रीत्या भक्तप्रीतो हरः स्वयम् ॥ ११॥

तं दृष्ट्वा ऋषिपत्न्यस्ताः परं त्रासमुपागताः ।
विह्वला विस्मिताश्चान्याः समाजग्मुस्तथा पुनः ॥ १॥

आलिलिङ्गुस्तथा चान्याः करं धृत्वा तथापराः ।
परस्परं तु सङ्घर्षात्सम्मग्नास्ताः स्त्रियस्तदा ॥ १३॥

एतस्मिन्नेव समये ऋषिवर्याः समागमन् ।
विरुद्धं तं च ते दृष्ट्वा दुःखिताः क्रोधमूर्च्छिताः ॥ १४॥

तदा दुःखमनुप्राप्ताः कोऽयं कोऽयं तथाब्रुवन् ।
समस्ता ऋषयस्ते वै शिवमायाविमोहिताः ॥ १५॥

यदा च नोक्तवान् किञ्चित्सोऽवधूतो दिगम्बरः ।
ऊचुस्तं पुरुषं भीमं तदा ते परमर्षयः ॥ १६॥

त्वया विरुद्धं क्रियते वेदमार्गविलोपि यत् ।
ततस्त्वदीयं तल्लिङ्गं पततां पृथिवीतले ॥ १७॥

सूत उवाच ।
इत्युक्ते तु तदा तैश्च लिङ्गं च पतितं क्षणात् ।
अवधूतस्य तस्याशु शिवस्याद्भुतरूपिणः ॥ १८॥

तल्लिङ्गं चाग्निवत्सर्वं यद्ददाह पुरा स्थितम् ।
यत्र यत्र च तद्याति तत्र तत्र दहेत्पुनः ॥ १९॥

पाताले च गतं तच्च स्वर्गे चापि तथैव च ।
भूमौ सर्वत्र तद्यातं न कुत्रापि स्थिरं हि तत् ॥ २०॥

लोकाश्च व्याकुला जाता ऋषयस्तेऽतिदुःखिताः ।
न शर्म लेभिरे केचिद्देवाश्च ऋषयस्तथा ॥ २१॥

न ज्ञातस्तु शिवो यैस्तु ते सर्वे च सुरर्षयः ।
दुःखिता मिलिताः शीघ्रं ब्रह्माणं शरणं ययुः ॥ २२॥

तत्र गत्वा च ते सर्वे नत्वा स्तुत्वा विधिं द्विजाः ।
तत्सर्वमवदन् वृत्तं ब्रह्मणे सृष्टिकारिणे ॥ २३॥

ब्रह्मा तद्वचनं श्रुत्वा शिवमायाविमोहितान् ।
ज्ञात्वा तान् शङ्करं नत्वा प्रोवाच ऋषिसत्तमान् ॥ २४॥

ब्रह्मोवाच ।
ज्ञातारश्च भवन्तो वै कुर्वते गर्हितं द्विजाः ।
अज्ञातारो यदा कुर्युः किं पुनः कथ्यते पुनः ॥ २५॥

विरुध्यैवं शिवं देवं कुशलं कः समीहते ।
मध्याह्नसमये यो वै नातिथिं च परामृशेत् ॥ २६॥

तस्यैव सुकृतं नीत्वा स्वीयं च दुष्कृतं पुनः ।
संस्थाप्य चातिथिर्याति किं पुनः शिवमेव वा ॥ २७॥

यावल्लिङ्गं स्थिरं नैव जगतां त्रितये शुभम् ।
जायते न तदा क्वापि सत्यमेतद्वदाम्यहम् ॥ २८॥

भवद्भिश्च तथा कार्यं यथा स्वास्थ्यं भवेदिह ।
शिवलिङ्गस्य ऋषयो मनसा संविचार्यताम् ॥ २९॥

सूत उवाच ।
इत्युक्तास्ते प्रणम्योचुर्ब्रह्माणमृषयश्च वै ।
किमस्माभिर्विधे कार्यं तत्कार्यं त्वं समादिश ॥ ३०॥

इत्युक्तश्च मुनीशैस्तैः सर्वलोकपितामहः ।
मुनीशांस्तांस्तदा ब्रह्मा स्वयं प्रोवाच वै तदा ॥ ३१॥

ब्रह्मोवाच ।
आराध्य गिरिजां देवीं प्रार्थयन्तु सुराः शिवाम् ।
योनिरूपा भवेच्चेद्वै तदा तत्स्थिरतां व्रजेत् ॥ ३२॥

तद्विधिं प्रवदाम्यद्य सर्वे शृणुत सत्तमाः ।
तामेव कुरुत प्रेम्णा प्रसन्ना सा भविष्यति ॥ ३३॥

कुम्भमेकं च संस्थाप्य कृत्वाष्टदलमुत्तमम् ।
दूर्वायवाङ्कुरैस्तीर्थोदकमापूरयेत्ततः ॥ ३४॥

वेदमन्त्रैस्ततस्तं वै कुम्भं चैवाभिमन्त्रयेत् ।
श्रुत्युक्तविधिना तस्य पूजां कृत्वा शिवं स्मरन् ॥ ३५॥

तल्लिङ्गं तज्जलेनाभिषेचयेत्परमर्षयः ।
शतरुद्रियमन्त्रैस्तु प्रोक्षितं शान्तिमाप्नुयात् ॥ ३६॥

गिरिजायोनिरूपं च बाणं स्थाप्य शुभं पुनः ।
तत्र लिङ्गं च तत्स्थाप्यं पुनश्चैवाभिमन्त्रयेत् ॥ ३७॥

सुगन्धैश्चन्दनैश्चैव पुष्पधूपादिभिस्तथा ।
नैवेद्यादिकपूजाभिस्तोषयेत्परमेश्वरम् ॥ ३८॥

प्रणिपातैः स्तवैः पुण्यैर्वाद्यैर्गानैस्तथा पुनः ।
ततः स्वस्त्ययनं कृत्वा जयेति व्याहरेत्तथा ॥ ३९॥

प्रसन्नो भव देवेश जगदाह्लादकारक ।
कर्ता पालयिता त्वं च संहर्ता त्वं निरक्षरः ॥ ४०॥

जगदादिर्जगद्योनिर्जगदन्तर्गतोऽपि च ।
शान्तो भव महेशान सर्वाँल्लोकांश्च पालय ॥ ४१॥

एवं कृते विधौ स्वास्थ्यं भविष्यति न संशयः ।
विकारो न त्रिलोकेऽस्मिन्भविष्यति सुखं सदा ॥ ४२॥

सूत उवाच ।
इत्युक्तास्ते द्विजा देवाः प्रणिपत्य पितामहम् ।
शिवं तं शरणं प्राप्ताः सर्वलोकसुखेप्सया ॥ ४३॥

पूजितः परया भक्त्या प्रार्थितः शङ्करस्तदा ।
सुप्रसन्नस्ततो भूत्वा तानुवाच महेश्वरः ॥ ४४॥

महेश्वर उवाच ।
हे देवा ऋषयः सर्वे मद्वचः शृणुतादरात् ।
योनिरूपेण मल्लिङ्गं धृतं चेत्स्यात्तदा सुखम् ॥ ४५॥

पार्वतीं च विना नान्या लिङ्गं धारयितुं क्षमा ।
तया धृतं च मल्लिङ्गं द्रुतं शान्तिं गमिष्यति ॥ ४६॥

सूत उवाच ।
तच्छ्रुत्वा ऋषिभिर्देवैः सुप्रसन्नैर्मुनीश्वराः ।
गृहीत्वा चैव ब्रह्माणं गिरिजा प्रार्थिता तदा ॥ ४७॥

प्रसन्नां गिरिजां कृत्वा वृषभध्वजमेव च ।
पूर्वोक्तं च विधिं कृत्वा स्थापितं लिङ्गमुत्तमम् ॥ ४८॥

मन्त्रोक्तेन विधानेन देवाश्च ऋषयस्तथा ।
चक्रुः प्रसन्नां गिरिजां शिवं च धर्महेतवे ॥ ४९॥

समानर्चुर्विशेषेण सर्वे देवर्षयः शिवम् ।
ब्रह्मा विष्णुः परे चैव त्रैलोक्यं सचराचरम् ॥ ५०॥

सुप्रसन्नः शिवो जातः शिवा च जगदम्बिका ।

धृतं तया च तल्लिङ्गं तेन रूपेण वै तदा ॥ ५१॥

लोकानां स्थापिते लिङ्गे कल्याणं चाभवत्तदा ।
प्रसिद्धं चैव तल्लिङ्गं त्रिलोक्यामभवद् द्विजाः ॥ ५२॥

हाटकेशमिति ख्यातं तच्छिवाशिवमित्यपि ।
पूजनात्तस्य लोकानां सुखं भवति सर्वथा ॥ ५३॥

इह सर्वसमृद्धिः स्यान्नानासुखवहाधिका ।
परत्र परमा मुक्तिर्नात्र कार्या विचारणा ॥ ५४॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां लिङ्गस्वरूपकारणवर्णनं नाम द्वादशोऽध्यायः ॥ ४.१२॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.१३. त्रयोदशोऽध्यायः । बटुकोत्पत्तिवर्णनम् ।

सूत उवाच ।
यथाभवल्लिङ्गरूपः सम्पूज्यस्त्रिभवे शिवः ।
तथोक्तं वा द्विजाः प्रीत्या किमन्यच्छ्रोतुमिच्छथ ॥ १॥

ऋषय ऊचुः ।
अन्धकेश्वरलिङ्गस्य महिमानं वद प्रभो ।
तथान्यच्छिवलिङ्गानां प्रीत्या वक्तुमिहार्हसि ॥ २॥

सूत उवाच ।
पुराब्धिगर्तमाश्रित्य वसन् दैत्योऽन्धकासुरः ।
स्ववशं कारयामास त्रैलोक्यं सुरसूदनः ॥ ३॥

तस्माद्गर्ताच्च निःसृत्य पीडयित्वा पुनः प्रजाः ।
प्राविशच्च तदा दैत्यस्तं गर्तं सुपराक्रमः ॥ ४॥

देवाश्च दुःखिताः सर्वे शिवं प्रार्थ्य पुनःपुनः ।
सर्वं निवेदयामासुः स्वदुःखं च मुनीश्वराः ॥ ५॥

सूत उवाच ।
तदाकर्ण्य वचस्तेषां देवानां परमेश्वरः ।
प्रत्युवाच प्रसन्नात्मा दुष्टहन्ता सतां गतिः ॥ ६॥

शिव उवाच ।
घातयिष्यामि तं दैत्यमन्धकं सुरसूदनम् ।
सैन्यं च नीयतान्देवा ह्यायामि च गणैः सह ॥ ७॥

तस्माद्गर्तादन्धके हि देवर्षिद्रुहि भीकरे ।
निःसृते च तदा तस्मिन्देवा गर्तमुपाश्रिताः ॥ ८॥

दैत्याश्च देवताश्चैव युद्धं चक्रुः सुदारुणम् ।
शिवानुग्रहतो देवाः प्रबलाश्चाभवँस्तदा ॥ ९॥

देवैश्च पीडितः सोऽपि यावद्गर्तमुपागतः ।
तावच्छूलेन सम्प्रोतः शिवेन परमात्मना ॥ १०॥

तत्रत्यश्च तदा शम्भुं ध्यात्वा सम्प्रार्थयत्तदा ।
अन्तकाले च त्वां दृष्ट्वा तादृशो भवति क्षणात् ॥ ११॥

इत्येवं संस्तुतः सोऽपि प्रसन्नः शङ्करस्तदा ।
उवाच वचनं तत्र वरं ब्रूहि ददामि ते ॥ १२॥

इत्येवं वचनं श्रुत्वा स दैत्यः पुनरब्रवीत् ।
सुप्रणम्य शिवं स्तुत्वा सत्त्वभावमुपाश्रितः ॥ १३॥

अन्धक उवाच ।
यदि प्रसन्नो देवेश स्वभक्तिं देहि मे शुभाम् ।
कृपां कृत्वा विशेषेण संस्थितो भव चेह वै ॥ १४॥

सूत उवाच ।
इत्युक्तस्तेन दैत्यं तं तद्गर्ते चाक्षिपद्धरः ।
स्वयं तत्र स्थितो लिङ्गरूपोऽसौ लोककाम्यया ॥ १५॥

अन्धकेशं च तल्लिङ्गं नित्यं यः पूजयेन्नरः ।
षण्मासाज्जायते तस्य वाञ्छासिद्धिर्न संशयः ॥ १६॥

वृत्त्यर्थं पूजयेल्लिङ्गं लोकस्य हितकारकम् ।
षण्मासं यो द्विजश्चैव स वै देवलकः स्मृतः ॥ १७॥

यथा देवलकश्चैव स भवेदिह वै तदा ।
देवलकश्च यः प्रोक्तो नाधिकारो द्विजस्य हि ॥ १८॥

॥ ऋषय ऊचुः ॥

देवलकश्च कः प्रोक्तः किं कार्यं तस्य विद्यते ।
तत्त्वं वद महाप्राज्ञ लोकानां हितहेतवे ॥ १९॥

सूत उवाच ।
दधीचिर्नाम विप्रो यो धर्मिष्ठो वेदपारगः ।
शिवभक्तिरतो नित्यं शिवशास्त्रपरायणः ॥ २०॥

तस्य पुत्रस्तथा ह्यासीत्स्मृतो नाम्ना सुदर्शनः ।
तस्य भार्या दुकूला च नाम्ना दुष्टकुलोद्भवा ॥ २१॥

तद्वशे स च भर्तासीत्तस्य पुत्रचतुष्टयम् ।
सोऽपि नित्यं शिवस्यैव पूजां च स्म करोत्यसौ ॥ २२॥

दधीचेस्तु तदा ह्यासीद् ग्रामान्तरनिवेशनम् ।
ज्ञातिसंयोगतश्चैव ज्ञातिभिर्न स मोचितः ॥ २३॥

कथयित्वा च पुत्रं स शिवभक्तिरतो भव ।
इत्युक्त्वा स गतो मुक्तो दधीचिः शैवसत्तमः ॥ २४॥

सुदर्शनस्तत्पुत्रोऽपि शिवपूजां चकार ह ।
एवं चिरतरः कालो व्यतीयाय मुनीश्वराः ॥ २५॥

एवं च शिवरात्रिश्च समायाता कदाचन ।
तस्यां चोपोषिताः सर्वे स्वयं संयोगतस्तदा ॥ २६॥

पूजां कृत्वा गतः सोऽपि सुदर्शन इति स्मृतः ।
स्त्रीसङ्गं शिवरात्रौ तु कृत्वा पुनरिहागतः ॥ २७॥

न स्नानं तेन च कृतं तद्रात्र्यां शिवपूजनम् ।
तेन तत्कर्मपाकेन क्रुद्धः प्रोवाच शङ्करः ॥ २८॥

महेश्वर उवाच ।
शिवरात्र्यां त्वया दुष्ट सेवनं च स्त्रियाः कृतम् ।
अस्नातेन मदीया च कृता पूजाविवेकिना ॥ २९॥

ज्ञात्वा चैवं कृतं यस्मात्तस्मात्त्वं जडतां व्रज ।

ममास्पृश्यो भव त्वं च दूरतो दर्शनं कुरु ॥ ३०॥

सूत उवाच ।
इति शप्तो महेशेन दाधीचिः स सुदर्शनः ।
जडत्वं प्राप्तवान्सद्यः शिवमायाविमोहितः ॥ ३१॥

एतस्मिन्समये विप्रा दधीचिः शैवसत्तमः ।
ग्रामान्तरात्समायातो वृत्तान्तं श्रुतवाँश्च सः ॥ ३२॥

शिवेन भर्त्सितः सोऽपि दुःखितोऽभूदतीव हि ।
रुरोद हा हतोऽस्मीति दुःखेन सुतकर्मणा ॥ ३३॥

पुनःपुनरुवाचेति स दधीचिः सतां मतः ।
अनेनेदं कुपुत्रेण हतं मे कुलमुत्तमम् ॥ ३४॥

स पुत्रोऽपि हतो भार्यां पुंश्चलीमुक्तवान्द्रुतम् ।
पश्चात्तापमनुप्राप्य स्वपित्रा परिभर्त्सितः ॥ ३५॥

तत्पित्रा गिरिजा तत्र पूजिता विधिभिर्वरैः ।
सुयत्नतो महाभक्त्या स्वपुत्रसुखहेतवे ॥ ३६॥

सुदर्शनोऽपि गिरिजां पूजयामास च स्वयम् ।
चण्डीपूजनमार्गेण महाभक्त्या शुभैः स्तवैः ॥ ३७॥

एवं तौ पितृपुत्रौ हि नानोपायैः सुभक्तितः ।
प्रसन्नां चक्रतुर्देवीं गिरिजां भक्तवत्सलाम् ॥ ३८॥

तयोः सेवाप्रभावेण प्रसन्ना चण्डिका तदा ।
सुदर्शनं च पुत्रत्वे चकार गिरिजा मुने ॥ ३९॥

शिवं प्रसादयामास पुत्रार्थे चण्डिका स्वयम् ।
क्रुद्धाक्रुद्धा पुनश्चण्डी तत्पुत्रस्य प्रसन्नधीः ॥ ४०॥

अथाज्ञाय प्रसन्नं तं महेशं वृषभध्वजम् ॥

नमस्कृत्य स्वयं तस्य ह्युत्सङ्गे तं न्यवेशयत् ॥ ४१॥

घृतस्नानं तश्चक्रे पुत्रस्य गिरिजा स्वयम् ।
त्रिरावृत्तोपवीतं च ग्रन्थिनैकेन संयुतम् ॥ ४२॥

सुदर्शनाय पुत्राय ददौ प्रीत्या तदाम्बिका ।

उद्दिश्य शिवगायत्रीं षोडशाक्षरसंयुताम् ॥ ४३॥

तदों नमः शिवायेति श्रीशब्दपूर्वकाय च ।
वारान्षोडश सङ्कल्पपूजां कुर्यादयं बटुः ॥ ४४॥

आस्नानादिप्रणामान्तं पूजयन्वृषभध्वजम् ।
मन्त्रवादित्रपूजाभिः सर्षीणां सन्निधौ तथा ॥ ४५॥

नाममन्त्राननेकांश्च पाठयामास वै तदा ।
उवाच सुप्रसन्नात्मा चण्डिका च शिवस्तथा ॥ ४६॥

मदर्पितं च यत्किञ्चिद्धनधान्यादिकं तथा ।
तत्सर्वं च त्वया ग्राह्यं न दोषाय भविष्यति ॥ ४७॥

मम कृत्ये भवान्मुख्यो देवीकृत्ये विशेषतः ।
घृततैलादिकं सर्वं त्वया ग्राह्यं मदर्पितम् ॥ ४८॥

प्राजापत्यं भवेद्यर्हि तर्ह्येको हि भवान्भवेत् ।
तदा पूजा च सम्पूर्णान्यथा सर्वा च निष्फला ॥ ४९॥

तिलकं वर्तुलं कार्यं स्नानं कार्यं सदा त्वया ।
शिवसन्ध्या च कर्तव्या गायत्री च तदीयका ॥ ५०॥

मत्सेवां प्रथमं कृत्वा कार्यमन्यत्कुलोचितम् ।
एवं कृतेऽखिले भद्रं दोषाः क्षान्ता मया तव ॥ ५१॥

सूत उवाच ।
इत्युक्त्वा तस्य पुत्राश्च चत्वारो बटुकास्तदा ।
अभिषिक्ताश्चतुर्दिक्षु शिवेन परमात्मना ॥ ५२॥

चण्डी चैवात्मनिकटे पुत्रं स्थाप्य सुदर्शनम् ।
तत्पुत्रान्प्रेरयामास वरान्दत्त्वा ह्यनेकशः ॥ ५३॥

देव्युवाच ।
उभयोर्व्यूहयोर्मध्ये बटुको यो भवेन्मम ।
तस्य स्याद्विजयो नित्यं नात्र कार्या विचारणा ॥ ५४॥

भवांश्च पूजितो येन तेनैवाहं प्रपूजिता ।
कर्तव्यं हि भवद्भिश्च स्वीयं कर्म सदा सुत ॥ ५५॥

सूत उवाच ।

एवं तस्मै वरा दत्ताः सपुत्राय महात्मने ।
सुदर्शनाय कृपया शिवाभ्यां जगतां कृते ॥ ५६॥

शिवाभ्यां स्थापिता यस्मात्तस्मात्ते बटुकाः स्मृताः ।
तपोभ्रष्टा यतो जाताः स्मृतास्तस्मात्तपोऽधमाः ॥ ५७॥

शिवयोः कृपया सर्वे विस्तारं बहुधा गताः ।
तेषां च प्रथमा पूजा महापूजा महात्मनः ॥ ५८॥

तेन यावत्कृता नैव पूजा वै शङ्करस्य च ।
तावत्पूजा न कर्त्तव्या कृता चेन्न शुभापि सा ॥ ५९॥

शुभं वाप्यशुभं वापि बटुकं न परित्यजेत् ।
प्राजापत्ये च भोज्ये वै बटुरेको विशिष्यते ॥ ६०॥

शिवयोश्च तथा कार्ये विशेषोऽत्र प्रदृश्यते ।
तदेव शृणु सुप्राज्ञ यथाहं वच्मि तेऽनघ ॥ ६१॥

तस्यैव नगरे राज्ञो भद्रस्य नित्यभोजने ।
प्राजापत्यस्य नियमे ह्यन्धकेशसमीपतः ॥ ६२॥

यज्जातमद्भुतं वृत्तं शिवानुग्रहकारणात् ।
श्रूयतां तच्च सुप्रीत्या कथयामि यथाश्रुतम् ॥ ६३॥

ध्वज एकश्च तद्राज्ञे दत्तस्तुष्टेन शम्भुना ।
प्रोक्तश्च कृपया राजा देवदेवेन तेन सः ॥ ६४॥

प्रातश्च बध्यतां राजन्ध्वजो रात्रौ पतिष्यति ।
मम त्वेवं च सम्पूर्णे प्राजापत्ये तथा पुनः ॥ ६५॥

अन्यथायं ध्वजो मे हि रात्रावपि स्थिरो भवेत् ।
इत्युक्त्वान्तर्हितः शम्भू राज्ञे तुष्टः कृपानिधिः ॥ ६६॥

तथेति नियमश्चासीत्तस्य राज्ञो महामुने ।
प्राजापत्यं कृतं नित्यं शिवपूजाविधानतः ॥ ६७॥

स्वयं प्रातर्विवर्धेत ध्वजः सायं पतेदिति ।
यदि कार्यं च सम्पूर्णं जातं चैव भवेदिह ॥ ६८॥

एकस्मिन्समये चात्र बटोः कार्यं पुरा ह्यभूत् ।
ध्वजः स पतितो वै हि ब्रह्मभोजं विनापि हि ॥ ६९॥

दृष्ट्वा तच्च तदा तत्र पृष्टा राज्ञा च पण्डिताः ।
भुञ्जते ब्राह्मणा ह्यत्र नोत्थितो वै ध्वजस्त्विति ॥ ७० ॥

कथं च पतितः सोऽत्र ब्राह्मणा ब्रूत सत्यतः ।
ते पृष्टाश्च तदा प्रोचुर्ब्राह्मणाः पण्डितोत्तमाः ॥ ७१ ॥

ब्रह्मभोजे महाराज बटुको भोजितः पुरा ।
चण्डीपुत्रः शिवस्तुष्टस्तस्माच्च पतितो ध्वजः ॥ ७२ ॥

तच्छ्रुत्वा नृपतिः सोऽथ जनाश्चान्येऽपि सर्वशः ।
अभवन्विस्मितास्तत्र प्रशंसां चक्रिरे ततः ॥ ७३ ॥

एवं च महिमा तेषां वर्धितः शङ्करेण हि ।
तस्माच्च बटुकाः श्रेष्ठाः पुराविद्भिः प्रकीर्तिताः ॥ ७४ ॥

शिवपूजा तु तैः पूर्वमुत्तार्या नान्यथा पुनः ।
अन्येषां नाधिकारोऽस्ति शिवस्य वचनादिह ॥ ७५ ॥

उत्तारणं च कार्यं वै पूजा पूर्णा भवत्विति ।
एतावदेव तेषां तु कार्यं नान्यत्तथैव च ॥ ७६ ॥

एतत्सर्वं समाख्यातं यत्पृष्टं च मुनीश्वराः ।
यच्छ्रुत्वा शिवपूजायाः फलं प्राप्नोति वै नरः ॥ ७७ ॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां बटुकोत्पत्तिवर्णनं नाम त्रयोदशोऽध्यायः ॥ ४.१३ ॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.१४. चतुर्दशोऽध्यायः । सोमनाथज्योतिर्लिङ्गोत्पत्तिवर्णनम् ।

ऋषय ऊचुः ।
ज्योतिषां चैव लिङ्गानां माहात्म्यं कथयाधुना ।
उत्पत्तिं च तथा तेषां ब्रूहि सर्वं यथाश्रुतम् ॥ १ ॥

सूत उवाच ।
शृण्वन्तु विप्रा वक्ष्यामि तन्माहात्म्यं जनिं तथा ।
सङ्क्षेपतो यथाबुद्धि सद्गुरोश्च मया श्रुतम् ॥ २॥

एतेषां चैव माहात्म्यं वक्तुं वर्षशतैरपि ।
शक्यते न मुनिश्रेष्ठास्तथापि कथयामि वः ॥ ३॥

सोमनाथश्च तेषां वै प्रथमः परिकीर्तितः ।
तन्माहात्म्यं शृणु मुने प्रथमं सावधानतः ॥ ४॥

सप्तविंशन्मिताः कन्या दक्षेण च महात्मना ।
तेन चन्द्रमसे दत्ता अश्विन्याद्या मुनीश्वराः ॥ ५॥

चन्द्रं च स्वामिनं प्राप्य शोभमाना विशेषतः ।
चन्द्रोऽपि चैव ताः प्राप्य शोभते स्म निरन्तरम् ॥ ६॥

हेम्ना चैव मणिर्भाति मणिना हेम चैव हि ।
एवं च समये तस्य यज्जातं श्रूयतामिति ॥ ७॥

सर्वास्वपि च पत्नीषु रोहिणी नाम या स्मृता ।
यथैका सा प्रिया चासीत्तथान्या न कदाचन ॥ ८॥

अन्याश्च दुःखमापन्नाः पितरं शरणं ययुः ।
गत्वा तस्मै च यद्दुःखं तथा ताभिर्निवेदितम् ॥ ९॥

दक्षः स च तथा श्रुत्वा दुःखं च प्राप्तवांस्तदा ।
समागत्य द्विजाश्चन्द्रं शान्त्यावोचद् वचस्तदा ॥ १०॥

दक्ष उवाच ।
विमले च कुले त्वं हि समुत्पन्नः कलानिधे ।
आश्रितेषु च सर्वेषु न्यूनाधिक्यं कथं तव ॥ ११॥

कृतं चेत्तत्कृतं तच्च न कर्तव्यं त्वया पुनः ।
वर्तनं विषमत्वेन नरकप्रदमीरितम् ॥ १२॥

सूत उवाच ।
दक्षश्चैवं च सम्प्रार्थ्य चन्द्रं जामातरं स्वयम् ।
जगाम मन्दिरं स्वं वै निश्चयं परमं गतः ॥ १३॥

चन्द्रोऽपि वचनं तस्य न चकार विमोहितः ।

शिवमायाप्रभावेण यया सम्मोहितं जगत् ॥ १४॥

शुभं भावि यदा यस्य शुभं भवति तस्य वै ।
अशुभं च यदा भावि कथं तस्य शुभं भवेत् ॥ १५॥

चन्द्रोऽपि बलवद्भाविवशान्मेने न तद्वचः ।
रोहिण्यां च समासक्तो नान्यां मेने कदाचन ॥ १६॥

तच्छ्रुत्वा पुनरागत्य स्वयं दुःखसमन्वितः ।
प्रार्थयामास चन्द्रं स दक्षो दक्षः सुनीतितः ॥ १७॥

दक्ष उवाच ।
श्रूयतां चन्द्र यत्पूर्वं प्रार्थितो बहुधा मया ।
न मानितं त्वया यस्मात्तस्मात्त्वं च क्षयी भव ॥ १८॥

सूत उवाच ।
इत्युक्ते तेन चन्द्रो वै क्षयी जातः क्षणादिह ।
हाहाकारो महानासीत्तदेन्दौ क्षीणतां गते ॥ १९॥

देवर्षयस्तदा सर्वे किं कार्यं हा कथं भवेत् ।
इति दुःखं समापन्ना विह्वला ह्यभवन्मुने ॥ २०॥

विज्ञापिताश्च चन्द्रेण सर्वे शक्रादयः सुराः ।
ऋषयश्च वसिष्ठाद्या ब्रह्माणं शरणं ययुः ॥ २१॥

गत्वापि तु तदा प्रोचुस्तद् वृत्तं निखिलं मुने ।
ब्रह्मणे ऋषयो देवा नत्वा नुत्वातिविह्वलाः ॥ २२॥

ब्रह्मापि तद्वचः श्रुत्वा विस्मयं परमं ययौ ।
शिवमायां सुप्रशस्य श्रावयंस्तानुवाच ह ॥ २३॥

ब्रह्मोवाच ।
अहो कष्टं महज्जातं सर्वलोकस्य दुःखदम् ।
चन्द्रस्तु सर्वदा दुष्टो दक्षश्च शप्तवानमुम् ॥ २४॥

सर्वं दुष्टेन चन्द्रेण कृतं कर्माप्यनेकशः ।
श्रूयतामृषयो देवाश्चन्द्रकृत्यं पुरातनम् ॥ २५॥

बृहस्पतेर्गृहं गत्वा तारा दुष्टेन वै हृता ।
तस्य भार्या पुनश्चैव स दैत्यान्समुपस्थितः ॥ २६॥

समाश्रितस्तदा दैत्यान्युद्धं देवैश्चकार ह ।
मयात्रिणा निषिद्धश्च तस्मै तारां ददौ शशी ॥ २७॥

तां च गर्भवतीं दृष्ट्वा न गृह्णामीति सोऽब्रवीत् ।
अस्माभिर्वारितो जीवः कृच्छ्राज्जग्राह तां तदा ॥ २८॥

यदि गर्भं जहातीह गृह्णामीत्यब्रवीत्पुनः ।
गर्भे मया पुनस्तत्र त्याजिते मुनिसत्तमाः ॥ २९॥

कस्यायं च पुनर्गर्भः सोमस्येति च साब्रवीत् ।
पश्चात्तेन गृहीता सा मया च वारितेन वै ॥ ३०॥

एवंविधानि चन्द्रस्य दुश्चरित्राण्यनेकशः ।
वर्ण्यन्ते किं पुनस्तानि सोऽद्यापि कुरुते कथम् ॥ ३१॥

यज्जातं तत् सुसञ्जातं नान्यथा भवति ध्रुवम् ।
अतः परमुपायं वो वक्ष्यामि शृणुतादरात् ॥ ३२॥

प्रभासके शुभे क्षेत्रे व्रजेश्चन्द्रः सदैवतैः ।
शिवमाराधयेत्तत्र मृत्युञ्जयविधानतः ॥ ३३॥

निधायेशं पुरस्तत्र चन्द्रस्तपतु नित्यशः ।
प्रसन्नश्च शिवः पश्चादक्षयं तं करिष्यति ॥ ३४॥

सूत उवाच ।
इति श्रुत्वा वचस्तस्य ब्रह्मणस्ते सुरर्षयः ।
सन्निवृत्याययुः सर्वे यत्र दक्षविधू ततः ॥ ३५॥

गृहीत्वा ते ततश्चन्द्रं दक्षं चाश्वास्य निर्जराः ।
प्रभासे ऋषयश्चक्रुस्तत्र गत्वाखिलाश्च वै ॥ ३६॥

आवाह्य तीर्थवर्याणि सरस्वत्यादिकानि च ।
पार्थिवेन तदा पूजां मृत्युञ्जयविधानतः ॥ ३७॥

ते देवाश्च तदा सर्वे ऋषयो निर्मलाशयाः ।
स्थाप्य चन्द्रं प्रभासे च स्वं स्वं धाम ययुर्मुदा ॥ ३८॥

चन्द्रेण च तपस्तप्तं षण्मासं च निरन्तरम् ।
मृत्युञ्जयेन मन्त्रेण पूजितो वृषभध्वजः ॥ ३९॥

दशकोटिमितं मन्त्रं समावृत्य शशी च तम् ।

ध्यात्वा मृत्युञ्जयं मन्त्रं तस्थौ निश्चलमानसः ॥ ४०॥

तं दृष्ट्वा शङ्करो देवः प्रसन्नोऽभूत्ततः प्रभुः ।
आविर्भूय विधुं प्राह स्वभक्तं भक्तवत्सलः ॥ ४१॥

शङ्कर उवाच ।
वरं वृणीष्व भद्रं ते मनसा यत्समीप्सितम् ।
प्रसन्नोऽहं शशिन्सर्वं दास्ये वरमनुत्तमम् ॥ ४२॥

चन्द्र उवाच ।
यदि प्रसन्नो देवेश किमसाध्यं भवेन्मम ।
तथापि मे शरीरस्य क्षयं वारय शङ्कर ॥ ४३॥

क्षन्तव्यो मेऽपराधश्च कल्याणं कुरु सर्वदा ।
इत्युक्ते च तदा तेन शिवो वचनमब्रवीत् ॥ ४४॥

शिव उवाच ।
पक्षे च क्षीयतां चन्द्र कला ते च दिने दिने ।
पुनश्च वर्धतां पक्षे सा कला च निरन्तरम् ॥ ४५॥

सूत उवाच ।
एवं सति तदा देवा हर्षनिर्भरमानसाः ।
ऋषयश्च तथा सर्वे समाजग्मुर्द्रुतं द्विजाः ॥ ४६॥

आगत्य च तदा सर्वे चन्द्रायाशिषमब्रुवन् ।
शिवं नत्वा करौ बद्ध्वा प्रार्थयामासुरादरात् ॥ ४७॥

देवाः ऊचुः ।
देवदेव महादेव परमेश नमोऽस्तु ते ।
उमया सहितः शम्भो स्वामिन्नत्र स्थिरो भव ॥ ४८॥

सूत उवाच ।
ततश्चन्द्रेण सद्भक्त्या संस्तुतः शङ्करः पुरा ।
निराकारश्च साकारः पुनश्चैवाभवत्प्रभुः ॥ ४९॥

प्रसन्नश्च स देवानां क्षेत्रमाहात्म्यहेतवे ।
चन्द्रस्य यशसे तत्र नाम्ना चन्द्रस्य शङ्करः ॥ ५०॥

सोमेश्वरश्च नाम्नासीद्विख्यातो भुवनत्रये ।

क्षयकुष्ठादिरोगाणां नाशकः पूजनाद् द्विजाः ॥ ५१॥

धन्योऽयं कृतकृत्योऽयं यन्नाम्ना शङ्करः स्वयम् ।
स्थितश्च जगतां नाथः पावयञ्जगतीतलम् ॥ ५२॥

तत्कुण्डं तैश्च तत्रैव सर्वैर्देवैः प्रतिष्ठितम् ।
शिवेन ब्रह्मणा तत्र ह्यविभक्तं तु तत्पुनः ॥ ५३॥

चन्द्रकुण्डं प्रसिद्धं च पृथिव्यां पापनाशनम् ।
तत्र स्नाति नरो यः स सर्वैः पापैः प्रमुच्यते ॥ ५४॥

रोगाः सर्वे क्षयाद्याश्च ह्यसाध्या ये भवन्ति वै ।
ते सर्वे च क्षयं यान्ति षण्मासं स्नानमात्रतः ॥ ५५॥

प्रभासं च परिक्रम्य पृथिवीक्रमसम्भवम् ।
फलं प्राप्नोति शुद्धात्मा मृतः स्वर्गे महीयते ॥ ५६॥

सोमलिङ्गं नरो दृष्ट्वा सर्वपापात्प्रमुच्यते ।
लब्ध्वा फलं मनोऽभीष्टं मृतः स्वर्गं समीहते ॥ ५७॥

यद्यत्फलं समुद्दिश्य कुरुते तीर्थमुत्तमम् ।
तत्तत्फलमवाप्नोति सर्वथा नात्र संशयः ॥ ५८॥

इति ते ऋषयो देवाः फलं दृष्ट्वा तथाविधम् ।
मुदा शिवं नमस्कृत्य गृहीत्वा चन्द्रमक्षयम् ॥ ५९॥

परिक्रम्य च तत्तीर्थं प्रशंसन्तश्च ते ययुः ।
चन्द्रश्चापि स्वकीयं च कार्यं चक्रे पुरातनम् ॥ ६०॥

इति सर्वः समाख्यातः सोमेशस्य समुद्भवः ।
एवं सोमेश्वरं लिङ्गं समुत्पन्नं मुनीश्वराः ॥ ६१॥

यः शृणोति तदुत्पत्तिं श्रावयेद्वा परान्नरः ।
सर्वान्कामानवाप्नोति सर्वपापैः प्रमुच्यते ॥ ६२॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां सोमनाथज्योतिर्लिङ्गोत्पत्तिवर्णनं नाम चतुर्दशोऽध्यायः ॥ ४.१४॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥

चतुर्थी कोटिरुद्रसंहिता

## ४.१५. पञ्चदशोऽध्यायः । मल्लिकार्जुननामकद्वितीयज्योतिर्लिङ्गवर्णनम् ।

सूत उवाच ।
अतः परं प्रवक्ष्यामि मल्लिकार्जुनसम्भवम् ।
यं श्रुत्वा भक्तिमान्धीमान्सर्वपापैः प्रमुच्यते ॥ १॥

पूर्वं च कथितं यच्च तत्पुनः कथयाम्यहम् ।
कुमारचरितं दिव्यं सर्वपापविनाशनम् ॥ २॥

यदा पृथ्वीं समाक्रम्य कैलासं पुनरागतः ।
कुमारः स शिवापुत्रस्तारकारिर्महाबलः ॥ ३॥

तदा सुरर्षिरागत्य सर्वं वृत्तं जगाद ह ।
गणेश्वरविवाहादि भ्रामयंस्तं स्वबुद्धितः ॥ ४॥

तच्छ्रुत्वा स कुमारो हि प्रणम्य पितरौ च तौ ।
जगाम पर्वतं क्रौञ्चं पितृभ्यां वारितोऽपि हि ॥ ५॥

कुमारस्य वियोगेन तन्माता गिरिजा यदा ।
दुःखितासीत्तदा शम्भुस्तामुवाच सुबोधकृत् ॥ ६॥

कथं प्रिये दुःखितासि न दुःखं कुरु पार्वति ।
आयास्यति सुतः सुभ्रूस्त्यज्यतां दुःखमुत्कटम् ॥ ७॥

सा यदा च न तं मेने पार्वती दुःखिता भृशम् ।
तदा च प्रेषितास्तत्र शङ्करेण सुरर्षयः ॥ ८॥

देवाश्च ऋषयः सर्वे सगणा हि मुदान्विताः ।
कुमारानयनार्थं वै तत्र जग्मुः सुबुद्धयः ॥ ९॥

तत्र गत्वा च ते सर्वे कुमारं सुप्रणम्य च ।
विज्ञाप्य बहुधाप्येनं प्रार्थनां चक्रुरादरात् ॥ १०॥

देवादिप्रार्थनां तां च शिवाज्ञासङ्कुलां गुरुः ।
न मेने स कुमारो हि महाहङ्कारविह्वलः ॥ ११॥

ततश्च पुनरावृत्य सर्वे ते हि शिवान्तिकम् ।
स्वं स्वं स्थानं गता नत्वा प्राप्य शङ्करशासनम् ॥ १२॥

तदा च गिरिजा देवी विरहं पुत्रसम्भवम् ।
शम्भुश्च परमं दुःखं प्राप तस्मिन्ननागते ॥ १३॥

अथो सुदुःखितौ दीनौ लोकाचारकरौ तदा ।
जग्मतुस्तत्र सुस्नेहात्स्वपुत्रो यत्र संस्थितः ॥ १४॥

स पुत्रश्च कुमाराख्यः पित्रोरागमनं गिरेः ।
ज्ञात्वा दूरं गतोऽस्नेहाद्योजनत्रयमेव च ॥ १५॥

क्रौञ्चे च पर्वते दूरं गते तस्मिन्स्वपुत्रके ।
तौ च तत्र समासीनौ ज्योतीरूपं समाश्रितौ ॥ १६॥

पुत्रस्नेहातुरौ तौ वै शिवौ पर्वणि पर्वणि ।
दर्शनार्थं कुमारस्य स्वपुत्रस्य हि गच्छतः ॥ १७॥

अमावास्यादिने शम्भुः स्वयं गच्छति तत्र ह ।
पौर्णमासीदिने तत्र पार्वती गच्छति ध्रुवम् ॥ १८॥

तद्दिनं हि समारभ्य मल्लिकार्जुनसम्भवम् ।
लिङ्गं चैव शिवस्यैकं प्रसिद्धं भुवनत्रये ॥ १९॥

तल्लिङ्गं यः समीक्षेत स सर्वैः किल्बिषैरपि ।
मुच्यते नात्र सन्देहः सर्वान्कामानवाप्नुयात् ॥ २०॥

दुःखं च दूरतो याति सुखमात्यन्तिकं लभेत् ।
जननीगर्भसम्भूतं कष्टं नाप्नोति वै पुनः ॥ २१॥

धनधान्यसमृद्धिश्च प्रतिष्ठारोग्यमेव च ।
अभीष्टफलसिद्धिश्च जायते नात्र संशयः ॥ २२॥

ज्योतिर्लिङ्गं द्वितीयं च प्रोक्तं मल्लिकसंज्ञितम् ।
दर्शनात्सर्वसुखदं कथितं लोकहेतवे ॥ २३॥

इति श्रीशिवपुराणे चतुर्थ्यां कोटिरुद्रसंहितायां मल्लिकार्जुननामकद्वितीयज्योतिर्लिङ्गवर्णनं नाम पञ्चदशोऽध्यायः ॥ ४.१५॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.१६. षोडशोऽध्यायः । महाकालज्योतिर्लिङ्गमाहात्म्यवर्णनम् १ ।

ऋषय ऊचुः ।
सूत सर्वं विजानासि वस्तु व्यासप्रसादतः ।
ज्योतिषां च कथां श्रुत्वा तृप्तिर्नैव प्रजायते ॥ १॥

तस्मात्त्वं हि विशेषेण कृपां कृत्वातुलां प्रभो ।
ज्योतिर्लिङ्गं तृतीयं च कथय त्वं हि नोऽधुना ॥ २॥

सूत उवाच ।
धन्योऽहं कृतकृत्योऽहं श्रीमतां भवतां यदि ।
गतश्च सङ्गमं विप्रा धन्या वै साधुसङ्गतिः ॥ ३॥

अतो मत्वा स्वभाग्यं हि कथयिष्यामि पावनीम् ।
पापप्रणाशिनीं दिव्यां कथां च शृणुतादरात् ॥ ४॥

अवन्ती नगरी रम्या मुक्तिदा सर्वदेहिनाम् ।
शिवप्रिया महापुण्या वर्तते लोकपावनी ॥ ५॥

तत्रासीद् ब्राह्मणश्रेष्ठः शुभकर्मपरायणः ।
वेदाध्ययनकर्ता च वेदकर्मरतः सदा ॥ ६॥

अग्न्याधानसमायुक्तः शिवपूजारतः सदा ।
पार्थिवीं प्रत्यहं मूर्तिं पूजयामास वै द्विजः ॥ ७॥

सर्वकर्मफलं प्राप्य द्विजो वेदप्रियः सदा ।
सतां गतिं समालेभे सम्यज्ज्ञानपरायणः ॥ ८॥

तत्पुत्रास्तादृशाश्चासंश्चत्वारो मुनिसत्तमाः ।
शिवपूजारता नित्यं पित्रोरनवमाः सदा ॥ ९॥

देवप्रियश्च तज्ज्येष्ठः प्रियमेधास्ततः परम् ।
तृतीयः सुकृतो नाम धर्मवाही च सुव्रतः ॥ १०॥

तेषां पुण्यप्रतापाच्च पृथिव्यां सुखमैधत ।
शुक्लपक्षे यथा चन्द्रो वर्धते च निरन्तरम् ॥ ११॥

तथा तेषां गुणास्तत्र वर्धन्ते स्म सुखावहाः ।
ब्रह्मतेजोमयी सा वै नगरी चाभवत्तदा ॥ १२॥

एतस्मिन्नन्तरे तत्र यज्जातं वृत्तमुत्तमम् ।
श्रूयतां तद् द्विजश्रेष्ठाः कथयामि यथाश्रुतम् ॥ १३॥

पर्वते रत्नमाले च दूषणाख्यो महासुरः ।
बलवान्दैत्यराजश्च धर्मद्वेषी निरन्तरम् ॥ १४॥

ब्रह्मणो वरदानाच्च जगत्तुच्छीचकार ह ।
देवाः पराजितास्तेन स्थानान्निःसारितास्तथा ॥ १५॥

पृथिव्यां वेदधर्मांश्च स्मृतिधर्मांश्च सर्वशः ।
स्फोटितास्तेन दुष्टेन सिंहेनेव शशाः खलु ॥ १६॥

यावन्तो वेदधर्माश्च तावन्तो दूरतः कृताः ।
तीर्थे तीर्थे तथा क्षेत्रे धर्मो नीतश्च दूरतः ॥ १७॥

अवन्ती नगरी रम्या तत्रैका दृश्यते पुनः ।
इत्थं विचार्य तेनैव यत्कृतं श्रूयतां हि तत् ॥ १८॥

बहुसैन्यसमायुक्तो दूषणः स महासुरः ।
तत्रस्थान्ब्राह्मणान्सर्वानुद्दिश्य समुपाययौ ॥ १९॥

तत्रागत्य स दैत्येन्द्रश्चतुरो दैत्यसत्तमान् ।
प्रोवाचाहूय वचनं विप्रद्रोही महाखलः ॥ २०॥

दैत्य उवाच ।
किमेते ब्राह्मणा दुष्टा न कुर्वन्ति वचो मम ।
वेदधर्मरता एते सर्वे दण्ड्या मते मम ॥ २१॥

सर्वे देवा मया लोके राजानश्च पराजिताः ।
वशे किं ब्राह्मणाः शक्या न कर्तुं दैत्यसत्तमाः ॥ २२॥

यदि जीवितुमिच्छा स्यात्तदा धर्मं शिवस्य च ।
वेदानां परमं धर्मं त्यक्त्वा सुखसुभागिनः ॥ २३॥

अन्यथा जीवने तेषां संशयश्च भविष्यति ।
इति सत्यं मया प्रोक्तं तत्कुरुध्वं विशङ्किताः ॥ २४॥

सूत उवाच ।
इति निश्चित्य ते दैत्याश्चत्वारः पावका इव ।
चतुर्दिक्षु तदा जाताः प्रलये च यथा पुरा ॥ २५॥

ते ब्राह्मणास्तदा श्रुत्वा दैत्यानामुद्यमं तदा ।
न दुःखं लेभिरे तत्र शिवध्यानपरायणाः ॥ २६॥

धैर्यं समाश्रितास्ते च रेखामात्रं तदा द्विजाः ।
न चेलुः परमध्यानाद्वराकाः के शिवाग्रतः ॥ २७॥

एतस्मिन्नन्तरे तैस्तु व्याप्तासीन्नगरी शुभा ।
लोकाश्च पीडितास्तैस्तु ब्राह्मणान्समुपाययुः ॥ २८॥

लोका ऊचुः ।
स्वामिनः किं च कर्तव्यं दुष्टाश्च समुपागताः ।
हिंसिता बहवो लोका आगताश्च समीपतः ॥ २९॥

सूत उवाच ।
तेषामिति वचः श्रुत्वा वेदप्रियसुताश्च ते ।
समूचुर्ब्राह्मणाँस्तान्वै विश्वस्ताः शङ्करे सदा ॥ ३०॥

ब्राह्मणा ऊचुः ।
श्रूयतां विद्यते नैव बलं दुष्टभयावहम् ।
न शस्त्राणि तथा सन्ति यच्च ते विमुखाः पुनः ॥ ३१॥

सामान्यस्यापमानो नो ह्याश्रयस्य भवेदिह ।
पुनश्च किं समर्थस्य शिवस्येह भविष्यति ॥ ३२॥

शिवो रक्षां करोत्वद्यासुराणां भयतः प्रभुः ।
नान्यथा शरणं लोके भक्तवत्सलतः शिवात् ॥ ३३॥

सूत उवाच ।
इति धैर्यं समास्थाय समर्चां पार्थिवस्य च ।
कृत्वा ते च द्विजाः सम्यक् स्थिता ध्यानपरायणाः ।
दृष्टा दैत्येन तावच्च ते विप्राः सबलेन हि ॥ ३४॥

दूषणेन वचः प्रोक्तं हन्यतां वध्यतामिति ।
तच्छ्रुतं तैस्तदा नैव दैत्यप्रोक्तं वचो द्विजैः ।
वेदप्रियसुतैः शम्भोर्ध्यानमार्गपरायणैः ॥ ३५॥

अथ यावत्स दुष्टात्मा हन्तुमैच्छद् द्विजांश्च तान् ।
तावच्च प्रार्थिवस्थाने गर्त आसीत्सशब्दकः ॥ ३६॥

गर्तात्ततः समुत्पन्नः शिवो विकटरूपधृक् ।
महाकाल इति ख्यातो दुष्टहन्ता सतां गतिः ॥ ३७॥

महाकालः समुत्पन्नो दुष्टानां त्वादृशामहम् ।
खल त्वं ब्राह्मणानां हि समीपाद् दूरतो व्रज ॥ ३८॥

इत्युक्त्वा हुङ्कृतेनैव भस्मसात्कृतवांस्तदा ।
दूषणं च महाकालः शङ्करः सबलं द्रुतम् ॥ ३९॥

कियत्सैन्यं हतं तेन किञ्चित्सैन्यं पलायितम् ।
दूषणश्च हतस्तेन शिवेनेह परात्मना ॥ ४०॥

सूर्यं दृष्ट्वा यथा याति सङ्क्षयं सर्वशस्तमः ।
तथैव च शिवं दृष्ट्वा तत्सैन्यं विननाश ह ॥ ४१॥

देवदुन्दुभयो नेदुः पुष्पवृष्टिः पपात ह ।
देवः समाययुः सर्वे हरिब्रह्मादयस्तथा ॥ ४२॥

भक्त्या प्रणम्य तं देवं शङ्करं लोकशङ्करम् ।
तुष्टुवुर्विविधैः स्तोत्रैः कृताञ्जलिपुटा द्विजाः ॥ ४३॥

ब्राह्मणांश्च समाश्वास्य सुप्रसन्नः शिवः स्वयम् ।
वरं ब्रूतेति चोवाच महाकालो महेश्वरः ॥ ४४॥

तच्छ्रुत्वा ते द्विजाः सर्वे कृताञ्जलिपुटास्तदा ।
सुप्रणम्य शिवं भक्त्या प्रोचुः सन्नतमस्तकाः ॥ ४५॥

द्विजा ऊचुः ।
महाकाल महादेव दुष्टदण्डकर प्रभो ।
मुक्तिं प्रयच्छ नः शम्भो संसाराम्बुधितः शिव ॥ ४६॥

अत्रैव लोकरक्षार्थं स्थातव्यं हि त्वया शिव ।
स्वदर्शकान्नरान् शम्भो तारय त्वं सदा प्रभो ॥ ४७॥

सूत उवाच ।
इत्युक्तस्तैः शिवस्तत्र तस्थौ गर्ते सुशोभने ।
भक्तानां चैव रक्षार्थं दत्त्वा तेभ्यश्च सद्गतिम् ॥ ४८॥

द्विजास्ते मुक्तिमापन्नाश्चतुर्दिक्षु शिवास्पदम् ।
क्रोशमात्रं तदा जातं लिङ्गरूपिण एव च ॥ ४९॥

महाकालेश्वरो नाम शिवः ख्यातश्च भूतले ।
तं दृष्ट्वा न भवेत्स्वप्ने किञ्चिद्दुःखमपि द्विजाः ॥ ५०॥

यं यं काममपेक्ष्यैव तल्लिङ्गं भजते तु यः ।
तं तं काममवाप्नोति लभेन्मोक्षं परत्र च ॥ ५१॥

एतत्सर्वं समाख्यातं महाकालस्य सुव्रताः ।
समुद्भवश्च माहात्म्यं किमन्यच्छ्रोतुमिच्छथ ॥ ५२॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां महाकालज्योतिर्लिङ्गमाहात्म्यवर्णनं नाम षोडशोऽध्यायः ॥ ४.१६॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.१७. सप्तदशोऽध्यायः । महाकालज्योतिर्लिङ्गमाहात्म्यवर्णनम् २ ।

ऋषय ऊचुः ।
महाकालसमाह्वस्थज्योतिर्लिङ्गस्य रक्षिणः ।
भक्तानां महिमानं च पुनर्ब्रूहि महामते ॥ १॥

सूत उवाच ।
शृणुतादरतो विप्रा भक्तरक्षाविधायिनः ।
महाकालस्य लिङ्गस्य माहात्म्यं भक्तिवर्धनम् ॥ २॥

उज्जयिन्यामभूद्राजा चन्द्रसेनाह्वयो महान् ।
सर्वशास्त्रार्थतत्त्वज्ञः शिवभक्तो जितेन्द्रियः ॥ ३॥

तस्याभवत्सखा राज्ञो मणिभद्रो गणो द्विजाः ।
गिरीशगणमुख्यश्च सर्वलोकनमस्कृतः ॥ ४॥

एकदा स गणेन्द्रो हि प्रसन्नास्यो महामणिम् ।
मणिभद्रो ददौ तस्मै चिन्तामणिमुदारधीः ॥ ५॥

स वै मणिः कौस्तुभवद् द्योतमानोऽर्कसन्निभः ।
ध्यातो दृष्टः श्रुतो वापि मङ्गलं यच्छति ध्रुवम् ॥ ६॥

तस्य कान्तितलस्पृष्टं कांस्यं ताम्रमयस्त्रपु ।
पाषाणादिकमन्यद्वा द्रुतं भवति हाटकम् ॥ ७॥

स तु चिन्तामणिं कण्ठे बिभ्रद् राजा शिवाश्रयः ।
चन्द्रसेनो रराजाति देवमध्येव भानुमान् ॥ ८॥

श्रुत्वा चिन्तामणिग्रीवं चन्द्रसेनं नृपोत्तमम् ।
निखिलाः क्षितिराजानस्तृष्णाक्षुब्धहृदोऽभवन् ॥ ९॥

नृपा मत्सरिणः सर्वे तं मणिं चन्द्रसेनतः ।
नानोपायैरयाचन्त देवलब्धमबुद्धयः ॥ १०॥

सर्वेषां भूभृतां याञ्चा चन्द्रसेनेन तेन वै ।
व्यर्थीकृता महाकालदृढभक्तेन भूसुराः ॥ ११॥

ते कदर्थीकृताः सर्वे चन्द्रसेनेन भूभृता ।
राजानः सर्वदेशानां संरम्भं चक्रिरे तदा ॥ १२॥

अथ ते सर्वराजानश्चतुरङ्गबलान्विताः ।
चन्द्रसेनं रणे जेतुं सम्बभूवुः किलोद्यताः ॥ १३॥

ते तु सर्वे समेता वै कृतसङ्केतसंविदः ।
उज्जयिन्याश्चतुर्द्वारं रुरुधुर्बहुसैनिकाः ॥ १४॥

संरुध्यमानां स्वपुरीं दृष्ट्वा निखिलराजभिः ।
तमेव शरणं राजा महाकालेश्वरं ययौ ॥ १५॥

निर्विकल्पो निराहारः स नृपो दृढनिश्चयः ।
समानर्च महाकालं दिवानक्तमनन्यधीः ॥ १६॥

ततः स भगवाञ्छम्भुर्महाकालः प्रसन्नधीः ।
तं रक्षितुमुपायं वै चक्रे तं शृणुतादरात् ॥ १७॥

तदैव समये गोपी काचित्तत्र पुरोत्तमे ।
चरन्ती सशिशुर्विप्रा महाकालान्तिकं ययौ ॥ १८॥

पञ्चाब्दवयसं बालं वहन्ती गतभर्तृका ।
राज्ञा कृतां महाकालपूजां सापश्यदादरात् ॥ १९॥

सा दृष्ट्वा सुमहाश्चर्यां शिवपूजां च तत्कृताम् ।
प्रणिपत्य स्वशिविरं पुनरेवाभ्यपद्यत ॥ २०॥

एतत्सर्वमशेषेण स दृष्ट्वा वल्लवीसुतः ।
कुतूहलेन तां कर्तुं शिवपूजां मनो दधे ॥ २१॥

आनीय हृद्यं पाषाणं शून्ये तु शिविरान्तरे ।
अविदूरे स्वशिविराच्छिवलिङ्गं स भक्तितः ॥ २२॥

गन्धालङ्कारवासोभिर्धूपदीपाक्षतादिभिः ।
विधाय कृत्रिमैर्द्रव्यैर्नैवेद्यं चाप्यकल्पयत् ॥ २३॥

भूयो भूयः समभ्यर्च्य पत्रैः पुष्पैर्मनोरमैः ।
नृत्यं च विविधं कृत्वा प्रणनाम पुनः पुनः ॥ २४॥

एतस्मिन्समये पुत्रं शिवासक्तसुचेतसम् ।
प्रणयाद्गोपिका सा तं भोजनाय समाह्वयत् ॥ २५॥

यदाहूतोऽपि बहुश; शिवपूजात्तमानसः ।
बालश्च भोजनं नैच्छत्तदा तत्र ययौ प्रसूः ॥ २६॥

तं विलोक्य शिवस्याग्रे निषण्णं मीलितेक्षणम् ।
चकर्ष पाणिं सङ्गृह्य कोपेन समताडयत् ॥ २७॥

आकृष्टस्ताडितश्चापि नागच्छत् स्वसुतो यदा ।
तां पूजां नाशयामास क्षिप्त्वा लिङ्गं च दूरतः ॥ २८॥

हाहेति दूयमानं तं निर्भर्त्स्य स्वसुतं च सा ।
पुनर्विवेश स्वगृहं गोपी क्रोधसमन्विता ॥ २९॥

मात्रा विनाशितां पूजां दृष्ट्वा देवस्य शूलिनः ।
देवदेवेति चुक्रोश निपपात स बालकः ॥ ३०॥

प्रनष्टसंज्ञः सहसा स बभूव शुचाकुलः ।
लब्धसंज्ञो मुहूर्तेन चक्षुषी उदमीलयत् ॥ ३१॥

तदैव जातं शिविरं महाकालस्य सुन्दरम् ।
ददर्श स शिशुस्तत्र शिवानुग्रहतोऽचिरात् ॥ ३२॥

हिरण्मयबृहद् द्वारं कपाटवरतोरणम् ।
महार्हनीलविमलवज्रवेदीविराजितम् ॥ ३३॥

सन्तप्तहेमकलशैर्विचित्रैर्बहुभिर्युतम् ।

प्रोद्भासितमणिस्तम्भैर्बद्धस्फटिकभूतलैः ॥ ३४॥

तन्मध्ये रत्नलिङ्गं हि शङ्करस्य कृपानिधेः ।
स्वकृतार्चनसंयुक्तमपश्यद्गोपिकासुतः ॥ ३५॥

स दृष्ट्वा सहसोत्थाय शिशुर्विस्मितमानसः ।
सन्निमग्न इवासीद्वै परमानन्दसागरे ॥ ३६॥

ततः स्तुत्वा स गिरिशं भूयो भूयः प्रणम्य च ।
सूर्ये चास्तङ्गते बालो निर्जगाम शिवालयात् ॥ ३७॥

अथापश्यत्स्वशिविरं पुरन्दरपुरोपमम् ।
सद्यो हिरण्मयीभूतं विचित्रं परमोज्ज्वलम् ॥ ३८॥

सोऽन्तर्विवेश भवनं सर्वशोभासमन्वितम् ।
मणिहेमगणाकीर्णं मोदमानो निशामुखे ॥ ३९॥

तत्रापश्यत्स्वजननीं स्वपन्तीं दिव्यलक्षणाम् ।
रत्नालङ्कारदीप्ताङ्गीं साक्षात्सुरवधूमिव ॥ ४०॥

अथो स तनयो विप्राः शिवानुग्रहभाजनम् ।
जवेनोत्थापयामास मातरं सुखविह्वलः ॥ ४१॥

सोत्थिताद्भुतमालक्ष्यापूर्वं सर्वमिवाभवत् ।
महानन्दसुमग्ना हि सस्वजे स्वसुतं च तम् ॥ ४२॥

श्रुत्वा पुत्रमुखात्सर्वं प्रसादं गिरिजापतेः ।
प्रभुं विज्ञापयामास यो भजत्यनिशं शिवम् ॥ ४३॥

स राजा सहसागत्य समाप्तनियमो निशि ।
ददर्श गोपिकासूनोः प्रभावं शिवतोषणम् ॥ ४४॥

दृष्ट्वा महीपतिः सर्वं तत्सामात्यपुरोहितः ।
आसीन्निमग्नो विधृतिः परमानन्दसागरे ॥ ४५॥

प्रेम्णा बाष्पजलं मुञ्चन् चन्द्रसेनो नृपो हि सः ।
शिवनामोच्चरन्प्रीत्या परिरेभे तमर्भकम् ॥ ४६॥

महामहोत्सवस्तत्र प्रबभूवाद्भुतो द्विजाः ।
महेशकीर्तनं चक्रुः सर्वे च सुखविह्वलाः ॥ ४७॥

एवमत्यद्भुताचाराच्छिवमाहात्म्यदर्शनात् ।
पौराणां सम्भ्रमाच्चैव सा रात्रिः क्षणतामगात् ॥ ४८॥

अथ प्रभाते युद्धाय पुरं संरुध्य संस्थिताः ।
राजानश्चारवक्त्रेभ्यः शुश्रुवुश्चरितं च तत् ॥ ४९॥

ते समेताश्च राजानः सर्वे ये ये समागताः ।
परस्परमिति प्रोचुस्तच्छ्रुत्वा चकित अति ॥ ५०॥

राजान ऊचुः ।
अयं राजा चन्द्रसेनः शिवभक्तोऽतिदुर्जयः ।
उज्जयिन्या महाकालपुर्याः पतिरनाकुलः ॥ ५१॥

ईदृशाः शिशवो यस्य पुर्यां सन्ति शिवव्रताः ।
स राजा चन्द्रसेनस्तु महाशङ्करसेवकः ॥ ५२॥

नूनमस्य विरोधेन शिवः क्रोधं करिष्यति ।
तत्क्रोधाद्धि वयं सर्वे भविष्यामो विनष्टकाः ॥ ५३॥

तस्मादनेन राज्ञा वै मिलापः कार्य एव हि ।
एवं सति महेशानः करिष्यति कृपां पराम् ॥ ५४॥

सूत उवाच ।
इति निश्चित्य ते भूपास्त्यक्तवैराः सदाशयाः ।
सर्वे बभूवुः सुप्रीता न्यस्तशस्त्रास्त्रपाणयः ॥ ५५॥

विविशुस्ते पुरीं रम्यां महाकालस्य भूभृतः ।
महाकालं समानर्चुश्चन्द्रसेनानुमोदिताः ॥ ५६॥

ततस्ते गोपवनितागेहं जग्मुर्महीभृतः ।
प्रशंसन्तश्च तद्भाग्यं सर्वे दिव्यमहोदयम् ॥ ५७॥

ते तत्र चन्द्रसेनेन प्रत्युद्गम्याभिपूजिताः ।
महार्हविष्टरगताः प्रत्यनन्दन् सुविस्मिताः ॥ ५८॥

गोपसूनोः प्रसादात्तत्प्रादुर्भूतं शिवालयम् ।
संवीक्ष्य शिवलिङ्गं च शिवे चक्रुः परां मतिम् ॥ ५९॥

ततस्ते गोपशिशवे प्रीता निखिलभूभुजः ।
ददुर्बहूनि वस्तूनि तस्मै शिवकृपार्थिनः ॥ ६०॥

ये ये सर्वेषु देशेषु गोपास्तिष्ठन्ति भूरिशः ।
तेषां तमेव राजानं चक्रिरे सर्वपार्थिवाः ॥ ६१॥

अथास्मिन्नन्तरे सर्वैस्त्रिदशैरभिपूजितः ।
प्रादुर्बभूव तेजस्वी हनूमान् वानरेश्वरः ॥ ६२॥

ते तस्याभिगमादेव राजानो जातसम्भ्रमाः ।
प्रत्युत्थाय नमश्चक्रुर्भक्तिनम्रात्ममूर्तयः ॥ ६३॥

तेषां मध्ये समासीनः पूजितः प्लवगेश्वरः ।
गोपात्मजं तमालिङ्ग्य राज्ञो वीक्ष्येदमब्रवीत् ॥ ६४॥

हनूमानुवाच ।
सर्वे शृण्वन्तु भद्रं वो राजानो ये च देहिनः ।
ऋते शिवं नान्यतमो गतिरस्ति शरीरिणाम् ॥ ६५॥

एवं गोपसुतो दिष्ट्या शिवपूजां विलोक्य च ।
अमन्त्रेणापि सम्पूज्य शिवं शिवमवाप्तवान् ॥ ६६॥

एष भक्तवरः शम्भोर्गोपानां कीर्तिवर्धनः ।
इह भुक्त्वाखिलान्भोगानन्ते मोक्षमवाप्स्यति ॥ ६७॥

अस्य वंशेऽष्टमो भावी नन्दो नाम महायशाः ।
प्राप्स्यते तस्य पुत्रत्वं कृष्णो नारायणः स्वयम् ॥ ६८॥

अद्यप्रभृति लोकेऽस्मिन्नेष गोपकुमारकः ।
नाम्ना श्रीकर इत्युच्चैर्लोकख्यातिं गमिष्यति ॥ ६९॥

सूत उवाच ।
एवमुक्त्वाञ्जनीसूनुः शिवरूपो हरीश्वरः ।
सर्वान् राज्ञश्चन्द्रसेनं कृपादृष्ट्या ददर्श ह ॥ ७०॥

अथ तस्मै श्रीकराय गोपपुत्राय धीमते ।
उपादिदेश सुप्रीत्या शिवाचारं शिवप्रियम् ॥ ७१॥

हनूमानथ सुप्रीतः सर्वेषां पश्यतां द्विजाः ।
चन्द्रसेनं श्रीकरं च तत्रैवान्तरधीयत ॥ ७२॥

तं सर्वे च महीपालाः संहृष्टाः प्रतिपूजिताः ।
चन्द्रसेनं समामन्त्र्य प्रतिजग्मुर्यथागतम् ॥ ७३॥

श्रीकरोऽपि महातेजा उपदिष्टो हनूमता ।
ब्राह्मणैः सह धर्मज्ञैश्चक्रे शम्भोः समर्हणम् ॥ ७४॥

चन्द्रसेनो महाराजः श्रीकरो गोपबालकः ।
उभावपि परप्रीत्या महाकालं च भेजतुः ॥ ७५॥

कालेन श्रीकरः सोऽपि चन्द्रसेनश्च भूपतिः ।
समाराध्य महाकालं भेजतुः परमं पदम् ॥ ७६॥

एवंविधो महाकालः शिवलिङ्गः सतां गतिः ।
सर्वथा दुष्टहन्ता च शङ्करो भक्तवत्सलः ॥ ७७॥

इदं पवित्रं परमं रहस्यं सर्वसौख्यदम् ।
आख्यानं कथितं स्वर्ग्यं शिवभक्तिविवर्धनम् ॥ ७८॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां महाकालज्योतिर्लिङ्गमाहात्म्यवर्णनं नाम सप्तदशोऽध्यायः ॥ ४.१७॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.१८. अष्टादशोऽध्यायः । ओङ्कारेश्वरज्योतिर्लिङ्गमाहात्म्यवर्णनम् ।

ऋषय ऊचुः ।
सूत सूत महाभाग श्राविता ह्यद्भुता कथा ।
महाकालाख्यलिङ्गस्य निजभक्तसुरक्षिणः ॥ १॥

ज्योतिर्लिङ्गं चतुर्थं च कृपया वद वित्तम ।
ओङ्कारे परमेशस्य सर्वपातकहारिणः ॥ २॥

सूत उवाच ।
ओङ्कारे परमेशाख्यं लिङ्गमासीद्यथा द्विजाः ।
तथा वक्ष्यामि वः प्रीत्या श्रूयतां परमर्षयः ॥ ३॥

कस्मिंश्चित्समये चात्र नारदो भगवान्मुनिः ।
गोकर्णाख्यं शिवं गत्वा सिषेवे परभक्तिमान् ॥ ४॥

ततः स आगतो विन्ध्यं नगेशं मुनिसत्तमः ।
तत्रैव पूजितस्तेन बहुमानपुरःसरम् ॥ ५॥

मयि सर्वं विद्यते च न न्यूनं हि कदाचन ।
इति भावं समास्थाय संस्थितो नारदाग्रतः ॥ ६॥

तन्मानं तत्तदा श्रुत्वा नारदो मानहा ततः ।
निःश्वस्य संस्थितस्तत्र श्रुत्वा विन्ध्योऽब्रवीदिदम् ॥ ७॥

विन्ध्य उवाच ।
किं न्यूनं च त्वया दृष्टं मयि निः श्वासकारणम् ।
तच्छ्रुत्वा नारदो वाक्यमब्रवीत्स महामुनिः ॥ ८॥

नारद उवाच ।
विद्यते त्वयि सर्वं हि मेरुरुच्चतरः पुनः ।
देवेष्वपि विभागोऽस्य न तवास्ति कदाचन ॥ ९॥

सूत उवाच ।
इत्युक्त्वा नारदस्तस्माज्जगाम च यथागतम् ।
विन्ध्यश्च परितप्तो वै धिग्वै मे जीवितादिकम् ॥ १०॥

विश्वेश्वरं तथा शम्भुमाराध्य च तपाम्यहम् ।
इति निश्चित्य मनसा शङ्करं शरणं गतः ॥ ११॥

जगाम तत्र सुप्रीत्या ह्योङ्कारो यत्र वै स्वयम् ।
चकार च पुनस्तत्र शिवमूर्तिं च पार्थिवीम् ॥ १२॥

आराध्य च तदा शम्भुं षण्मासं स निरन्तरम् ।
न चचाल तपःस्थानाच्छिवध्यानपरायणः ॥ १३॥

एवं विन्ध्यतपो दृष्ट्वा प्रसन्नः पार्वतीपतिः ।
स्वरूपं दर्शयामास दुर्लभं योगिनामपि ॥ १४॥

प्रसन्नः स तदोवाच ब्रूहि त्वं मनसेप्सितम् ।
तपसा ते प्रसन्नोऽस्मि भक्तानामीप्सितप्रदः ॥ १५॥

विन्ध्य उवाच ।
यदि प्रसन्नो देवेश बुद्धिं देहि यथेप्सिताम् ।
स्वकार्यसाधिनीं शम्भो त्वं सदा भक्तवत्सलः ॥ १६॥

सूत उवाच ।
तच्छ्रुत्वा भगवान् शम्भुश्चिचेत हृदये चिरम् ।
परोपतापदं विन्ध्यो वरमिच्छति मूढधीः ॥ १७॥

किं करोमि यदेतस्मै वरदानं भवेच्छुभम् ।
मद्दत्तं परदुःखाय वरदानं यथा न हि ॥ १८॥

सूत उवाच ।
तथापि दत्तवान् शम्भुस्तस्मै तद्वरमुत्तमम् ।
विन्ध्य पर्वतराज त्वं यथेच्छसि तथा कुरु ॥ १९॥

एवं च समये देवा ऋषयश्चामलाशयाः ।
सम्पूज्य शङ्करं तत्र स्थातव्यमिति चाब्रुवन् ॥ २०॥

तच्छ्रुत्वा देववचनं प्रसन्नः परमेश्वरः ।
तथैव कृतवान्प्रीत्या लोकानां सुखहेतवे ॥ २१॥

ओङ्कारं चैव यल्लिङ्गमेकं तच्च द्विधा गतम् ।
प्रणवे चैव ओङ्कारनामासीत्स सदाशिवः ॥ २२॥

पार्थिवे चैव यज्जातं तदासीत्परमेश्वरः ।
भक्ताभीष्टप्रदौ चोभौ भुक्तिमुक्तिप्रदौ द्विजाः ॥ २३॥

तत्पूजां च तदा चक्रुर्देवाश्च ऋषयस्तथा ।
प्रापुर्वराननेकांश्च सन्तोष्य वृषभध्वजम् ॥ २४॥

स्वस्वस्थानं ययुर्देवा विन्ध्योऽपि मुदितोऽधिकम् ।
कार्यं साधितवान्स्वीयं परितापं जहौ द्विजाः ॥ २५॥

य एवं पूजयेच्छम्भुं मातृगर्भं वसेन्न हि ।
यदभीष्टं फलं तच्च प्राप्नुयान्नात्र संशयः ॥ २६॥

सूत उवाच ।
एतत्ते सर्वमाख्यातमोङ्कारप्रभवे फलम् ।
अतः परं प्रवक्ष्यामि केदारं लिङ्गमुत्तमम् ॥ २७॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायामोङ्कारेश्वरज्योतिर्लिङ्गमाहात्म्यवर्णनं नामाष्टादशोऽध्यायः ॥ ४.१८॥

॥ श्रीगणेशाय नमः ॥

॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.१९. एकोनविंशोऽध्यायः । केदारेश्वरज्योतिर्लिङ्गमाहात्म्यवर्णनम् ।

सूत उवाच ।
नरनारायणाख्यौ यावतारौ हरेर्द्विजाः ।
तेपाते भारते खण्डे बदर्याश्रम एव हि ॥ १॥

ताभ्यां सम्प्रार्थितः शम्भुः पार्थिवे पूजनाय वै ।
आयाति नित्यं तल्लिङ्गे भक्ताधीनतया शिवः ॥ २॥

एवं पूजयतोः शम्भुं तयोर्विष्ण्ववतारयोः ।
चिरकालो व्यतीयाय शैवयोर्धर्मपुत्रयोः ॥ ३॥

एकस्मिन्समये तत्र प्रसन्नः परमेश्वरः ।
प्रत्युवाच प्रसन्नोऽस्मि वरो मे व्रियतामिति ॥ ४॥

इत्युक्ते च तदा तेन नरो नारायणः स्वयम् ।
ऊचतुर्वचनं तत्र लोकानां हितकाम्यया ॥ ५॥

नरनारायणावूचतुः ।
यदि प्रसन्नो देवेश यदि देयो वरस्त्वया ।
स्थीयतां स्वेन रूपेण पूजार्थं शङ्कर स्वयम् ॥ ६॥

सूत उवाच ।
इत्युक्तस्तु तदा ताभ्यां केदारे हिमसंश्रये ।
स्वयं च शङ्करस्तस्थौ ज्योतीरूपो महेश्वरः ॥ ७॥

ताभ्यां च पूजितश्चैव सर्वदुःखभयापहः ।
लोकानामुपकारार्थं भक्तानां दर्शनाय वै ॥ ८॥

स्वयं स्थितस्तदा शम्भुः केदारेश्वरसंज्ञकः ।
भक्ताभीष्टप्रदो नित्यं दर्शनादर्चनादपि ॥ ९॥

देवाश्च पूजयन्तीह ऋषयश्च पुरातनाः ।
मनोऽभीष्टफलं ते ते सुप्रसन्नान्महेश्वरात् ॥ १०॥

भवस्य पूजनान्नित्यं बदर्याश्रमवासिनः ।
प्राप्नुवन्ति यतः सो हि भक्ताभीष्टप्रदः सदा ॥ ११॥

तद्दिनं हि समारभ्य केदारेश्वर एव च ।
पूजितो येन भक्त्या वै दुःखं स्वप्नेऽपि दुर्लभम् ॥ १२॥

यो वै हि पाण्डवान्दृष्ट्वा माहिषं रूपमास्थितः ।
मायामास्थाय तत्रैव पलायनपरोऽभवत् ॥ १३॥

धृतश्च पाण्डवैस्तत्र ह्यवाङ्मुखतया स्थितः ।
पुच्छं चैव धृतं तैस्तु प्रार्थितश्च पुनःपुनः ॥ १४॥

तद्रूपेण स्थितस्तत्र भक्तवत्सलनामभाक् ।
नयपाले शिरोभागो गतस्तद्रूपतः स्थितः ॥ १५॥

तथैव पूजनान्नित्यमाज्ञां चैवाप्यदात्तथा ।
पूजितश्च स्वयं शम्भुस्तत्र तस्थौ वरानदात् ॥ १६॥

पूजयित्वा गतास्ते तु पाण्डवा मुदितास्तदा ।
लब्ध्वा चित्तेप्सितं सर्वं विमुक्ताः सर्वदुःखतः ॥ १७॥

तत्र नित्यं हरः साक्षात्क्षेत्रे केदारसंज्ञके ।
भारतीभिः प्रजाभिश्च तथैव परिपूज्यते ॥ १८॥

तत्रत्यं वलयं यो वै ददाति हरवल्लभः ।
हररूपान्तिकं तच्च हररूपसमन्वितम् ॥ १९॥

तथैव रूपं दृष्ट्वा च सर्वपापैः प्रमुच्यते ।
जीवन्मुक्तो भवेत्सोऽपि यो गतो बदरीवने ॥ २०॥

दृष्ट्वा रूपं नरस्यैव तथा नारायणस्य हि ।
केदारेश्वरशम्भोश्च मुक्तिभागी न संशयः ॥ २१॥

केदारेशस्य भक्ता ये मार्गस्थास्तस्य वै मृताः ।
तेऽपि मुक्ता भवन्त्येव नात्र कार्या विचारणा ॥ २२॥

गत्वा तत्र प्रीतियुक्तः केदारेशं प्रपूज्य च ।
तत्रत्यमुदकं पीत्वा पुनर्जन्म न विन्दति ॥ २३॥

खण्डेऽस्मिन् भारते विप्रा नरनारायणेश्वरः ।
केदारेशः प्रपूज्यश्च सर्वैर्जीवैः सुभक्तितः ॥ २४॥

अस्य खण्डस्य स स्वामी सर्वेशोऽपि विशेषतः ।
सर्वकामप्रदः शम्भुः केदाराख्यो न संशयः ॥ २५॥

एतद्वचः समाख्यातं यत्पृष्टमृषिसत्तमाः ।
श्रुत्वा पापं हरेत्सर्वं नात्र कार्या विचारणा ॥ २६॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां केदारेश्वरज्योतिर्लिङ्गमाहात्म्यवर्णनं नामैकोनविंशोऽध्यायः ॥ ४.१९॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.२०. विंशोऽध्यायः । भीमासुरकृतोपद्रववर्णनम् ।

सूत उवाच ।
अतः परं प्रवक्ष्यामि माहात्म्यं भैमशङ्करम् ।
यस्य श्रवणमात्रेण सर्वाभीष्टं लभेन्नरः ॥ १॥

कामरूपाभिधे देशे शङ्करो लोककाम्यया ।
अवतीर्णः स्वयं साक्षात्कल्याणसुखभाजनम् ॥ २॥

यदर्थमवतीर्णोऽसौ शङ्करो लोकशङ्करः ।
शृणुतादरतस्तच्च कथयामि मुनीश्वराः ॥ ३॥

भीमो नाम महोवीर्यो राक्षसोऽभूत्पुरा द्विजाः ।
दुःखदः सर्वभूतानां धर्मध्वंसकरः सदा ॥ ४॥

कुम्भकर्णात्समुत्पन्नः कर्कट्यां सुमहाबलः ।
सह्ये च पर्वते सोऽपि मात्रावासं चकार ह ॥ ५॥

कुम्भकर्णे च रामेण हते लोकभयङ्करे ।
राक्षसी पुत्रसंयुक्ता सह्येऽतिष्ठत्स्वयं तदा ॥ ६॥

स बाल एकदा भीमः कर्कटीं मातरं द्विजाः ।
पप्रच्छ च खलो लोकदुःखदो भीमविक्रमः ॥ ७॥

भीम उवाच ।
मातर्मे कः पिता कुत्र कथं वैकाकिनी स्थिता ।
ज्ञातुमिच्छामि तत्सर्वं यथार्थं त्वं वदाधुना ॥ ८॥

सूत उवाच ।
एवं पृष्टा तदा तेन पुत्रेण राक्षसी च सा ।
उवाच पुत्रं सा दुष्टा श्रूयतां कथयाम्यहम् ॥ ९॥

कर्कट्युवाच ।
पिता ते कुम्भकर्णश्च रावणानुज एव च ।
रामेण मारितः सोऽयं भ्रात्रा सह महाबलः ॥ १०॥

अत्रागतः कदाचिद्वै कुम्भकर्णः स राक्षसः ।
मद्भोगं कृतवांस्तात प्रसह्य बलवान्पुरा ॥ ११॥

लङ्कां स गतवान् मां च त्यक्त्वात्रैव महाबलः ।
मया न दृष्टा सा लङ्का ह्यत्रैव निवसाम्यहम् ॥ १२॥

पिता मे कर्कटो नाम माता मे पुष्कसी मता ।
भर्ता मम विराधो हि रामेण निहतः पुरा ॥ १३॥

पित्रोः पार्श्वे स्थिता चाहं निहते स्वामिनि प्रिये ।
पितरौ मे मृतौ चात्र ऋषिणा भस्मसात्कृतौ ॥ १४॥

भक्षणार्थं गतौ तत्र क्रुद्धेन सुमहात्मना ।
सुतीक्ष्णेन सुतपसागस्त्यशिष्येण वै तदा ॥ १५॥

साहमेकाकिनी जाता दुःखिता पर्वते पुरा ।
निवसामि स्म दुःखार्ता निरालम्बा निराश्रया ॥ १६॥

एतस्मिन्समये ह्यत्र राक्षसो रावणानुजः ।
आगत्य कृतवान् सङ्गं मां विहाय गतो हि सः ॥ १७॥

ततस्त्वं च समुत्पन्नो महाबलपराक्रमः ।
अवलम्ब्य पुनस्त्वां च कालक्षेपं करोम्यहम् ॥ १७॥

सूत उवाच ।
इति श्रुत्वा वचस्तस्या भीमो भीमपराक्रमः ।
क्रुद्धश्च चिन्तयामास किं करोमि हरिं प्रति ॥ १९॥

पितानेन हतो मे हि तथा मातामहा अपि ।
विराधश्च हतोऽनेन दुःखं बहुतरं कृतम् ॥ २०॥

तत्पुत्रोऽहं भवेयं चेद्धरिं तं पीडयाम्यहम् ।
इति कृत्वा मतिं भीमस्तपस्तप्तुं महद्ययौ ॥ २१॥

ब्रह्माणं च समुद्दिश्य वर्षाणां च सहस्रकम् ।
मनसा ध्यानमाश्रित्य तपश्चक्रे महत्तदा ॥ २२॥

ऊर्ध्वबाहुश्चैकपादः सूर्ये दृष्टिं दधत्पुरा ।
संस्थितः स बभूवाथ भीमो राक्षसपुत्रकः ॥ २३॥

शिरसस्तस्य सञ्जातं तेजः परमदारुणम् ।
तेन दग्धास्तदा देवा ब्रह्माणं शरणं ययुः ॥ २४॥

प्रणम्य वेधसं भक्त्या तुष्टुवुर्विविधैः स्तवैः ।
दुःखं निवेदयाञ्चक्रुर्ब्रह्मणे ते सवासवाः ॥ २५॥

देवा ऊचुः ।
ब्रह्मन्वै रक्षसस्तेजो लोकान्पीडितुमुद्यतम् ।
यत्प्रार्थ्यते च दुष्टेन तत्त्वं देहि वरं विधे ॥ २६॥

नो चेदद्य वयं दग्धास्तीव्रतत्तेजसा पुनः ।
यास्यामः सङ्क्षयं सर्वे तस्मात्तं देहि प्रार्थितम् ॥ २७॥

सूत उवाच ।
इति तेषां वचः श्रुत्वा ब्रह्मा लोकपितामहः ।
जगाम च वरं दातुं वचनं चेदमब्रवीत् ॥ २८॥

ब्रह्मोवाच ।
प्रसन्नोऽस्मि वरं ब्रूहि यत्ते मनसि वर्तते ।
इति श्रुत्वा विधेर्वाक्यमब्रवीद्राक्षसो हि सः ॥ २९॥

भीम उवाच ।
यदि प्रसन्नो देवेश यदि देयो वरस्त्वया ।
अतुलं च बलं मेऽद्य देहि त्वं कमलासन ॥ ३०॥

सूत उवाच ।
इत्युक्त्वा तु नमश्चक्रे ब्रह्मणे स हि राक्षसः ।

ब्रह्मा चापि तदा तस्मै वरं दत्त्वा गृहं ययौ ॥ ३१॥

राक्षसो गृहमागत्य ब्रह्माप्तातिबलस्तदा ।
मातरं प्रणिपत्याशु स भीमः प्राह गर्ववान् ॥ ३२॥

भीम उवाच ।
पश्य मातर्बलं मेऽद्य करोमि प्रलयं महत् ।
देवानां शक्रमुख्यानां हरेर्वै तत्सहायिनः ॥ ३३॥

सूत उवाच ।
इत्युक्त्वा प्रथमं भीमो जिग्ये देवान्सवासवान् ।
स्थानान्निःसारयामास स्वात्स्वात्तान्भीमविक्रमः ॥ ३४॥

ततो जिग्ये हरिं युद्धे प्रार्थितं निर्जरैरपि ।
ततो जेतुं रसां दैत्यः प्रारम्भं कृतवान्मुदा ॥ ३५॥

पुरा सुदक्षिणं तत्र कामरूपेश्वरं प्रभुम् ।
जेतुं गतस्ततस्तेन युद्धमासीद्भयङ्करम् ॥ ३६॥

भीमोऽथ तं महाराजं प्रभावाद् ब्रह्मणोऽसुरः ।
जिग्ये वरप्रभावेण महावीरं शिवाश्रयम् ॥ ३७॥

स हि जित्वा ततस्तं च कामरूपेश्वरं प्रभुम् ।
बबन्ध ताडयामास भीमो भीमपराक्रमः ॥ ३८॥

गृहीतं तस्य सर्वस्वं राज्यं सोपस्करं द्विजाः ।
तेन भीमेन दुष्टेन शिवदासस्य भूपतेः ॥ ३९॥

राजा चापि सुधर्मिष्ठः प्रियधर्मो हरप्रियः ।
गृहीतो निगडैस्तेन ह्येकान्ते स्थापितश्च सः ॥ ४०॥

तत्र तेन तदा कृत्वा पार्थिवीं मूर्तिमुत्तमाम् ।
भजनं च शिवस्यैव प्रारब्धं प्रियकाम्यया ॥ ४१॥

गङ्गायाः स्तवनं तेन बहुधा च तदा कृतम् ।
मानसं स्नानकर्मादि कृत्वा शङ्करपूजनम् ॥ ४२॥

पार्थिवेन विधानेन चकार नृपसत्तमः ।
तद्ध्यानं च यथा स्याद्वै कृत्वा च विधिपूर्वकम् ॥ ४३॥

प्रणिपातैस्तथा स्तोत्रैर्मुद्रासनपुरःसरम् ।

कृत्वा हि सकलं तच्च स भेजे शङ्करं मुदा ॥ ४४॥

पञ्चाक्षरमयीं विद्यां जजाप प्रणवान्विताम् ।
नान्यत्कार्यं स वै कर्तुं लब्धवानन्तरं तदा ॥ ४५॥

तत्पत्नी च तदा साध्वी दक्षिणानाम विश्रुता ।
विधानं पार्थिवं प्रीत्या चकार नृपवल्लभा ॥ ४६॥

दम्पती त्वेकभावेन शङ्करं भक्तशङ्करम् ।
भेजाते तत्र तौ नित्यं शिवाराधनतत्परौ ॥ ४७॥

राक्षसो यज्ञकर्मादि वरदर्पविमोहितः ।
लोपयामास तत्सर्वं मह्यं वै दीयतामिति ॥ ४८॥

बहुसैन्यसमायुक्तो राक्षसानां दुरात्मनाम् ।
चकार वसुधां सर्वां स्ववशे चर्षिसत्तमाः ॥ ४९॥

वेदधर्मं शास्त्रधर्मं स्मृतिधर्मं पुराणजम् ।
लोपयित्वा च तत्सर्वं बुभुजे स्वयमूर्जितः ॥ ५०॥

देवाश्च पीडितास्तेन सशक्रा ऋषयस्तथा ।
अत्यन्तं दुःखमापन्ना लोकान्निःसारिता द्विजाः ॥ ५१॥

ते ततो विकलाः सर्वे सवासवसुरर्षयः ।
ब्रह्मविष्णू पुरोधाय शङ्करं शरणं ययुः ॥ ५२॥

स्तुत्वा स्तोत्रैरनेकैश्च शङ्करं लोकशङ्करम् ।
प्रसन्नं कृतवन्तस्ते महाकोश्यास्तटे शुभे ॥ ५३॥

कृत्वा च पार्थिवीं मूर्तिं पूजयित्वा विधानतः ।
तुष्टुवुर्विविधैः स्तोत्रैर्नमस्कारादिभिः क्रमात् ॥ ५४॥

एवं स्तुतस्तदा शम्भुर्देवानां स्तवनादिभिः ।
सुप्रसन्नतरो भूत्वा तान्सुरानिदमब्रवीत् ॥ ५५॥

शिव उवाच ।
हे हरे हे विधे देवा ऋषयश्चाखिला अहम् ।
प्रसन्नोऽस्मि वरं ब्रूत किं कार्यं करवाणि वः ॥ ५६॥

सूत उवाच ।
इत्युक्ते च तदा तेन शिवेन वचने द्विजाः ।

सुप्रणम्य करौ बध्वा देवा ऊचुः शिवं तदा ॥ ५७॥

देवा ऊचुः ।
सर्वं जानासि देवेश सर्वेषां मनसि स्थितम् ।
अन्तर्यामी च सर्वस्य नाज्ञातं विद्यते तव ॥ ५८॥

तथापि श्रूयतां नाथ स्वदुःखं ब्रूमहे वयम् ।
त्वदाज्ञया महादेव कृपादृष्ट्या विलोकय ॥ ५९॥

राक्षसः कर्कटीपुत्रः कुम्भकर्णोद्भवो बली ।
पीडयत्यनिशं देवान्ब्रह्मदत्तवरोर्जितः ॥ ६०॥

तमिमं जहि भीमाह्वं राक्षसं दुःखदायकम् ।
कृपां कुरु महेशान विलम्बं न कुरु प्रभो ॥ ६१॥

सूत उवाच ।
इत्युक्तस्तु सुरैः सर्वैः शम्भुर्वै भक्तवत्सलः ।
वधं तस्य करिष्यामीत्युक्त्वा देवांस्ततोऽब्रवीत् ॥ ६२॥

शम्भुरुवाच ।
कामरूपेश्वरो राजा मदीयो भक्त उत्तमः ।
तस्मै ब्रूतेति वै देवाः कार्यं शीघ्रं भविष्यति ॥ ६३॥

सुदक्षिण महाराज कामरूपेश्वर प्रभो ।
मद्भक्तस्त्वं विशेषेण कुरु मद्भजनं रतेः ॥ ६४॥

दैत्यं भीमाह्वयं दुष्टं ब्रह्मप्राप्तवरोर्जितम् ।
हनिष्यामि न सन्देहस्त्वत्तिरस्कारकारिणम् ॥ ६५॥

सूत उवाच ।
अथ ते निर्जराः सर्वे तत्र गत्वा मुदान्विताः ।
तस्मै महानृपायोचुर्यदुक्तं शम्भुना च तत् ॥ ६६॥

तमित्युक्त्वा च वै देवा आनन्दं परमं गताः ।
महर्षयश्च ते सर्वे ययुः शीघ्रं निजाश्रमान् ॥ ६७॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां भीमेश्वरज्योतिर्लिङ्गमाहात्म्ये भीमासुरकृतोपद्रववर्णनं नाम विंशोऽध्यायः ॥ ४.२०॥

॥ श्रीगणेशाय नमः ॥

॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.२१. एकविंशोऽध्यायः । भीमेश्वरज्योतिर्लिङ्गोत्पत्तिस्तन्माहात्म्यवर्णनम् ।

सूत उवाच ।
शिवोऽपि च गणैः सार्धं जगाम हितकाम्यया ।
स्वभक्तनिकटं गुप्तस्तस्थौ रक्षार्थमादरात् ॥ १॥

एतस्मिन्नन्तरे तत्र कामरूपेश्वरेण च ।
अत्यन्तं ध्यानमारब्धं पार्थिवस्य पुरस्तदा ॥ २॥

केनचित्तत्र गत्वा च राक्षसाय निवेदितम् ।
राजा किञ्चित्करोत्येवं त्वदर्थं ह्याभिचारिकम् ॥ ३॥

सूत उवाच ।
राक्षसः स च तच्छ्रुत्वा क्रुद्धस्तद् हननेच्छया ।
गृहीत्वा करवालं च जगाम नृपतिं प्रति ॥ ४॥

तद् दृष्ट्वा राक्षसस्तत्र पार्थिवादि स्थितं च यत् ।
तदर्थं तत्स्वरूपं च दृष्ट्वा किञ्चित्करोत्यसौ ॥ ५॥

अत एनं बलादद्य हन्मि सोपस्करं नृपम् ।
विचार्येति महाक्रुद्धो राक्षसः प्राह तं नृपम् ॥ ६॥

भीम उवाच ।
रे रे पार्थिव दुष्टात्मन् क्रियते किं त्वयाधुना ।
सत्यं वद न हन्यां त्वामन्यथा हन्मि निश्चितम् ॥ ७॥

सूत उवाच ।
इति श्रुत्वा वचस्तस्य कामरूपेश्वरश्च सः ।
मनसीति चिचिन्ताशु शिवविश्वासपूरितः ॥ ८॥

भविष्यं यद्भवत्येव नास्ति तस्य निवर्तकः ।
प्रारब्धाधीनमेवात्र प्रारब्धः स शिवः स्मृतः ॥ ९॥

कृपालुः शङ्करश्चात्र पार्थिवे वर्तते ध्रुवम् ।
मदर्थं न करोतीह कुतः कोऽयं च राक्षसः ॥ १०॥

स्वानुरूपां प्रतिज्ञां स सत्यं चैव करिष्यति ।
सत्यप्रतिज्ञो भगवान् शिवश्चेति श्रुतौ श्रुतः ॥ ११॥

मम भक्तं यदा कश्चित्पीडयत्यतिदारुणः ।
तदाहं तस्य रक्षार्थं दुष्टं हन्मि न संशयः ॥ १२॥

एवं धैर्यं समालम्ब्य ध्यात्वा देवं च शङ्करम् ।
प्रार्थयामास सद्भक्त्या मनसैव रसेश्वरः ॥ १३॥

त्वदीयोऽस्मि महाराज यथेच्छसि तथा कुरु ।
सत्यं च वचनं ह्यत्र ब्रवीमि कुरु मे हितम् ॥ १४॥

एवं मनसि स ध्यात्वा सत्यपाशेन यन्त्रितः ।
प्राह सत्यं वचो राजा राक्षसं चावमानयन् ॥ १५॥

नृप उवाच ।
भजामि शङ्करं देवं स्वभक्तपरिपालकम् ।
चराचराणां सर्वेषामीश्वरं निर्विकारकम् ॥ १६॥

सूत उवाच ।
इति तस्य वचः श्रुत्वा कामरूपेश्वरस्य सः ।
क्रोधेन प्रचलद्गात्रो भीमो वचनमब्रवीत् ॥ १७॥

भीम उवाच ।
शङ्करस्ते मया ज्ञातः किं करिष्यति वै मम ।
यो मे पितृव्यकेनैव स्थापितः किङ्करो यथा ॥ १८॥

तद्बलं हि समाश्रित्य विजेतुं त्वं समीहसे ।
तर्हि त्वया जितं सर्वं नात्र कार्या विचारणा ॥ १९॥

यावन्मया न दृष्टो हि शङ्करस्त्वत्प्रपालकः ।
तावत्त्वं स्वामिनं मत्वा सेवसे नान्यथा क्वचित् ॥ २०॥

मया दृष्टे च तत्सर्वं स्फुटं स्यात्सर्वथा नृप ।
तस्मात्त्वं वै शिवस्येदं रूपं दूरतरं कुरु ॥ २१॥

अन्यथा हि भयं तेऽद्य भविष्यति न संशयः ।

स्वामिनस्ते करं तीक्ष्णं दास्येऽहं भीमविक्रमः ॥ २२॥

सूत उवाच ।
इति तद्वचनं श्रुत्वा कामरूपेश्वरो नृपः ।
दृढं शङ्करविश्वासो द्रुतं वाक्यमुवाच तम् ॥ २३॥

राजोवाच ।
अहं च पामरो दुष्टो न मोक्ष्ये शङ्करं पुनः ।
सर्वोत्कृष्टश्च मे स्वामी न मां मुञ्चति कर्हिचित् ॥ २४॥

सूत उवाच ।
एवं वचस्तदा श्रुत्वा तस्य राज्ञः शिवात्मनः ।
तं प्रहस्य द्रुतं भीमो भूपतिं राक्षसोऽब्रवीत् ॥ २५॥

भीम उवाच ।
मत्तो भिक्षयते नित्यं स किं जानाति स्वाकृतिम् ।
योगिनां का च निष्ठा वै भक्तानां प्रतिपालने ॥ २६॥

इति कृत्वा मतिं त्वं च दूरतो भव सर्वथा ।
अहं च तव स स्वामी युद्धं वै करवावहे ॥ २७॥

सूत उवाच ।
इत्युक्तः स नृपश्रेष्ठः शम्भुभक्तो दृढव्रतः ।
प्रत्युवाचाभयो भीमं दुःखदं जगतां सदा ॥ २८॥

राजोवाच ।
शृणु राक्षस दुष्टात्मन्मया कर्तुं न शक्यते ।
त्वया विक्रियते तर्हि कुतस्त्वं शक्तिमानसि ॥ २९॥

सूत उवाच ।
इत्युक्तः सैन्यमादाय राजानं परिभर्त्स्य तम् ।
करालं करवालं च पार्थिवे प्राक्षिपत्तदा ॥ ३०॥

पश्य त्वं स्वामिनोऽद्यैव बलं भक्तसुखावहम् ।
इत्युवाच विहस्यैव राक्षसैः स महाबलः ॥ ३१॥

करवालः पार्थिवं च यावत्स्पृशति नो द्विजाः ।
तावच्च पार्थिवात्तस्मादाविरासीत्स्वयं हरः ॥ ३२॥

पश्य भीमेश्वरोऽहं च रक्षार्थं प्रकटोऽभवम् ।
मम पूर्वव्रतं ह्येतद्रक्ष्यो भक्तो मया सदा ॥ ३३॥

एतस्मात्पश्य मे शीघ्रं बलं भक्तसुखावहम् ।
इत्युक्त्वा स पिनाकेन करवालो द्विधा कृतः ॥ ३४॥

पुनश्चैव त्रिशूलं स्वं चिक्षिपे तेन रक्षसा ।
तच्छूलं शतधा नीतमपि दुष्टस्य शम्भुना ॥ ३५॥

पुनः शक्तिश्च निःक्षिप्ता तेन शम्भूपरि द्विजाः ।
शम्भुना सापि बाणैः स्वैर्लक्षधा च कृता द्रुतम् ॥ ३६॥

पट्टिशश्च ततस्तेन निःक्षिप्तो हि शिवोपरि ।
शिवेन स त्रिशूलेन तिलशश्च कृतं क्षणात् ॥ ३७॥

ततः शिवगणानां च राक्षसानां परस्परम् ।
युद्धमासीत्तदा घोरं पश्यतां दुःखकावहम् ॥ ३८॥

ततश्च पृथिवी सर्वा व्याकुला चाभवत्क्षणात् ।
समुद्राश्च तदा सर्वे चुक्षुभुः समहीधराः ॥ ३९॥

देवाश्च ऋषयः सर्वे बभूवुर्विकला अति ।
ऊचुः परस्परं चेति व्यर्थं वै प्रार्थितः शिवः ॥ ४०॥

नारदश्च समागत्य शङ्करं दुःखदाहकम् ।
प्रार्थयामास तत्रैव साञ्जलिर्नतमस्तकः ॥ ४१॥

नारद उवाच ।
क्षम्यतां क्षम्यतां नाथ त्वया विभ्रमकारक ।
तृणे कश्च कुठारो वै हन्यतां शीघ्रमेव हि ॥ ४२॥

इति सम्प्रार्थितः शम्भुः सर्वान् रक्षोगणान्प्रभुः ।
हुङ्कारेणैव चास्त्रेण भस्मसात्कृतवांस्तदा ॥ ४३॥

सर्वे ते राक्षसा दग्धाः शङ्करेण क्षणं मुने ।
बभूवुस्तत्र सर्वेषां देवानां पश्यतां द्रुतम् ॥ ४४॥

दावानलगतो वह्निर्यथा च वनमादहेत् ।
तथा शिवेन क्रुद्धेन राक्षसानां बलं क्षणात् ॥ ४५॥

भीमस्यैव च किं भस्म न ज्ञातं केनचित्तदा ।

परिवारयुतो दग्धो नाम न श्रूयते क्वचित् ॥ ४६॥

ततः शिवस्य कृपया शान्तिं प्राप्ता मुनीश्वराः ।
देवाः सर्वे च शक्राद्याः स्वास्थ्यं प्रापाखिलं जगत् ॥ ४७॥

क्रोधज्वाला महेशस्य निःससार वनाद्वनम् ।
राक्षसानां च तद्भस्म सर्वं व्याप्तं वनेऽखिलम् ॥ ४८॥

ततश्चौषधयो जाता नानाकार्यकरास्तथा ।
रूपान्तरं ततो नृणां भवेद्वेषान्तरं तथा ॥ ४९॥

भूतप्रेतपिशाचादि दूरतश्च ततो व्रजेत् ।
तन्न कार्यं च यच्चैव ततो न भवति द्विजाः ॥ ५०॥

तैर्देवैः प्रार्थितः शम्भुर्मुनिभिश्च विशेषतः ।
स्थातव्यं स्वामिना ह्यत्र लोकानां सुखहेतवे ॥ ५१॥

अयं वै कुत्सितो देश अयोध्यालोकदुःखदः ।
भवन्तं च तदा दृष्ट्वा कल्याणं सम्भविष्यति ॥ ५२॥

भीमशङ्करनामा त्वं भविता सर्वसाधकः ।
एतल्लिङ्गं सदा पूज्यं सर्वापद्विनिवारकम् ॥ ५३॥

सूत उवाच ।
इत्येवं प्रार्थितः शम्भुर्लोकानां हितकारकः ।
तत्रैवास्थितवान्प्रीत्या स्वतन्त्रो भक्तवत्सलः ॥ ५४॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां भीमेश्वरज्योतिर्लिङ्गोत्पत्तिस्तन्माहात्म्यवर्ण
नामैकविंशोऽध्यायः ॥ ४.२१ ॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.२२. द्वाविंशोऽध्यायः । काश्यां रुद्रागमनवर्णनम् ।

सूत उवाच ।
अतः परं प्रवक्ष्यामि श्रूयतामृषिसत्तमाः ।

विश्वेश्वरस्य माहात्म्यं महापातकनाशनम् ॥ १॥

यदिदं दृश्यते किञ्चिज्जगत्यां वस्तुमात्रकम् ।
चिदानन्दस्वरूपं च निर्विकारं सनातनम् ॥ २॥

तस्यैव कैवल्यरतेर्द्वितीयेच्छा ततोऽभवत् ।
स एव सगुणो जातः शिव इत्यभिधीयते ॥ ३॥

स एव हि द्विधा जातः पुंस्त्रीरूपप्रभेदतः ।
यः पुमान्स शिवः ख्यातः स्त्री शक्तिः सा हि कथ्यते ॥ ४॥

चिदानन्दस्वरूपाभ्यां पुरुषावपि निर्मितौ ॥ ५॥

अदृष्टाभ्यां तदा ताभ्यां स्वभावान्मुनिसत्तमाः ।
तावदृष्ट्वा तदा तौ च स्वमातृपितरौ द्विजाः ॥ ६॥

महासंशयमापन्नौ प्रकृतिः पुरुषश्च तौ ।
तदा वाणी समुत्पन्ना निर्गुणात्परमात्मनः ।
तपश्चैव प्रकर्तव्यं ततः सृष्टिरनुत्तमा ॥ ७॥

प्रकृतिपुरुषावूचतुः ।
तपसस्तु स्थलं नास्ति कुत्रावाभ्यां प्रभोऽधुना ।
स्थित्वा तपः प्रकर्तव्यं तव शासनतः शिव ॥ ८॥

ततश्च तेजसः सारं पञ्चक्रोशात्मकं शुभम् ।
सर्वोपकरणैर्युक्तं सुन्दरं नगरं तथा ॥ ९॥

निर्माय प्रेषितं तत्स्वं निर्गुणेन शिवेन च ।
अन्तरिक्षे स्थितं तच्च पुरुषस्य समीपतः ॥ १०॥

तदधिष्ठाय हरिणा सृष्टिकामनया ततः ।
बहुकालं तपस्तप्तं तद्ध्यानमवलम्ब्य च ॥ ११॥

श्रमेण जलधाराश्च विविधाश्चाभवंस्तदा ।
ताभिर्व्याप्तं च तच्छून्यं नान्यत्किञ्चिददृश्यत ॥ १२॥

ततश्च विष्णुना दृष्टं किमेतद् दृश्यतेऽद्भुतम् ।
इत्याश्चर्यं तदा दृष्ट्वा शिरसः कम्पनं कृतम् ॥ १३॥

ततश्च पतितः कर्णान्मणिश्च पुरतः प्रभोः ।
तद् बभूव महत्तीर्थं नामतो मणिकर्णिका ॥ १४॥

जलौघे प्लाव्यमाना सा पञ्चक्रोशी यदाभवत् ।
निर्गुणेन शिवेनाशु त्रिशूलेन धृता तदा ॥ १५॥

विष्णुस्तत्रैव सुष्वाप प्रकृत्या स्वस्त्रिया सह ।
तन्नाभिकमलाज्जातो ब्रह्मा शङ्करशासनात् ॥ १६॥

शिवाज्ञां स समासाद्य सृष्टिं चक्रेऽद्भुतां तदा ।
चतुर्दशमिता लोका ब्रह्माण्डे यत्र निर्मिताः ॥ १७॥

योजनानां च पञ्चाशत्कोटिसङ्ख्याप्रमाणतः ।
ब्रह्माण्डस्यैव विस्तारो मुनिभिः परिकीर्तितः ॥ १८॥

ब्रह्माण्डे कर्मणा बद्धाः प्राणिनो मां कथं पुनः ।
प्राप्स्यन्तीति विचिन्त्यैतत्पञ्चक्रोशी विमोचिता ॥ १९॥

इयं च शुभदा लोके कर्मनाशकरी मता ।
मोक्षप्रकाशिका काशी ज्ञानदा मम सुप्रिया ॥ २०॥

अविमुक्तं स्वयं लिङ्गं स्थापितं परमात्मना ।
न कदापि त्वया त्याज्यमिदं क्षेत्रं ममांशक ॥ २१॥

इत्युक्त्वा च त्रिशूलात्स्वादवतार्य हरः स्वयम् ।
मोचयामास भुवने मर्त्यलोके हि काशिकाम् ॥ २२॥

ब्रह्मणश्च दिने सा हि न विनश्यति निश्चितम् ।
तदा शिवस्त्रिशूलेन दधाति मुनयश्च ताम् ॥ २३॥

पुनश्च ब्रह्मणा सृष्टौ कृतायां स्थाप्यते द्विजाः ।
कर्मणां कर्षणाच्चैव काशीति परिपठ्यते ॥ २४॥

अविमुक्तेश्वरं लिङ्गं काश्यां तिष्ठति सर्वदा ।
मुक्तिदातृ च लोकानां महापातकिनामपि ॥ २५॥

अन्यत्र प्राप्यते मुक्तिः सारूप्यादिर्मुनीश्वराः ।
अत्रैव प्राप्यते जीवैः सायुज्या मुक्तिरुत्तमा ॥ २६॥

येषां क्वापि गतिर्नास्ति तेषां वाराणसी पुरी ।
पञ्चक्रोशी महापुण्या हत्याकोटिविनाशनी ॥ २७॥

अमरा मरणं सर्वे वाञ्छन्तीह परे च के ।

भुक्तिमुक्तिप्रदा चैषा सर्वदा शङ्करप्रिया ॥ २८॥

ब्रह्मा च श्लाघते चामुं विष्णुः सिद्धाश्च योगिनः ।
मुनयश्च तथैवान्ये त्रिलोकस्था जनाः सदा ॥ २९॥

काश्याश्च महिमानं वै वक्तुं वर्षशतैरपि ।
शक्नोम्यहं न सर्वं हि यथाशक्ति ब्रुवे ततः ॥ ३०॥

कैलासस्य पतिर्यो वै ह्यन्तः सत्त्वो बहिस्तमाः ।
कालाग्निर्नामतः ख्यातो निर्गुणो गुणवान्भवः ।
प्रणिपातैरनेकैश्च वचनं चेदमब्रवीत् ॥ ३१॥

रुद्र उवाच ।
विश्वेश्वर महेशान त्वदीयोऽस्मि न संशयः ।
कृपां कुरु महादेव मयि त्वं साम्ब आत्मजे ॥ ३२॥

स्थातव्यं च सदात्रैव लोकानां हितकाम्यया ।
तारयस्व जगन्नाथ प्रार्थयामि जगत्पते ॥ ३३॥

सूत उवाच ।
अविमुक्तोऽपि दान्तात्मा तं सम्प्रार्थ्य पुनः पुनः ।
नेत्राश्रूणि प्रमुच्यैव प्रीतः प्रोवाच शङ्करम् ॥ ३४॥

अविमुक्त उवाच ।
देवदेव महादेव कालामयसुभेषज ।
त्वं त्रिलोकपतिः सत्यं सेव्यो ब्रह्माच्युतादिभिः ॥ ३५॥

काश्यां पुर्यां त्वया देव राजधानी प्रगृह्यताम् ।
मया ध्यानितया स्थेयमचिन्त्यसुखहेतवे ॥ ३६॥

मुक्तिदाता भवानेह कामदश्च न चापरः ।
तस्मात्त्वमुपकाराय तिष्ठोमासहितः सदा ॥ ३७॥

जीवान्भवाब्धेरखिलांस्तारय त्वं सदाशिव ।
भक्तकार्यं कुरु हर प्रार्थयामि पुनःपुनः ॥ ३८॥

सूत उवाच ।
इत्येवं प्रार्थितस्तेन विश्वनाथेन शङ्करः ।
लोकानामुपकारार्थं तस्थौ तत्रापि सर्वराट् ॥ ३९॥

यद्दिनं हि समारभ्य हरः काश्यामुपागतः ।
तदारभ्य च सा काशी सर्वश्रेष्ठतराभवत् ॥ ४० ॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां विश्वेश्वरमाहात्म्ये काश्यां रुद्रागमनवर्णनं नाम द्वाविंशोऽध्यायः ॥ ४.२२ ॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.२३. त्रयोविंशोऽध्यायः । काशीविश्वेश्वरज्योतिर्लिङ्गमाहात्म्यवर्णनम् ।

ऋषय ऊचुः ।
एवं वाराणसी पुण्या यदि सूत महापुरी ।
तत्प्रभावं वदास्माकमविमुक्तस्य च प्रभो ॥ १ ॥

सूत उवाच ।
वक्ष्ये सङ्क्षेपतः सम्यग्वाराणस्याः सुशोभनम् ।
विश्वेश्वरस्य माहात्म्यं श्रूयतां च मुनीश्वराः ॥ २ ॥

कदाचित्पार्वती देवी शङ्करं परया मुदा ।
लोककामनयापृच्छन्माहात्म्यमविमुक्तयोः ॥ ३ ॥

पार्वत्युवाच ।
अस्य क्षेत्रस्य माहात्म्यं वक्तुमर्हस्यशेषतः ।
ममोपरि कृपां कृत्वा लोकानां हितकाम्यया ॥ ४ ॥

सूत उवाच ।
देव्यास्तद्वचनं श्रुत्वा देवदेवो जगत्प्रभुः ।
प्रत्युवाच भवानीं तां जीवानां प्रियहेतवे ॥ ५ ॥

परमेश्वर उवाच ।
साधु पृष्टं त्वया भद्रे लोकानां सुखदं शुभम् ।
कथयामि यथार्थं वै माहात्म्यमविमुक्तयोः ॥ ६ ॥

इदं गुह्यतमं क्षेत्रं सदा वाराणसी मम ।
सर्वेषामेव जन्तूना हेतुर्मोक्षस्य सर्वथा ॥ ७ ॥

अस्मिन्सिद्धाः सदा क्षेत्रे मदीयं व्रतमाश्रिताः ।
नानालिङ्गधरा नित्यं मम लोकाभिकाङ्क्षिणः ॥ ८॥

अभ्यस्यन्ति महायोगं जितात्मानो जितेन्द्रियाः ।
परं पाशुपतं श्रौतं भुक्तिमुक्तिफलप्रदम् ॥ ९॥

रोचते मे सदा वासो वाराणस्यां महेश्वरि ।
हेतुना येन सर्वाणि विहाय शृणु तद् ध्रुवम् ॥ १०॥

यो मे भक्तश्च विज्ञानी तावुभौ मुक्तिभागिनौ ।
तीर्थापेक्षा च न तयोर्विहिताविहिते समौ ॥ ११॥

जीवन्मुक्तौ तु तौ ज्ञेयौ यत्र कुत्रापि वै मृतौ ।
प्राप्नुतो मोक्षमाश्वेव मयोक्तं निश्चितं वचः ॥ १२॥

अत्र तीर्थे विशेषोऽस्त्यविमुक्ताख्ये परोत्तमे ।
श्रूयतां तत्त्वया देवि परशक्ते सुचित्तया ॥ १३॥

सर्वे वर्णा आश्रमाश्च बालयौवनवार्धकाः ।
अस्यां पुर्यां मृताश्चेत्स्युर्मुक्ता एव न संशयः ॥ १४॥

अशुचिश्च शुचिर्वापि कन्या परिणता तथा ।
विधवा वाथ वा वन्ध्या रजोदोषयुतापि वा ॥ १५॥

प्रसूतासंस्कृता कापि यादृशी तादृशी द्विजाः ।
अत्र क्षेत्रे मृता चेत्स्यान्मोक्षभाङ्नात्र संशयः ॥ १६॥

स्वेदजश्चाण्डजो वापि ह्युद्भिज्जोऽथ जरायुजः ।
मृतो मोक्षमवाप्नोति यथात्र न तथा क्वचित् ॥ १७॥

ज्ञानापेक्षा न चात्रैव भक्त्यपेक्षा न वै पुनः ।
कर्मापेक्षा न देव्यत्र दानापेक्षा न चैव हि ॥ १८॥

संस्कृत्यपेक्षा नैवात्र ध्यानापेक्षा न कर्हिचित् ।
नामापेक्षार्चनापेक्षा सुजातीनां तथात्र न ॥ १९॥

मम क्षेत्रे मोक्षदे हि यो वा वसति मानवः ।
यथा तथा मृतः स्याच्चेन्मोक्षमाप्नोति निश्चितम् ॥ २०॥

एतन्मम पुरं दिव्यं गुह्याद् गुह्यतरं प्रिये ।

ब्रह्मादयोऽपि जानन्ति माहात्म्यं नास्य पार्वति ॥ २१॥

महत्क्षेत्रमिदं तस्मादविमुक्तमिति स्मृतम् ।
सर्वेभ्यो नैमिषादिभ्यः परं मोक्षप्रदं मृते ॥ २२॥

धर्मस्योपनिषत्सत्यं मोक्षस्योपनिषत्समम् ।
क्षेत्रतीर्थोपनिषदमविमुक्तं विदुर्बुधाः ॥ २३॥

कामं भुञ्जन्स्वपन्क्रीडन्कुर्वन्हि विविधाः क्रियाः ।
अविमुक्ते त्यजन्प्राणाञ्जन्तुर्मोक्षाय कल्पते ॥ २४॥

कृत्वा पापसहस्राणि पिशाचत्वं वरं नृणाम् ।
न च क्रतुसहस्रत्वं स्वर्गे काशीं पुरीं विना ॥ २५॥

तस्मात्सर्वप्रयत्नेन सेव्यते काशिका पुरी ।
अव्यक्तलिङ्गं मुनिभिर्ध्यायते च सदाशिवः ॥ २६॥

यद्यत्फलं समुद्दिश्य तपन्त्यत्र नराः प्रिये ।
तेभ्यश्चाहं प्रयच्छामि सम्यक्तत्तत्फलं ध्रुवम् ॥ २७॥

सायुज्यमात्मनः पश्चादीप्सितं स्थानमेव च ।
न कुतश्चित्कर्मबन्धस्त्यजतामत्र वै तनुम् ॥ २८॥

ब्रह्मा देवर्षिभिः सार्धं विष्णुर्वापि दिवाकरः ।
उपासते महात्मानः सर्वे मामिह चापरे ॥ २९॥

विषयासक्तचित्तोऽपि त्यक्तधर्मरुचिर्नरः ।
इह क्षेत्रे मृतो यो वै संसारं न पुनर्विशेत् ॥ ३०॥

किं पुनर्निर्ममा धीराः सत्त्वस्था दम्भवर्जिताः ।
कृतिनश्च निरारम्भाः सर्वे ते मयि भाविताः ॥ ३१॥

जन्मान्तरसहस्रेषु जन्म योगी समाप्नुयात् ।
तदिहैव परं मोक्षं मरणादधिगच्छति ॥ ३२॥

अत्र लिङ्गान्यनेकानि भक्तैः संस्थापितानि हि ।
सर्वकामप्रदानीह मोक्षदानि च पार्वति ॥ ३३॥

पञ्चक्रोशं चतुर्दिक्षु क्षेत्रमेतत्प्रकीर्तितम् ।
समन्ताच्च तथा जन्तोर्मृतिकालेऽमृतप्रदम् ॥ ३४॥

अपापश्च मृतो यो वै सद्यो मोक्षं समश्नुते ।
सपापश्च मृतो यः स्यात्कायव्यूहान्समश्नुते ॥ ३५॥

यातनां सोऽनुभूयैव पश्चान्मोक्षमवाप्नुयात् ।
पातकं योऽविमुक्ताख्ये क्षेत्रेऽस्मिन्कुरुते ध्रुवम् ॥ ३६॥

भैरवीं यातनां प्राप्य वर्षाणामयुते पुनः ।
ततो मोक्षमवाप्नोति भुक्त्वा पापं च सुन्दरि ॥ ३७॥

इति ते च समाख्याता पापाचारे च या गतिः ।
एवं ज्ञात्वा नरः सम्यक्सेवयेदविमुक्तकम् ॥ ३८॥

कृतकर्मक्षयो नास्ति कल्पकोटिशतैरपि ।
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ॥ ३९॥

केवलं चाशुभं कर्म नरकाय भवेदिह ।
शुभं स्वर्गाय जायेत द्वाभ्यां मानुष्यमीरितम् ॥ ४०॥

जन्म सम्यगसम्यक् च न्यूनाधिक्ये भवेदिह ।
उभयोश्च क्षयो मुक्तिर्भवेत्सत्यं हि पार्वति ॥ ४१॥

कर्म च त्रिविधं प्रोक्तं कर्मकाण्डे महेश्वरि ।
सञ्चितं क्रियमाणं च प्रारब्धं चेति बन्धकृत् ॥ ४२॥

पूर्वजन्मसमुद्भूतं सञ्चितं समुदाहृतम् ।
भुज्यते च शरीरेण प्रारब्धं परिकीर्तितम् ॥ ४३॥

अनेन जन्मना यच्च क्रियते कर्म साम्प्रतम् ।
शुभाशुभं च देवेशि क्रियमाणं विदुर्बुधाः ॥ ४४॥

प्रारब्धकर्मणो भोगात्क्षयश्चैव न चान्यथा ।
उपायेन द्वयोर्नाशः कर्मणोः पूजनादिना ॥ ४५॥

सर्वेषां कर्मणां नाशो नास्ति काशीं पुरीं विना ।
सर्वं च सुलभं तीर्थं दुर्लभा काशिका पुरी ॥ ४६॥

पूर्वजन्मकृतं चेद्वै काशीदर्शनमादरात् ।
तदा काशीं च सम्प्राप्य लभेन्मृत्युं न चान्यथा ॥ ४७॥

काशीं प्राप्य नरो यस्तु गङ्गायां स्नानमाचरेत् ।
तदा च क्रियमाणस्य सञ्चितस्यापि सङ्क्षयः ॥ ४८॥

प्रारब्धं न विना भोगं नश्यतीति सुनिश्चितम् ।
मृतिश्च तस्य सञ्जाता तदा तस्य क्षयो भवेत् ॥ ४९॥

पूर्वं चैव कृता काशी पश्चात्पापं समाचरेत् ।
तद्बीजेन बलवता नीयते काशिका पुनः ॥ ५०॥

तदा सर्वाणि पापानि भस्मसाच्च भवन्ति हि ।
तस्मात्काशीं नरः सेवेत्कर्मनिर्मूलनीं ध्रुवम् ॥ ५१॥

एकोऽपि ब्राह्मणो येन काश्यां संवासितः प्रिये ।
काशीवासमवाप्यैव ततो मुक्तिं स विन्दति ॥ ५२॥

काश्यां यो वै मृतश्चैव तस्य जन्म पुनर्न हि ।
समुद्दिश्य प्रयागे च मृतस्य कामनाफलम् ॥ ५३॥

संयोगश्च तयोश्चेत्स्यात्काशीजन्यं फलं वृथा ।
यदि न प्राप्यते तच्च तीर्थराजफलं वृथा ॥ ५४॥

तस्मान्मच्छासनाद्विष्णुः सृष्टिं साक्षाद्धि नूतनाम् ।
विधाय मनसोद्दिष्टां तत्सिद्धिं यच्छति ध्रुवम् ॥ ५५॥

सूत उवाच ।
इत्यादि बहुमाहात्म्यं काश्या वै मुनिसत्तमाः ।
तथा विश्वेश्वरस्यापि भुक्तिमुक्तिप्रदं सताम् ॥ ५६॥

अतः परं प्रवक्ष्यामि माहात्म्यं त्र्यम्बकस्य च ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते मानवः क्षणात् ॥ ५७॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां काशीविश्वेश्वरज्योतिर्लिङ्गमाहात्म्यवर्णनं नाम त्रयोविंशोऽध्यायः ॥ ४.२३॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.२४. चतुर्विंशोऽध्यायः । गौतमप्रभाववर्णनम् ।

सूत उवाच ।
श्रूयतामृषयः श्रेष्ठाः कथां पापप्रणाशिनीम् ।
कथयामि यथा व्यासात्सद्गुरोश्च श्रुता मया ॥ १॥

पुरा ऋषिवरश्चासीद्गौतमो नाम विश्रुतः ।
अहल्या नाम तस्यासीत्पत्नी परमधार्मिकी ॥ २॥

दक्षिणस्यां दिशि हि यो गिरिर्ब्रह्मेति संज्ञकः ।
तत्र तेन तपस्तप्तं वर्षाणामयुतं तथा ॥ ३॥

कदाचिच्च ह्यनावृष्टिरभवत्तत्र सुव्रताः ।
वर्षाणां च शतं रौद्री लोका दुःखमुपागताः ॥ ४॥

आर्द्रं च पल्लवं न स्म दृश्यते पृथिवीतले ।
कुतो जलं विदृश्येत जीवानां प्राणधारकम् ॥ ५॥

तदा ते मुनयश्चैव मनुष्याः पशवस्तथा ।
पक्षिणश्च मृगास्तत्र गताश्चैव दिशो दश ॥ ६॥

तां दृष्ट्वा चर्षयो विप्राः प्राणायामपरायणाः ।
ध्यानेन च तदा केचित्कालं निन्युः सुदारुणम् ॥ ७॥

गौतमोऽपि स्वयं तत्र वरुणार्थे तपः शुभम् ।
चकार चैव षण्मासं प्राणायामपरायणः ॥ ८॥

ततश्च वरुणस्तस्मै वरं दातुं समागतः ।
प्रसन्नोऽस्मि वरं ब्रूहि ददामि च वचोऽब्रवीत् ॥ ९॥

ततश्च गौतमस्तं वै वृष्टिं च प्रार्थयत्तदा ।
ततः स वरुणस्तं वै प्रत्युवाच मुनिं द्विजाः ॥ १०॥

वरुण उवाच ।
देवाज्ञां च समुल्लङ्घ्य कथं कुर्यामहं च ताम् ।
अन्यत्प्रार्थय सुज्ञोऽसि यदहं करवाणि ते ॥ ११॥

सूत उवाच ।
इत्येतद्वचनं तस्य वरुणस्य महात्मनः ।
परोपकारी तच्छ्रुत्वा गौतमो वाक्यमब्रवीत् ॥ १२॥

गौतम उवाच ।
यदि प्रसन्नो देवेश यदि देयो वरो मम ।
यदहं प्रार्थयाम्यद्य कर्तव्यं हि त्वया तथा ॥ १३॥

यतस्त्वं जलराशीशस्तस्माद्देयं जलं मम ।
अक्षयं सर्वदेवेश दिव्यं नित्यफलप्रदम् ॥ १४॥

सूत उवाच ।
इति सम्प्रार्थितस्तेन वरुणो गौतमेन वै ।
उवाच वचनं तस्मै गर्तश्च क्रियतां त्वया ॥ १५॥

इत्युक्ते च कृतस्तेन गर्तो हस्तप्रमाणतः ।
जलेन पूरितस्तेन दिव्येन वरुणेन सः ॥ १६॥

अथोवाच मुनिं देवो वरुणो हि जलाधिपः ।
गौतमं मुनिशार्दूलं परोपकृतिशालिनम् ॥ १७॥

वरुण उवाच ।
अक्षयं च जलं तेऽस्तु तीर्थभूतं महामुने ।
तव नाम्ना च विख्यातं क्षितावेतद्भविष्यति ॥ १८॥

अत्र दत्तं हुतं तप्तं सुराणां यजनं कृतम् ।
पितृणां च कृतं श्राद्धं सर्वमेवाक्षयं भवेत् ॥ १९॥

सूत उवाच ।
इत्युक्त्वान्तर्दधे देवः स्तुतस्तेन महर्षिणा ।
गौतमोऽपि सुखं प्राप कृत्वान्योपकृतिं मुनिः ॥ २०॥

महतो ह्याश्रयः पुंसां महत्त्वायोपजायते ।
महान्तस्तत्स्वरूपं च पश्यन्ति नेतरेऽशुभाः ॥ २१॥

यादृङ्नरं च सेवेत तादृशं फलमश्नुते ।
महतः सेवयोच्चत्वं क्षुद्रस्य क्षुद्रतां तथा ॥ २२॥

सिंहस्य मन्दिरे सेवा मुक्ताफलकरी मता ।
शृगालमन्दिरे सेवा त्वस्थिलाभकरी स्मृता ॥ २३॥

उत्तमानां स्वभावोऽयं परदुःखासहिष्णुता ।

स्वयं दुःखं च सम्प्राप्तं मन्यतेऽन्यस्य वार्यते ॥ २४॥

वृक्षाश्च हाटकं चैव चन्दनं चेक्षुकस्तथा ।
एते भुवि परार्थे च दक्षा एवं न केचन ॥ २५॥

दयालुरमदस्पर्श उपकारी जितेन्द्रियः ।
एतैश्च पुण्यस्तम्भैस्तु चतुर्भिर्धार्यते मही ॥ २६॥

ततश्च गौतमस्तत्र जलं प्राप्य सुदुर्लभम् ।
नित्यनैमित्तिकं कर्म चकार विधिवत्तदा ॥ २७॥

ततो व्रीहीन् यवांश्चैव नीवारानप्यनेकधा ।
वापयामास तत्रैव हवनार्थं मुनीश्वरः ॥ २८॥

धान्यानि विविधानीह वृक्षाश्च विविधास्तथा ।
पुष्पाणि च फलान्येव ह्यासंस्तत्राप्यनेकशः ॥ २९॥

तच्छ्रुत्वा ऋषयश्चान्ये तत्रायाताः सहस्रशः ।
पशवः पक्षिणश्चान्ये जीवाश्च बहवोऽगमन् ॥ ३०॥

तद्वनं सुन्दरं ह्यासीत्पृथिव्यां मण्डले परम् ।
तदक्षयजलायोगादनावृष्टिर्न दुःखदा ॥ ३१॥

ऋषयोऽपि वने तत्र शुभकर्मपरायणाः ।
वासं चक्रुरनेके च शिष्यभार्यासुतान्विताः ॥ ३२॥

धान्यानि वापयामासुः कालक्रमणहेतवे ।
आनन्दस्तद्वने ह्यासीत्प्रभावाद्गौतमस्य च ॥ ३३॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां त्र्यम्बकेश्वरमाहात्म्ये गौतमप्रभाववर्णनं नाम चतुर्विंशोऽध्यायः ॥ ४.२४॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.२५. पञ्चविंशोऽध्यायः । गौतमव्यवस्थावर्णनम् ।

सूत उवाच ।
कदाचिद्गौतमेनैव जलार्थं प्रेषिता निजाः ।
शिष्यास्तत्र गता भक्त्या कमण्डलुकरा द्विजाः ॥ १॥

शिष्यान् जलसमीपे तु गतान्दृष्ट्वा न्यषेधयन् ।
जलार्थमागतास्तत्र चर्षिपत्न्योऽप्यनेकशः ॥ २॥

ऋषिपत्न्यो वयं पूर्वं ग्रहीष्यामो विदूरतः ।
पश्चाच्चैव जलं ग्राह्यमित्येवं पर्यभर्त्सयन् ॥ ३॥

परावृत्य तदा तैश्च ऋषिपत्न्यै निवेदितम् ।
सा चापि तान्समादाय समाश्वास्य च तैः स्वयम् ॥ ४॥

जलं नीत्वा ददौ तस्मै गौतमाय तपस्विनी ।
नित्यं निर्वाहयामास जलेन ऋषिसत्तमः ॥ ५॥

ताश्चैवमृषिपत्न्यस्तु क्रुद्धास्तां पर्यभर्त्सयन् ।
परावृत्य गताः सर्वास्तूटजान्कुटिलाशयाः ॥ ६॥

स्वाम्यग्रे विपरीतं च तद्वृत्तं निखिलं ततः ।
दुष्टाशयाभिः स्त्रीभिश्च ताभिर्वै विनिवेदितम् ॥ ७॥

अथ तासां वचः श्रुत्वा भाविकर्मवशात्तदा ।
गौतमाय च सङ्क्रुद्धाश्चासंस्ते परमर्षयः ॥ ८॥

विघ्नार्थं गौतमस्यैव नानापूजोपहारकैः ।
गणेशं पूजयामासुः सङ्क्रुद्धास्ते कुबुद्धयः ॥ ९॥

आविर्बभूव च तदा प्रसन्नो हि गणेश्वरः ।
उवाच वचनं तत्र भक्ताधीनः फलप्रदः ॥ १०॥

गणेश उवाच ।
प्रसन्नोऽस्मि वरं ब्रूत यूयं किं करवाण्यहम् ।
तदीयं तद्वचः श्रुत्वा ऋषयस्तेऽब्रुवंस्तदा ॥ ११॥

ऋषय ऊचुः ।
त्वया यदि वरो देयो गौतमः स्वाश्रमाद बहिः ।
निष्काश्यमानो ऋषिभिः परिभर्त्स्य तथा कुरु ॥ १२॥

सूत उवाच ।
स एवं प्रार्थितस्तैस्तु विहस्य वचनं पुनः ।
प्रोवाचेभमुखः प्रीत्या बोधयंस्तान्सतां गतिः ॥ १३॥

गणेश उवाच ।
श्रूयतामृषयः सर्वे युक्तं न क्रियतेऽधुना ।
अपराधं विना तस्मै क्रुध्यतां हानिरेव च ॥ १४॥

उपस्कृतं पुरा यैस्तु तेभ्यो दुःखं हितं न हि ।
यदा च दीयते दुःखं तदा नाशो भवेदिह ॥ १५॥

ईदृशं च तपः कृत्वा साध्यते फलमुत्तमम् ।
शुभं फलं स्वयं हित्वा साध्यते नाहितं पुनः ॥ १६॥

सूत उवाच ।
इत्येवं वचनं श्रुत्वा तस्य ते मुनिसत्तमाः ।
बुद्धिमोहं तदा प्राप्ता इदमेव वचोऽब्रुवन् ॥ १७॥

ऋषय ऊचुः ॥

कर्तव्यं हि त्वया स्वामिन्निदमेव न चान्यथा ।
इत्युक्तस्तु तदा देवो गणेशो वाक्यमब्रवीत् ॥ १८॥

गणेश उवाच ।
असाधुः साधुतां चैव साधुश्चासाधुतां तथा ।
कदाचिदपि नाप्नोति ब्रह्मोक्तमिति निश्चितम् ॥ १९॥

यदा च भवतां दुःखं जातं चानशनात्पुरा ।
तदा सुखं प्रदत्तं वै गौतमेन महर्षिणा ॥ २०॥

इदानीं वै भवद्भिश्च तस्मै दुःखं प्रदीयते ।
नैतद्युक्ततमं लोके सर्वथा सुविचार्यताम् ॥ २१॥

स्त्रीबलान्मोहिता यूयं न मे वाक्यं करिष्यथ ।
एतद्धिततमं तस्य भविष्यति न संशयः ॥ २२॥

पुनश्चायमृषिश्रेष्ठो दास्यते वः सुखं ध्रुवम् ।
तारणं न च युक्तं स्याद्वरमन्यं वृणीत वै ॥ २३॥

सूत उवाच ।
इत्येवं वचनं तेन गणेशेन महात्मना ।
यद्यप्युक्तमृषिभ्यश्च तदप्येते न मेनिरे ॥ २४॥

भक्ताधीनतया सोऽथ शिवपुत्रोऽब्रवीत्तदा ।
उदासीनेन मनसा तानृषीन्दुष्टशेमुषीन् ॥ २५॥

गणेश उवाच ।
भवद्भिः प्रार्थ्यते यच्च करिष्येऽहं तथा खलु ।
पश्चाद्भावि भवेदेव इत्युक्त्वान्तर्दधे पुनः ॥ २६॥

गौतमः स न जानाति मुनीनां वै दुराशयम् ।
आनन्दमनसा नित्यं पत्न्या कर्म चकार तत् ॥ २७॥

तदन्तरे च यज्जातं चरित्रं वरयोगतः ।
तद्दुष्टर्षिप्रभावात्तु श्रूयतां तन्मुनीश्वराः ॥ २८॥

गौतमस्य च केदारे तत्रासन्व्रीहयो यवाः ।
गणेशस्तत्र गौर्भूत्वा जगाम किल दुर्बला ॥ २९॥

कम्पमाना च सा गत्वा तत्र तद्वरयोगतः ।
व्रीहीन्सम्भक्षयामास यवांश्च मुनिसत्तमाः ॥ ३०॥

एतस्मिन्नन्तरे दैवाद् गौतमस्तत्र चागतः ।
स दयालुस्तृणस्तम्बैर्वारयामास तां तदा ॥ ३१॥

तृणस्तम्बेन सा स्पृष्टा पपात पृथिवीतले ।
मृता च तत्क्षणादेव तदृषेः पश्यतस्तदा ॥ ३२॥

ऋषयश्छन्नरूपास्ते ऋषिपत्न्यस्तथाशुभाः ।
ऊचुस्तत्र तदा सर्वे किं कृतं गौतमेन च ॥ ३३॥

गौतमोऽपि तथाहल्यामाहूयासीत्सुविस्मितः ।
उवाच दुःखतो विप्रा दूयमानेन चेतसा ॥ ३४॥

गौतम उवाच ।
किं जातं च कथं देवि कुपितः परमेश्वरः ।
किं कर्तव्यं क्व गन्तव्यं हत्या च समुपस्थिता ॥ ३५॥

सूत उवाच ।

एतस्मिन्नन्तरे विप्रा गौतमं पर्यभर्त्सयन् ।
विप्रपत्न्यस्तथाहल्यां दुर्वचोभिर्व्यथां ददुः ॥ ३६॥

दुर्बुद्धयश्च तच्छिष्याः सुतास्तेषां तथैव च ।
गौतमं परिभर्त्स्यैव प्रत्यूचुर्धिग्वचो मुहुः ॥ ३७॥

ऋषय ऊचुः ।
मुखं न दर्शनीयं ते गम्यतां गम्यतामिति ।
दृष्ट्वा गोघ्नमुखं सद्यः सचैलं स्नानमाचरेत् ॥ ३८॥

यावदाश्रममध्ये त्वं तावदेव हविर्भुजः ।
पितरश्च न गृह्णन्ति ह्यस्मद्दत्तं हि किञ्चन ॥ ३९॥

तस्माद्गच्छान्यतस्त्वं च परिवारसमन्वितः ।
विलम्बं कुरु नैव त्वं धेनुहन्पापकारक ॥ ४०॥

सूत उवाच ।
इत्युक्त्वा ते च तं सर्वे पाषाणैः समताडयन् ।
व्यथां ददुरतीवास्मै त्वहल्यां च दुरुक्तिभिः ॥ ४१॥

ताडितो भर्त्सितो दुष्टैर्गौतमो गिरमब्रवीत् ।
इतो गच्छामि मुनयो ह्यन्यत्र निवसाम्यहम् ॥ ४२॥

इत्युक्त्वा गौतमस्तस्मात्स्थानाच्च निर्गतस्तदा ।
गत्वा क्रोशं तदा चक्रे ह्याश्रमं तदनुज्ञया ॥ ४३॥

यावच्चैवाभिशापो वै तावत्कार्यं न किञ्चन ।
न कर्मण्यधिकारोऽस्ति दैवे पित्र्येऽथ वैदिके ॥ ४४॥

मासार्धं च ततो नीत्वा मुनीन्सम्प्रार्थयत्तदा ।
गौतमो मुनिवर्यः स तेन दुःखेन दुखितः ॥ ४५॥

गौतम उवाच ।
अनुकम्प्यो भवद्भिश्च कथ्यतां क्रियते मया ।
यथा मदीयं पापं च गच्छत्विति निवेद्यताम् ॥ ४६॥

सूत उवाच ।
इत्युक्तास्ते तदा विप्रा नोचुश्चैव परस्परम् ।
अत्यन्तं सेवया पृष्टा मिलिता ह्येकतः स्थिताः ॥ ४७॥

गौतमो दूरतः स्थित्वा नत्वा तानृषिसत्तमान् ।
पप्रच्छ विनयाविष्टः किं कार्यं हि मयाधुना ॥ ४८॥

इत्युक्ते मुनिना तेन गौतमेन महात्मना ।
मिलिताः सकलास्ते वै मुनयो वाक्यमब्रुवन् ॥ ४९॥

ऋषय ऊचुः ।
निष्कृतिं हि विना शुद्धिर्जायते न कदाचन ।
तस्मात्त्वं देहशुद्ध्यर्थं प्रायश्चित्तं समाचर ॥ ५०॥

त्रिवारं पृथिवीं सर्वां क्रम पापं प्रकाशयन् ।
पुनरागत्य चात्रैव चर मासव्रतं तथा ॥ ५१॥

शतमेकोत्तरं चैव ब्रह्मणोऽस्य गिरेस्तथा ।
प्रक्रमणं विधायैवं शुद्धिस्ते च भविष्यति ॥ ५२॥

अथवा त्वं समानीय गङ्गास्नानं समाचर ।
पार्थिवानां तथा कोटिं कृत्वा देवं निषेवय ॥ ५३॥

गङ्गायां च ततः स्नात्वा पुतश्चैव भविष्यसि ।
पुरा दश तथा चैकं गिरेस्त्वं क्रमणं कुरु ॥ ५४॥

शतकुम्भैस्तथा स्नात्वा पार्थिवं निष्कृतिर्भवेत् ।
इति तैर्ऋषिभिः प्रोक्तस्तथेत्योमिति तद्वचः ॥ ५५॥

पार्थिवानां तथा पूजां गिरेः प्रक्रमणं तथा ।
करिष्यामि मुनिश्रेष्ठा आज्ञया श्रीमतामिह ॥ ५६॥

इत्युक्त्वा सर्षिवर्यश्च कृत्वा प्रक्रमणं गिरेः ।
पूजयामास निर्माय पार्थिवान्मुनिसत्तमः ॥ ५७॥

अहल्या च ततः साध्वी तच्च सर्वं चकार सा ।
शिष्याश्च प्रतिशिष्याश्च चक्रुः सेवां तयोस्तदा ॥ ५८॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां गौतमव्यवस्थावर्णनं नाम पञ्चविंशोऽध्यायः ॥ ४.२५॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥

चतुर्थी कोटिरुद्रसंहिता

## ४.२६. षड्विंशोऽध्यायः । त्र्यम्बकेश्वरमाहात्म्यवर्णनम् ।

सूत उवाच ।
एवं कृते तु ऋषिणा सस्त्रीकेन द्विजाः शिवः ।
आविर्बभूव सशिवः प्रसन्नः सगणस्तदा ॥ १॥

अथ प्रसन्नः सशिवो वरं ब्रूहि महामुने ।
प्रसन्नोऽहं सुभक्त्या त इत्युवाच कृपानिधिः ॥ २॥

तदा तत्सुन्दरं रूपं दृष्ट्वा शम्भोर्महात्मनः ।
प्रणम्य शङ्करं भक्त्या स्तुतिं चक्रे मुदान्वितः ॥ ३॥

स्तुत्वा बहु प्रणम्येशं बद्धाञ्जलिपुटः स्थितः ।
निष्पापं कुरु मां देवाब्रवीदिति स गौतमः ॥ ४॥

सूत उवाच ।
इत्याकर्ण्य वचस्तस्य गौतमस्य महात्मनः ।
सुप्रसन्नतरो भूत्वा शिवो वाक्यमुपाददे ॥ ५॥

शिव उवाच ।
धन्योऽसि कृतकृत्योऽसि निष्पापोऽसि सदा मुने ।
एतैर्दुष्टैः किल त्वं च छलितोऽसि खलात्मभिः ॥ ६॥

त्वदीयदर्शनाल्लोका निष्पापाश्च भवन्ति हि ।
किं पुनस्त्वं सपापोऽसि मद्भक्तिनिरतः सदा ॥ ७॥

उपद्रवस्त्वयि मुने यैः कृतस्तु दुरात्मभिः ।
ते पापाश्च दुराचारा हत्यावन्तस्त एव हि ॥ ८॥

एतेषां दर्शनादन्ये पापिष्ठाः सम्भवन्तु च ।
कृतघ्नाश्च तथा जाता नैतेषां निष्कृतिः क्वचित् ॥ ९॥

सूत उवाच ।
इत्युक्त्वा शङ्करस्तस्मै तेषां दुश्चरितं तदा ।
बहूवाच प्रभुर्विप्राः सत्कदोऽसत्सु दण्डदः ॥ १०॥

शर्वोक्तमिति स श्रुत्वा सुविस्मितमना ऋषिः ।

सुप्रणम्य शिवं भक्त्या साञ्जलिः पुनरब्रवीत् ॥ ११॥

गौतम उवाच ।
ऋषिभिस्तैर्महेशान ह्युपकारः कृतो महान् ।
यद्येवं न कृतं तैस्तु दर्शनं ते कुतो भवेत् ॥ १२॥

धन्यास्ते ऋषयो यैस्तु मह्यं शुभतरं कृतम् ।
तद्दुराचरणादेव मम स्वार्थो महानभूत् ॥ १३॥

सूत उवाच ।
इत्येवं तद्वचः श्रुत्वा सुप्रसन्नो महेश्वरः ।
गौतमं प्रत्युवाचाशु कृपादृष्ट्या विलोक्य च ॥ १४॥

शिव उवाच ।
ऋषिर्धन्योऽसि विप्रेन्द्र ऋषिश्रेष्ठतरोऽसि वै ।
ज्ञात्वा मां सुप्रसन्नं हि वृणु त्वं वरमुत्तमम् ॥ १५॥

सूत उवाच ।
गौतमोऽपि विचार्यैवं लोके विश्रुतमित्युत ।
अन्यथा न भवेदेव तस्मादुक्तं समाचरेत् ॥ १६॥

निश्चित्यैवं मुनिश्रेष्ठो गौतमः शिवभक्तिमान् ।
साञ्जलिर्नतशीर्षो हि शङ्करं वाक्यमब्रवीत् ॥ १७॥

गौतम उवाच ।
सत्यं नाथ ब्रवीषि त्वं तथापि पञ्चभिः कृतम् ।
नान्यथा भवतीत्यत्र यज्जातं जायतां तु तत् ॥ १८॥

यदि प्रसन्नो देवेश गङ्गा च दीयतां मम ।
कुरु लोकोपकारं हि नमस्तेऽस्तु नमोऽस्तु ते ॥ १९॥

सूत उवाच ।
इत्युक्त्वा वचनं तस्य धृत्वा वै पादपङ्कजम् ।
नमश्चकार देवेशं गौतमो लोककाम्यया ॥ २०॥

ततस्तु शङ्करो देवः पृथिव्याश्च दिवश्च सः ।
सारं चैव समुद्धृत्य रक्षितं पूर्वमेव तत् ॥ २१॥

विवाहे ब्रह्मणा दत्तमवशिष्टं च किञ्चन ।

तत्तस्मै दत्तवान् शम्भुर्मुनये भक्तवत्सलः ॥ २२॥

गङ्गाजलं तदा तत्र स्त्रीरूपमभवत्परम् ।
तस्याश्चैव ऋषिश्रेष्ठः स्तुतिं कृत्वा नतिं व्यधात् ॥ २३॥

गौतम उवाच ।
धन्यासि कृतकृत्यासि पावितं भुवनं त्वया ।
मां च पावय गङ्गे त्वं पतन्तं निरये ध्रुवम् ॥ २४॥

सूत उवाच ।
शम्भुश्चापि तदोवाच सर्वेषां हितकृच्छृणु ।
गङ्गे गौतममेनं त्वं पावयस्व मदाज्ञया ॥ २५॥

इति श्रुत्वा वचस्तस्य शम्भोश्च गौतमस्य च ।
उवाचैव शिवं गङ्गा शिवशक्तिर्हि पावनी ॥ २६॥

गङ्गोवाच ।
ऋषिं तु पावयित्वाहं परिवारयुतं प्रभो ।
गमिष्यामि निजस्थानं वचः सत्यं ब्रवीमि ह ॥ २७॥

सूत उवाच ।
इत्युक्तं गङ्गया तत्र महेशो भक्तवत्सलः ।
लोकोपकरणार्थाय पुनर्गङ्गां वचोऽब्रवीत् ॥ २८॥

शिव उवाच ।
त्वया स्थातव्यमत्रैवाव्रजेद्यावत्कलिर्युगः ।
वैवस्वतो मनुर्देवि ह्यष्टाविंशत्तमो भवेत् ॥ २९॥

सूत उवाच ।
इति श्रुत्वा वचस्तस्य स्वामिनः शङ्करस्य तत् ।
प्रत्युवाच पुनर्गङ्गा पावनी सा सरिद्वरा ॥ ३०॥

गङ्गोवाच ।
माहात्म्यमधिकं चेत्स्यान्मम स्वामिन्महेश्वर ।
सर्वेभ्यश्च तदा स्थास्ये धरायां त्रिपुरान्तक ॥ ३१॥

किञ्चान्यच्च शृणु स्वामिन्वपुषा सुन्दरेण ह ।
तिष्ठ त्वं मत्समीपे वै सगणः साम्बिकः प्रभो ॥ ३२॥

सूत उवाच ।
एवं तस्या वचः श्रुत्वा शङ्करो भक्तवत्सलः ।
लोकोपकरणार्थाय पुनर्गङ्गां वचोऽब्रवीत् ॥ ३३॥

शिव उवाच ।
धन्यासि श्रूयतां गङ्गे ह्यहं भिन्नस्त्वया न हि ।
तथापि स्थीयते ह्यत्र स्थीयतां च त्वयापि हि ॥ ३४॥

सूत उवाच ।
इत्येवं वचनं श्रुत्वा स्वामिनः परमेशितुः ।
प्रसन्नमानसा भूत्वा गङ्गा च प्रत्यपूजयत् ॥ ३५॥

एतस्मिन्नन्तरे देवा ऋषयश्च पुरातनाः ।
सुतीर्थान्यप्यनेकानि क्षेत्राणि विविधानि च ॥ ३६॥

आगत्य गौतमं सर्वे गङ्गां च गिरिशं तथा ।
जय जयेति भाषन्तः पूजयामासुरादरात् ॥ ३७॥

ततस्ते निर्जराः सर्वे तेषां चक्रुः स्तुतिं मुदा ।
करान् बध्वा नतस्कन्धा हरिब्रह्मादयस्तदा ॥ ३८॥

गङ्गा प्रसन्ना तेभ्यश्च गिरिशश्चोचतुस्तदा ।
वरं ब्रूत सुरश्रेष्ठा दद्वो वः प्रियकाम्यया ॥ ३९॥

देवा ऊचुः ।
यदि प्रसन्नो देवेश प्रसन्ना त्वं सरिद्वरे ।
स्थातव्यमत्र कृपया नः प्रियार्थं तथा नृणाम् ॥ ४०॥

गङ्गोवाच ।
यूयं सर्वप्रियार्थं च तिष्ठथात्र न किं पुनः ।
गौतमं क्षालयित्वाहं गमिष्यामि यथागतम् ॥ ४१॥

भवत्सु मे विशेषोऽत्र ज्ञेयश्चैव कथं सुराः ।
तत्प्रमाणं कृतं चेत्स्यात्तदा तिष्ठाम्यसंशयम् ॥ ४२॥

सर्वे ऊचुः ।
सिंहराशौ यदा स्याद्वै गुरुः सर्वसुहृत्तमः ।
तदा वयं च सर्वे त्वागमिष्यामो न संशयः ॥ ४३॥

एकादश च वर्षाणि लोकानां पातकं त्विह ।
क्षालितं यद्भवेदेवं मलिनाः स्मः सरिद्वरे ॥ ४४॥

तस्यैव क्षालनाय त्वायास्यामः सर्वथा प्रिये ।
त्वत्सकाशं महादेवि प्रोच्यते सत्यमादरात् ॥ ४५॥

अनुग्रहाय लोकानामस्माकं प्रियकाम्यया ।
स्थातव्यं शङ्करेणापि त्वया चैव सरिद्वरे ॥ ४६॥

यावत्सिंहे गुरुश्चैव स्थास्यामस्तावदेव हि ।
त्वयि स्नानं त्रिकालं च शङ्करस्य च दर्शनम् ॥ ४७॥

कृत्वा स्वपापं निखिलं विमोक्ष्यामो न संशयः ।
स्वदेशांश्च गमिष्यामो भवच्छासनतो वयम् ॥ ४८॥

सूत उवाच ।
इत्येवं प्रार्थितस्तैस्तु गौतमेन महर्षिणा ।
स्थितोऽसौ शङ्करः प्रीत्या स्थिता सा च सरिद्वरा ॥ ४९॥

सा गङ्गा गौतमी नाम्ना लिङ्गं त्र्यम्बकमीरितम् ।
ख्याताख्यातं बभूवाथ महापातकनाशनम् ॥ ५०॥

तद्दिनं हि समारभ्य सिंहस्थे च बृहस्पतौ ।
आयान्ति सर्वतीर्थानि क्षेत्राणि दैवतानि च ॥ ५१॥

सरांसि पुष्करादीनि गङ्गाद्याः सरितस्तथा ।
वासुदेवादयो देवाः सन्ति वै गौतमीतटे ॥ ५२॥

यावत्तत्र स्थितानीह तावत्तेषां फलं न हि ।
स्वप्रदेशे समायातास्तर्ह्येतेषां फलं भवेत् ॥ ५३॥

ज्योतिर्लिङ्गमिदं प्रोक्तं त्र्यम्बकं नाम विश्रुतम् ।
स्थितं तटे हि गौतम्या महापातकनाशनम् ॥ ५४॥

यः पश्येद्भक्तितो ज्योतिर्लिङ्गं त्र्यम्बकनामकम् ।
पूजयेत्प्रणमेत्स्तुत्वा सर्वपापैः प्रमुच्यते ॥ ५५॥

ज्योतिर्लिङ्गं त्र्यम्बकं हि पूजितं गौतमेन ह ।
सर्वकामप्रदं चात्र परत्र परमुक्तिदम् ॥ ५६॥

इति वश्च समाख्यातं यत्पृष्टोऽहं मुनीश्वराः ।

किमन्यदिच्छथ श्रोतुं तद् ब्रूयां वो न संशयः ॥ ५७॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां त्र्यम्बकेश्वरमाहात्म्यवर्णनं नाम षड्विंशोऽध्यायः ॥ ४.२६॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.२७. सप्तविंशोऽध्यायः । त्र्यम्बकेश्वरज्योतिर्लिङ्गमाहात्म्यवर्णनम् ।

ऋषय ऊचुः ।
गङ्गा च जलरूपेण कुतो जाता वद प्रभो ।
तन्माहात्म्यं विशेषेण कुतो जातं वद प्रभो ॥ १॥

यैर्विप्रैर्गौतमायैव दुःखं दत्तं दुरात्मभिः ।
तेषां किं च ततो जातमुच्यतां व्याससद्गुरो ॥ २॥

सूत उवाच ।
एवं सम्प्रार्थिता गङ्गा गौतमेन तदा स्वयम् ।
ब्रह्मणश्च गिरेर्विप्रा द्रुतं तस्मादवातरत् ॥ ३॥

औदुम्बरस्य शाखायास्तत्प्रवाहो विनिःसृतः ।
तत्र स्नानं मुदा चक्रे गौतमो विश्रुतो मुनिः ॥ ४॥

गौतमस्य च ये शिष्या अन्ये चैव महर्षयः ।
समागताश्च ते तत्र स्नानं चक्रुर्मुदान्विताः ॥ ५॥

गङ्गाद्वारं च तन्नाम प्रसिद्धमभवत्तदा ।
सर्वपापहरं रम्यं दर्शनान्मुनिसत्तमाः ॥ ६॥

गौतमस्पर्द्धिनस्ते च ऋषयस्तत्र चागताः ।
स्नानार्थं तांश्च सा दृष्ट्वा ह्यन्तर्धानं गता द्रुतम् ॥ ७॥

मा मेति गौतमस्तत्र व्याजहार वचो द्रुतम् ।
मुहुर्मुहुः स्तुवन् गङ्गां साञ्जलिर्नतमस्तकः ॥ ८॥

गौतम उवाच ।

इमे च श्रीमदान्धाश्च साधवो वाप्यसाधवः ।
एतत्पुण्यप्रभावेण दर्शनं दीयतां त्वया ॥ ९॥

सूत उवाच ।
ततो वाणी समुत्पन्ना गङ्गाया व्योममण्डलात् ।
तच्छृणुध्वमृषिश्रेष्ठा गङ्गावचनमुत्तमम् ॥ १०॥

एते दुष्टतमाश्चैव कृतघ्नाः स्वामिद्रोहिणः ।
जाल्माः पाखण्डिनश्चैव द्रष्टुं वर्ज्याश्च सर्वदा ॥ ११॥

गौतम उवाच ।
मातश्च श्रूयतामेतन्महतां गिर एव च ।
तस्मात्त्वया च कर्त्तव्यं सत्यं च भगवद् वचः ॥ १२॥

अपकारिषु यो लोक उपकारं करोति वै ।
तेन पूतो भवाम्यत्र भगवद्वचनं त्विदम् ॥ १३॥

सूत उवाच ।
इति श्रुत्वा मुनेर्वाक्यं गौतमस्य महात्मनः ।
पुनर्वाणी समुत्पन्ना गङ्गाया व्योममण्डलात् ॥ १४॥

कथ्यते हि त्वया सत्यं गौतमर्षे शिवं वचः ।
तथापि सङ्ग्रहार्थं च प्रायश्चित्तं चरन्तु वै ॥ १५॥

शतमेकोत्तरं चात्र कार्यं प्रक्रमणं गिरेः ।
भवच्छासनतस्त्वेतैस्त्वदधीनैर्विशेषतः ॥ १६॥

ततश्चैवाधिकारश्च जायते दुष्टकारिणाम् ।
मद्दर्शने विशेषेण सत्यमुक्तं मया मुने ॥ १७॥

इति श्रुत्वा वचस्तस्याश्चक्रुर्वै ते तथाखिलाः ।
सम्प्रार्थ्य गौतमं दीनाः क्षन्तव्यो नोऽपराधकः ॥ १८॥

एवं कृते तदा तेन गौतमेन तदाज्ञया ।
कुशावर्तं नाम चक्रे गङ्गाद्वारादधोगतम् ॥ १९॥

ततः प्रादुरभूत्तत्र सा तस्य प्रीतये पुनः ।
कुशावर्तं च विख्यातं तीर्थमासीदनुत्तमम् ॥ २०॥

तत्र स्नातो नरो यस्तु मोक्षाय परिकल्पते ।

त्यक्त्वा सर्वानघान्सद्यो विज्ञानं प्राप्य दुर्लभम् ॥ २१॥

गौतमो ऋषयश्चान्ये मिलिताश्च परस्परम् ।
लज्जितास्ते तदा ये च कृतघ्ना ह्यभवन्पुरा ॥ २२॥

ऋषय ऊचुः ॥

अस्माभिरन्यथा सूत श्रुतं तद्वर्णयामहे ।
गौतमस्तान्द्विजान् क्रुद्धः शशापेति प्रबुध्यताम् ॥ २३॥

सूत उवाच ।
द्विजास्तदपि सत्यं वै कल्पभेदसमाश्रयात् ।
वर्णयामि विशेषेण तां कथामपि सुव्रताः ॥ २४॥

गौतमोऽपि ऋषीन्दृष्ट्वा तदा दुर्भिक्षपीडितान् ।
तपश्चकार सुमहद्वरुणस्य महात्मनः ॥ २५॥

अक्षय्यं कल्पयामास जलं वरुणदायया ।
ततो व्रीहीन् यवांश्चैव वापयामास भूरिशः ॥ २६॥

एवं परोपकारी स गौतमो मुनिसत्तमः ।
आहारं कल्पयामास तेभ्यः स्वतपसो बलात् ॥ २७॥

कदाचित्तत्स्त्रियो दुष्टा जलार्थमपमानिताः ।
ऊचुः पतिभ्यस्ताः क्रुद्धा गौतमेर्ष्याकरं वचः ॥ २८॥

ततस्ते भिन्नमतयो गां कृत्वा कृत्रिमां द्विजाः ।
तद्धान्यभक्षणासक्तां चक्रुस्तां कुटिलाशयाः ॥ २९॥

स्वधान्यभक्षणासक्तां गां दृष्ट्वा गौतमस्तदा ।
तृणेन ताडयामास शनैस्तां सन्निवारयन् ॥ ३०॥

तृणसंस्पर्शमात्रेण सा भूमौ पतिता च गौः ।
मृता ह्यभूत्क्षणं विप्रा भाविकर्मवशात्तदा ॥ ३१॥

गौर्हता गौतमेनेति तदा ते कुटिलाशयाः ।
एकत्रीभूय तत्रत्याः सकला ऋषयोऽवदन् ॥ ३२॥

ततः स गौतमो भीतो गौर्हतेति बभूव ह ।
चकार विस्मयं नार्यहल्याशिष्यैः शिवानुगः ॥ ३३॥

ततः स गौतमो ज्ञात्वा तां गां क्रोधसमाकुलः ।
शशाप तानृषीन् सर्वान् गौतमो मुनिसत्तमः ॥ ३४॥

गौतम उवाच ।
यूयं सर्वे दुरात्मानो दुःखदा मे विशेषतः ।
शिवभक्तस्य सततं स्युर्वेदविमुखाः सदा ॥ ३५॥

अद्यप्रभृति वेदोक्ते सत्कर्मणि विशेषतः ।
मा भूयाद्भवतां श्रद्धा शैवमार्गे विमुक्तिदे ॥ ३६॥

अद्यप्रभृति दुर्मार्गे तत्र श्रद्धा भवेत्तु वः ।
मोक्षमार्गविहीने हि सदा श्रुतिबहिर्मुखे ॥ ३७॥

अद्यप्रभृति भालानि मृल्लिप्तानि भवन्तु वः ।
स्त्रंसध्वं नरके यूयं भालमृल्लेपना द्विजाः ॥ ३८॥

भवन्तो मा भविष्यन्तु शिवैकपरदैवताः ।
अन्यदेव समत्वेन जानन्तु शिवमद्वयम् ॥ ३९॥

मा भूयाद्भवतां प्रीतिः शिवपूजादिकर्मणि ।
शिवनिष्ठेषु भक्तेषु शिवपर्वसु सर्वदा ॥ ४०॥

अद्य दत्ता मया शापा यावन्तो दुःखदायकाः ।
तावन्तः सन्तु भवतां सन्ततावपि सर्वदा ॥ ४१॥

अशैवाः सन्तु भवतां पुत्रपौत्रादयो द्विजाः ।
पुत्रैः सहैव तिष्ठन्तु भवन्तो नरके ध्रुवम् ॥ ४२॥

ततो भवन्तु चाण्डाला दुःखदारिद्र्यपीडिताः ।
शठा निन्दाकराः सर्वे तप्तमुद्राङ्किताः सदा ॥ ४३॥

सूत उवाच ।
इति शप्त्वा मुनीन् सर्वान् गौतमः स्वाश्रमं ययौ ।
शिवभक्तिं चकारातिं स बभूव सुपावनः ॥ ४४॥

ततस्तैः खिन्नहृदया ऋषयस्तेऽखिला द्विजाः ।
काञ्च्यां चक्रुर्निवासं हि शैवधर्मबहिष्कृताः ॥ ४५॥

तत्पुत्राश्चाभवन्सर्वे शैवधर्मबहिष्कृताः ।
अग्रे तद्वद्भविष्यन्ति कलौ बहुजनाः खलाः ॥ ४६॥

इति प्रोक्तमशेषेण तद्वृत्तं मुनिसत्तमाः ।
पूर्ववृत्तमपि प्राज्ञाः श्रुतं सर्वैस्तु चादरात् ॥ ४७॥

इति वश्च समाख्यातो गौतम्याश्च समुद्भवः ।
माहात्म्यमुत्तमं चैव सर्वपापहरं परम् ॥ ४८॥

त्र्यम्बकस्य च माहात्म्यं ज्योतिर्लिङ्गस्य कीर्तितम् ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ ४९॥

अतः परं प्रवक्ष्यामि वैद्यनाथेश्वरस्य हि ।
ज्योतिर्लिङ्गस्य माहात्म्यं श्रूयतां पापहारकम् ॥ ५०॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां त्र्यम्बकेश्वरज्योतिर्लिङ्गमाहात्म्यवर्णनं नाम सप्तविंशोऽध्यायः ॥ ४.२७॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.२८. अष्टाविंशोऽध्यायः । वैद्यनाथेश्वरज्योतिर्लिङ्गमाहात्म्यवर्णम् ।

सूत उवाच ।
रावणो राक्षसश्रेष्ठो मानी मानपरायणः ।
आरराध हरं भक्त्या कैलासे पर्वतोत्तमे ॥ १॥

आराधितः कियत्कालं न प्रसन्नो हरो यदा ।
तदा चान्यत्तपश्चक्रे प्रसादार्थं शिवस्य सः ॥ २॥

ततश्चायं हिमवतः सिद्धिस्थानस्य वै गिरेः ।
पौलस्त्यो रावणः श्रीमान् दक्षिणे वृक्षखण्डके ॥ ३॥

भूमौ गर्तं वरं कृत्वा तत्राग्निं स्थाप्य स द्विजाः ।
तत्सन्निधौ शिवं स्थाप्य हवनं स चकार ह ॥ ४॥

ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः ।
शीते जलान्तरस्थो हि त्रिधा चक्रे तपश्च सः ॥ ५॥

चकारैवं बहु तपो न प्रसन्नस्तदापि हि ।

परमात्मा महेशानो दुराराध्यो दुरात्मभिः ॥ ६॥

ततः शिरांसि छित्त्वा च पूजनं शङ्करस्य वै ।
प्रारब्धं दैत्यपतिना रावणेन महात्मना ॥ ७॥

एकैकं च शिरश्छिन्नं विधिना शिवपूजने ।
एवं सत्क्रमतस्तेन छिन्नानि नव वै यदा ॥ ८॥

एकस्मिन्नवशिष्टे तु प्रसन्नः शङ्करस्तदा ।
आविर्बभूव तत्रैव सन्तुष्टो भक्तवत्सलः ॥ ९॥

शिरांसि पूर्ववत्कृत्वा नीरुजानि तथा प्रभुः ।
मनोरथं ददौ तस्मै चातुलं बलमुत्तमम् ॥ १०॥

प्रसादं तस्य सम्प्राप्य रावणः स च राक्षसः ।
प्रत्युवाच शिवं शम्भुं नतस्कन्धः कृताञ्जलिः ॥ ११॥

रावण उवाच ।
प्रसन्नो भव देवेश लङ्कां च त्वां नयाम्यहम् ।
सफलं कुरु मे कामं त्वामहं शरणं गतः ॥ १२॥

सूत उवाच ।
इत्युक्तश्च तदा तेन शम्भुर्वै रावणेन सः ।
प्रत्युवाच विचेतस्कः सङ्कटं परमं गतः ॥ १३॥

शिव उवाच ।
श्रूयतां राक्षसश्रेष्ठ वचो मे सारवत्तया ।
नीयतां स्वगृहे मे हि सद्भक्त्या लिङ्गमुत्तमम् ॥ १४॥

भूमौ लिङ्गं यदा त्वं च स्थापयिष्यसि यत्र वै ।
स्थास्यत्यत्र न सन्देहो यथेच्छसि तथा कुरु ॥ १५॥

सूत उवाच ।
इत्युक्तः शम्भुना तेन रावणो राक्षसेश्वरः ।
तथेति तत्समादाय जगाम भवनं निजम् ॥ १६॥

आसीन्मूत्रोत्सर्गकामो मार्गे हि शिवमायया ।
तत्स्तम्भितुं न शक्तोऽभूत्पौलस्त्यो रावणः प्रभुः ॥ १७॥

दृष्ट्वैकं तत्र वै गोपं प्रार्थ्य लिङ्गं ददौ च तत् ।

मुहूर्तके ह्यतिक्रान्ते गोपोऽभूद्विकलस्तदा ॥ १८॥

भूमौ संस्थापयामास तद्भारेणातिपीडितः ।
तत्रैव तत्स्थितं लिङ्गं वज्रसारसमुद्भवम् ।
सर्वकामप्रदं चैव दर्शनात्पापहारकम् ॥ १९॥

वैद्यनाथेश्वरं नाम्ना तल्लिङ्गमभवन्मुने ।
प्रसिद्धं त्रिषु लोकेषु भुक्तिमुक्तिप्रदं सताम् ॥ २०॥

ज्योतिर्लिङ्गमिदं श्रेष्ठं दर्शनात्पूजनादपि ।
सर्वपापहरं दिव्यं मुक्तिवर्धनमुत्तमम् ॥ २१॥

तस्मिँल्लिङ्गे स्थिते तत्र सर्वलोकहिताय वै ।
रावणः स्वगृहं गत्वा वरं प्राप्य महोत्तमम् ।
प्रियायै सर्वमाचख्यौ सुखेनाति महासुरः ॥ २२॥

तच्छ्रुत्वा सकला देवाः शक्राद्या मुनयस्तथा ।
परस्परं समामन्त्र्य शिवासक्तधियोऽमलाः ॥ २३॥

तस्मिन्काले सुराः सर्वे हरिब्रह्मादयो मुने ।
आजग्मुस्तत्र सुप्रीत्या पूजां चक्रुर्विशेषतः ॥ २४॥

प्रत्यक्षं तं तदा दृष्ट्वा प्रतिष्ठाप्य च ते सुराः ।
वैद्यनाथेति सम्प्रोच्य नत्वा नुत्वा दिवं ययुः ॥ २५॥

ऋषय ऊचुः ।
तस्मिँल्लिङ्गे स्थिते तत्र रावणे च गृहं गते ।
किं चरित्रमभूत्तात ततस्तद्वद विस्तरात् ॥ २६॥

सूत उवाच ।
रावणोऽपि गृहं गत्वा वरं प्राप्य महोत्तमम् ।
प्रियायै सर्वमाचख्यौ मुमोदाति महासुरः ॥ २७॥

तच्छ्रुत्वा सकलं देवाः शक्राद्या मुनयस्तथा ।
परस्परं समूचुस्ते समुद्विग्ना मुनीश्वराः ॥ २८॥

देवादय ऊचुः ॥

रावणोऽयं दुरात्मा हि देवद्रोही खलः कुधीः ।
शिवाद् वरं च सम्प्राप्य दुःखं दास्यति नोऽति सः ॥ २९॥

किं कुर्मः क्व च गच्छामः किं भविष्यति वा पुनः ।
दुष्टश्च दक्षतां प्राप्तः किं किं नो साधयिष्यति ॥ ३० ॥

इति दुःखं समापन्नाः शक्राद्या मुनयः सुराः ।
नारदं च समाहूय पप्रच्छुर्विकलास्तदा ॥ ३१ ॥

देवा ऊचुः ।
सर्वं कार्यं समर्थोऽसि कर्तुं त्वं मुनिसत्तम ।
उपायं कुरु देवर्षे देवानां दुःखनाशने ॥ ३२ ॥

रावणोऽयं महादुष्टः किं किं नैव करिष्यति ।
क्व यास्यामो वयं चात्र दुष्टेनापीडिता वयम् ॥ ३३ ॥

नारद उवाच ।
दुःखं त्यजत भो देवा युक्तिं कृत्वा च याम्यहम् ।
देवकार्यं करिष्यामि कृपया शङ्करस्य वै ॥ ३४ ॥

सूत उवाच ।
इत्युक्त्वा स तु देवर्षिरगमद्रावणालयम् ।
सत्कारं समनुप्राप्य प्रीत्योवाचाखिलं च तत् ॥ ३५ ॥

नारद उवाच ।
राक्षसोत्तम धन्यस्त्वं शैववर्यस्तपोधन ।
त्वां दृष्ट्वा च मनो मेऽद्य प्रसन्नमति रावण ॥ ३६ ॥

स्ववृत्तं ब्रूह्यशेषेण शिवाराधनसम्भवम् ।
इति पृष्टस्तदा तेन रावणो वाक्यमब्रवीत् ॥ ३७ ॥

रावण उवाच ।
गत्वा मया तु कैलासे तपोऽर्थं च महामुने ।
तत्रैव बहुकालं वै तपस्तप्तं सुदारुणम् ॥ ३८ ॥

यदा न शङ्करस्तुष्टस्ततश्च परिवर्तितम् ।
आगत्य वृक्षखण्डे वै पुनस्तप्तं मया मुने ॥ ३९ ॥

ग्रीष्मे पञ्चाग्निमध्ये तु वर्षासु स्थण्डिलेशयः ।
शीते जलान्तरस्थो हि कृतं चैव त्रिधा तपः ॥ ४० ॥

एवं मया कृतं तत्र तपोऽत्युग्रं मुनीश्वर ।

तथापि शङ्करो मह्यं न प्रसन्नोऽभवन्मनाक् ॥ ४१॥

तदा मया तु क्रुद्धेन भूमौ गर्तं विधाय च ।
तत्राग्निं च समाधाय पार्थिवं च प्रकल्प्य च ॥ ४२॥

गन्धैश्च चन्दनैश्चैव धूपैश्च विविधैस्तदा ।
नैवेद्यैः पूजितः शम्भुरारार्तिकविधानतः ॥ ४३॥

प्रणिपातैः स्तवैः पुण्यैस्तोषितः शङ्करो मया ।
गीतैर्नृत्यैश्च वाद्यैश्च मुखाङ्गुलिसमर्पणैः ॥ ४४॥

एतैश्च विविधैश्चान्यैरुपायैर्भूरिभिर्मुने ।
शास्त्रोक्तेन विधानेन पूजितो भगवान् हरः ॥ ४५॥

न तुष्टः सम्मुखो जातो यदा च भगवान् हरः ।
तदाहं दुःखितोऽभूवं तपसोऽप्राप्य सत्फलम् ॥ ४६॥

धिक् शरीरं बलं चैव धिक् तपःकरणं मम ।
इत्युक्त्वा तु मया तत्र स्थापितेऽग्नौ हुतं बहु ॥ ४७॥

पुनश्चेति विचार्यैव त्यक्षाम्यग्नौ निजां तनुम् ।
सञ्छिन्नानि शिरांस्येव तस्मिन् प्रज्वलिते शुचौ ॥ ४८॥

सुच्छित्वैकैकशस्तानि कृत्वा शुद्धानि सर्वशः ।
शङ्करायार्पितान्येव नवसङ्ख्यानि वै मया ॥ ४९॥

यावच्च दशमं छेत्तुं प्रारब्धमृषिसत्तम ।
तावदाविरभूत्तत्र ज्योतीरूपो हरः स्वयम् ॥ ५०॥

मा मेति व्याहरत् प्रीत्या द्रुतं वै भक्तवत्सलः ।
प्रसन्नश्च वरं ब्रूहि ददामि मनसेप्सितम् ॥ ५१॥

इत्युक्ते च तदा तेन मया दृष्टो महेश्वरः ।
प्रणतः संस्तुतश्चैव करौ बध्वा सुभक्तितः ॥ ५२॥

तदा वृतं मयैतच्च देहि मे ह्यतुलं बलम् ।
यदि प्रसन्नो देवेश दुर्लभं किं भवेन्मम ॥ ५३॥

शिवेन परितुष्टेन सर्वं दत्तं कृपालुना ।
मह्यं मनोऽभिलषितं गिरा प्रोच्य तथास्त्विति ॥ ५४॥

अमोघया सुदृष्ट्या वै वैद्यवद्योजितानि मे ।
शिरांसि सन्धयित्वा तु दृष्टानि परमात्मना ॥ ५५॥

एवं कृते तदा तत्र शरीरं पूर्ववन्मम ।
जातं तस्य प्रसादाच्च सर्वं प्राप्तं फलं मया ॥ ५६॥

तदा च प्रार्थितो मे संस्थितोऽसौ वृषभध्वजः ।
वैद्यनाथेश्वरो नाम्ना प्रसिद्धोऽभूज्जगत्त्रये ॥ ५७॥

दर्शनात्पूजनाज्ज्योतिर्लिङ्गरूपो महेश्वरः ।
भुक्तिमुक्तिप्रदो लोके सर्वेषां हितकारकः ॥ ५८॥

ज्योतिर्लिङ्गमहं तद्वै पूजयित्वा विशेषतः ।
प्रणिपत्यागतश्चात्र विजेतुं भुवनत्रयम् ॥ ५९॥

सूत उवाच ।
तदीयं तद्वचः श्रुत्वा देवर्षिर्जातसम्भ्रमः ।
विहस्य च मनस्येव रावणं नारदोऽब्रवीत् ॥ ६०॥

नारद उवाच ।
श्रूयतां राक्षसश्रेष्ठ कथयामि हितं तव ।
त्वया तदेव कर्त्तव्यं मदुक्तं नान्यथा क्वचित् ॥ ६१॥

त्वयोक्तं यच्छिवेनैव हितं दत्तं ममाधुना ।
तत्सर्वं च त्वया सत्यं न मन्तव्यं कदाचन ॥ ६२॥

अयं वै विकृतिं प्राप्तः किं किं नैव ब्रवीति च ।
सत्यं नैव भवेत्तद्वै कथं ज्ञेयं प्रियोऽसि मे ॥ ६३॥

इति गत्वा पुनः कार्यं कुरु त्वं ह्यहिताय वै ।
कैलासोद्धरणे यत्नः कर्तव्यश्च त्वया पुनः ॥ ६४॥

यदि चैवोद्धृतश्चायं कैलासो हि भविष्यति ।
तदैव सफलं सर्वं भविष्यति न संशयः ॥ ६५॥

पूर्ववत्स्थापयित्वा त्वं पुनरागच्छ वै सुखम् ।
निश्चयं परमं गत्वा यथेच्छसि तथा कुरु ॥ ६६॥

सूत उवाच ।
इत्युक्तः स हितं मेने रावणो विधिमोहितः ।

सत्यं मत्वा मुनेर्वाक्यं कैलासमगमत्तदा ॥ ६७॥

गत्वा तत्र समुद्धारं चक्रे तस्य गिरेः स च ।
तत्रस्थं चैव तत्सर्वं विपर्यस्तं परस्परम् ॥ ६८॥

गिरीशोऽपि तदा दृष्ट्वा किं जातमिति सोऽब्रवीत् ।
गिरिजा च तदा शम्भुं प्रत्युवाच विहस्य तम् ॥ ६९॥

गिरिजोवाच ।
सच्छिष्यस्य फलं जातं सम्यग्जातं तु शिष्यतः ।
शान्तात्मने सुवीराय दत्तं यदतुलं बलम् ॥ ७०॥

सूत उवाच ।
गिरिजायाश्च साकूतं वचः श्रुत्वा महेश्वरः ।
कृतघ्नं रावणं मत्वा शशाप बलदर्पितम् ॥ ७१॥

महादेव उवाच ।
रे रे रावण दुर्भक्त मा गर्वं वह दुर्मते ।
शीघ्रं च तव हस्तानां दर्पघ्नश्च भवेदिह ॥ ७॥

सूत उवाव ।
इति तत्र च यज्जातं नारदः श्रुतवांस्तदा ।
रावणोऽपि प्रसन्नात्मागात्स्वधाम यथागतम् ॥ ७३॥

निश्चयं परमं कृत्वा बली बलविमोहितः ।
जगद्वशं हि कृतवान् रावणः परदर्पहा ॥ ७४॥

शिवाज्ञया च प्राप्तेन दिव्यास्त्रेण महौजसा ।
रावणस्य प्रतिभटो नालं कश्चिदभूत्तदा ॥ ७५॥

इत्येतच्च समाख्यातं वैद्यनाथेश्वरस्य च ।
माहात्म्यं शृणवतां पापं नृणां भवति भस्मसात् ॥ ७६॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां वैद्यनाथेश्वरज्योतिर्लिङ्गमाहात्म्यवर्णनं नामाष्टाविंशोऽध्यायः ॥ ४.२८॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥

चतुर्थी कोटिरुद्रसंहिता

## ४.२९. एकोनत्रिंशोऽध्यायः । दारुकावनराक्षसोपद्रववर्णनम् ।

सूत उवाच ।
अथातः सम्प्रवक्ष्यामि नागेशाख्यं परात्मनः ।
ज्योतीरूपं यथा जातं परमं लिङ्गमुत्तमम् ॥ १॥

दारुका राक्षसी काचित्पार्वतीवरदर्पिता ।
दारुकश्च पतिस्तस्या बभूव बलवत्तरः ॥ २॥

बहुभी राक्षसैस्तत्र चकार कदनं सताम् ।
यज्ञध्वंसं च लोकानां धर्मध्वंसं तदाकरोत् ॥ ३॥

पश्चिमे सागरे तस्य वनं सर्वसमृद्धिमत् ।
योजनानां षोडशभिर्विस्तृतं सर्वतो दिशम् ॥ ४॥

दारुका स्वविलासार्थं यत्र गच्छति तद्वनम् ।
भूम्या च तरुभिस्तत्र सर्वोपकरणैर्युतम् ॥ ५॥

दारुकायै ददौ देवी तद्वनस्यावलोकनम् ।
प्रयाति तद्वनं सा हि पत्या सह यदृच्छया ॥ ६॥

तत्र स्थित्वा तदा सोऽपि सर्वेषां च भयं ददौ ।
दारुको राक्षसः पत्न्या तया दारुकया सह ॥ ७॥

ते सर्वे पीडिता लोका और्वस्य शरणं ययुः ।
नत्वा प्रीत्या विशेषेण तमूचुर्नतमस्तकाः ॥ ८॥

लोका ऊचुः ।
महर्षे शरणं देहि नो चेद्दुष्टैश्च मारिताः ।
सर्वं कर्तुं समर्थोऽसि तेजसा दीप्तिमानसि ॥ ९॥

पृथ्व्यां न वर्तते कश्चित्त्वां विना शरणं च नः ।
यामो यस्य समीपे तु स्थित्वा सुखमवाप्नुमः ॥ १०॥

त्वां दृष्ट्वा राक्षसाः सर्वे पलायन्ते विदूरतः ।
त्वयि शैवं सदा तेजो विभाति ज्वलनो यथा ॥ ११॥

सूत उवाच ।

इत्येवं प्रार्थितो लोकैरौर्वो हि मुनिसत्तमः ।
शोचमानः शरण्यश्च रक्षायै हि वचोऽब्रवीत् ॥ १२॥

और्व उवाच ।
पृथिव्यां यदि रक्षांसि हिंस्युर्वै प्राणिनस्तदा ।
स्वयं प्राणैर्वियुज्येयू राक्षसा बलवत्तराः ॥ १३॥

यदा यज्ञाश्च हन्येरंस्तदा प्राणैर्वियोजिताः ।
भवन्तु राक्षसाः सर्वे सत्यमेतन्मयोच्यते ॥ १४॥

सूत उवाच ।
इत्युक्त्वा वचनं तेभ्यः समाश्वास्य प्रजाः पुनः ।
तपश्चकार विविधमौर्वो लोकसुखावहः ॥ १५॥

देवास्तदा ते विज्ञाय शापस्य कारणं हि तत् ।
युद्धाय च समुद्योगं चक्रुर्देवारिभिः सह ॥ १६॥

सर्वैश्चैव प्रयत्नैश्च नानायुधधराः सुराः ।
सर्वे शक्रादयस्तत्र युद्धार्थं समुपागताः ॥ १७॥

तान्दृष्ट्वा राक्षसास्तत्र विचारे तत्पराः पुनः ।
बभूवुस्तेऽखिला दुष्टा मिथो ये यत्र संस्थिताः ॥ १८॥

राक्षसा ऊचुः ।
किं कर्तव्यं क्व गन्तव्यं सङ्कटं समुपागताः ।
युध्यते म्रियते चैव युध्यते न विहन्यते ॥ १९॥

तथैव स्थीयते चेद्वै भक्ष्यते किं परस्परम् ।
दुःखं हि सर्वथा जातं क एनं विनिवारयेत् ॥ २०॥

सूत उवाच ।
विचार्येति च ते तत्र दारुकाद्याश्च राक्षसाः ।
उपायं न विजानन्तो दुःखं प्राप्ताः सदा हि वै ॥ २१॥

दारुका राक्षसी चापि ज्ञात्वा दुःखं समागतम् ।
भवान्याश्च वरं तं च कथयामास सा तदा ॥ २२॥

दारुकोवाच ।
मया ह्याराधिता पूर्वं भवपत्नी वरं ददौ ।

वनं गच्छ निजैः सार्धं यत्र गन्तुं त्वमिच्छसि ॥ २३॥

तद्वरश्च मया प्राप्तः कथं दुःखं विषह्यते ।
जले वनं च नीत्वा वै सुखं स्थेयं तु राक्षसैः ॥ २४॥

सूत उवाच ।
तस्यास्तद्वचनं श्रुत्वा राक्षस्या हर्षमागताः ।
ऊचुः सर्वे मिथस्ते हि राक्षसा निर्भयास्तदा ॥ २५॥

धन्येयं कृतकृत्येयं राज्ञ्या वै जीविताः स्वयम् ।
नत्वा तस्यै च तत्सर्वं कथयामासुरादरात् ॥ २६॥

यदि गन्तुं भवेच्छक्तिर्गम्यतां किं विचार्यते ।
तत्र गत्वा जले देवि सुखं स्थास्याम नित्यशः ॥ २७॥

एतस्मिन्नन्तरे लोका देवैः सार्धं समागताः ।
युद्धाय विविधैर्दुःखैः पीडिता राक्षसैः पुरा ॥ २८॥

पीडिताश्च तदा तस्या भवान्या बलमाश्रिताः ।
समग्रं नगरं नीत्वा जलस्थलसमन्वितम् ॥ २९॥

जय जयेति देव्यास्तु स्तुतिमुच्चार्य राक्षसी ।
तत उड्डीयनं कृत्वा सपक्षो गिरिराड्यथा ॥ ३०॥

समुद्रस्य च मध्ये सा संस्थिता निर्भया तदा ।
सकलैः परिवारैश्च मुमुदेति शिवानुगा ॥ ३१॥

तत्र सिन्धौ च ते स्थित्वा नगरे च विलासिनः ।
राक्षसाश्च सुखं प्रापुर्निर्भयाश्च विजह्रिरे ॥ ३२॥

राक्षसाश्च पृथिव्यां वै नाजग्मुश्च कदाचन ।
मुनेः शापभयादेव बभ्रमुस्ते चले तदा ॥ ३३॥

नौषु स्थितान् जनान्नीत्वा नगरे तत्र तांस्तदा ।
चिक्षिपुर्बन्धनागारे कांश्चिज्जघ्नुस्तदा हि ते ॥ ३४॥

यथा यथा पुनः पीडां चक्रुस्ते राक्षसास्तदा ।
तत्र स्थिता भवान्याश्च वरदानाच्च निर्भयाः ॥ ३५॥

यथा पूर्वं स्थले लोके भयं चासीन्निरन्तरम् ।
तथा भयं जले तेषामासीन्नित्यं मुनीश्वराः ॥ ३६॥

कदाचिद्राक्षसी सा च निःसृता नगराज्जले ।
रुद्ध्वा मार्गं स्थिता लोकपीडार्थं धरणौ च हि ॥ ३७॥

एतस्मिन्नन्तरे तत्र नावो बहुतराः शुभाः ।
आगता बहुधा तत्र सर्वतो लोकसंवृताः ॥ ३८॥

ता नावश्च तदा दृष्ट्वा हर्षं सम्प्राप्य राक्षसाः ।
द्रुतं गत्वा हि तत्रस्थान्वेगात्सन्दध्रिरे खलाः ॥ ३९॥

आजग्मुर्नगरं ते च तानादाय महाबलाः ।
चिक्षिपुर्बन्धनागारे बद्ध्वा हि निगडैर्दृढैः ॥ ४०॥

बद्धास्ते निगडैर्लोकाः संस्थिता बन्धनालये ।
अतीव दुःखमाजग्मुर्भर्त्सितास्ते मुहुर्मुहुः ॥ ४१॥

तेषां मध्ये च योऽधीशः स वैश्यः सुप्रियाभिधः ।
शिवप्रियः शुभाचारः शैवश्चासीत्सदातनः ॥ ४२॥

विना च शिवपूजां वै न तिष्ठति कदाचन ।
सर्वथा शिवधर्मा हि भस्मरुद्राक्षभूषणः ॥ ४३॥

यदि पूजा न जाता चेन्न भुनक्ति तदा तु सः ।
अतस्तत्रापि वैश्योऽसौ चकार शिवपूजनम् ॥ ४४॥

कारागृहगतः सोऽपि बहूंश्चाशिक्षयत्तदा ।
शिवमन्त्रं च पूजां च पार्थिवीमृषिसत्तमाः ॥ ४५॥

ते सर्वे च तदा तत्र शिवपूजां स्वकामदाम् ।
चक्रिरे विधिवत्तत्र यथादृष्टं यथाश्रुतम् ॥ ४६॥

केचित्तत्र स्थिता ध्याने बद्ध्वासनमनुत्तमम् ।
मानसीं शिवपूजां च केचिच्चक्रुर्मुदान्विताः ॥ ४७॥

तदाधीशेन तत्रैव प्रत्यक्षं शिवपूजनम् ।
कृतं च पार्थिवस्यैव विधानेन मुनीश्वराः ॥ ४८॥

अन्ये च ये न जानन्ति विधानं स्मरणं परम् ।
नमः शिवाय मन्त्रेण ध्यायन्तः शङ्करं स्थिताः ॥ ४९॥

सुप्रियो नाम यश्चासीद्वैश्यवर्यः शिवप्रियः ।

ध्यायँश्च मनसा तत्र चकार शिवपूजनम् ॥ ५०॥

यथोक्तरूपी शम्भुश्च प्रत्यक्षं सर्वमाददे ।
सोऽपि स्वयं न जानाति गृह्यते न शिवेन वै ॥ ५१॥

एवं च क्रियमाणस्य वैश्यस्य शिवपूजनम् ।
व्यतीयुस्तत्र षण्मासा निर्विघ्नेन मुनीश्वराः ॥ ५२॥

अतः परं च यज्जातं चरितं शशिमौलिनः ।
तच्छृणुध्वमृषिश्रेष्ठाः सावधानेन चेतसा ॥ ५३॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां नागेश्वरज्योतिर्लिङ्गमाहात्म्ये दारुकावनराक्षसोपद्रववर्णनं नामैकोनत्रिंशोऽध्यायः ॥ ४.२९॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.३०. त्रिंशोऽध्यायः । नागेश्वरज्योतिर्लिङ्गोद्भवमाहात्म्यवर्णनम् ।

सूत उवाच ।
कदाचित्सेवकस्तस्य राक्षसस्य दुरात्मनः ।
तदग्रे सुन्दरं रूपं शङ्करस्य ददर्श ह ॥ १॥

तस्मै निवेदितं राज्ञे राक्षसानां यथार्थकम् ।
सर्वं तच्चरितं तेन सकौतुकमथाद्भुतम् ॥ २॥

राजापि तत्र चागत्य राक्षसानां स दारुकः ।
विह्वलः सबलः शीघ्रं पर्यपृच्छच्च तं शिवम् ॥ ३॥

दारुक उवाच ।
किं ध्यायसि हि वैश्य त्वं सत्यं वद ममाग्रतः ।
एवं सति न मृत्युस्ते मम वाक्यं च नान्यथा ॥ ४॥

सूत उवाच ।
तेनोक्तं च न जानामि तच्छ्रुत्वा कुपितः स वै ।
राक्षसान्प्रेरयामास हन्यतां राक्षसा अयम् ॥ ५॥

तदुक्तास्ते तदा हन्तुं नानायुधधरा गताः ।
द्रुतं तं वैश्यशार्दूलं शङ्करासक्तचेतसम् ॥ ६॥

तानागतांस्तदा दृष्ट्वा भयवित्रस्तलोचनः ।
शिवं सस्मार सुप्रीत्या तन्नामानि जगौ मुहुः ॥ ७॥

वैश्यपतिरुवाच ।
पाहि शङ्कर देवेश पाहि शम्भो शिवेति च ।
दुष्टादस्मात्त्रिलोकेश खलहन् भक्तवत्सल ॥ ८॥

सर्वस्वं च भवानद्य मम देव त्वमेव हि ।
त्वदधीनस्त्वदीयोऽहं त्वत्प्राणः सर्वदा प्रभो ॥ ९॥

सूत उवाच ।
इति सम्प्रार्थितः शम्भुर्विवरान्निर्गतस्तदा ।
भवनेनोत्तमेनाथ चतुर्द्वारयुतेन च ॥ १०॥

मध्य ज्योतिःस्वरूपं च शिवरूपं तदद्भुतम् ।
परिवारसमायुक्तं दृष्ट्वा चापूजयत्स वै ॥ ११॥

पूजितश्च तदा शम्भुः प्रसन्नो ह्यभवत्स्वयम् ।
अस्त्रं पाशुपतं नाम दत्त्वा राक्षसपुङ्गवान् ॥ १२॥

जघान सोपकरणांस्तान्सर्वान्सगणान्द्रुतम् ।
अरक्षच्च स्वभक्तं वै दुष्टहा स हि शङ्करः ॥ १३॥

सर्वांस्तांश्च तदा हत्वा वरं प्रादाद्वनस्य च ।
अत्यद्भुतकरः शम्भुः स्वलीलात्तसुविग्रहः ॥ १४॥

अस्मिन्वने सदा वर्णधर्मा वै सम्भवन्तु च ।
ब्राह्मणक्षत्रियविशां शूद्राणां हि तथैव च ॥ १५॥

भवन्त्वत्र मुनिश्रेष्ठास्तामसा न कदाचन ।
शिवधर्मप्रवक्तारः शिवधर्मप्रवर्तकाः ॥ १६॥

सूत उवाच ।
एतस्मिन्समये सा वै राक्षसी दारुकाह्वया ।
देव्याः स्तुतिं चकारासौ पार्वत्या दीनमानसा ॥ १७॥

प्रसन्ना च तदा देवी किं करोमीत्युवाच हि ।

साप्युवाच पुनस्तत्र वंशो मे रक्ष्यतां त्वया ॥ १८॥

रक्षयिष्यामि ते वंशं सत्यं च कथ्यते मया ।
इत्युक्त्वा च शिवेनैव विग्रहं सा चकार ह ॥ १९॥

शिवोऽपि कुपितां देवीं दृष्ट्वा वरवशः प्रभुः ।
प्रत्युवाचेति सुप्रीत्या यथेच्छसि तथा कुरु ॥ २०॥

सूत उवाच ।
इति श्रुत्वा वचस्तस्य स्वपतेः शङ्करस्य वै ।
सुप्रसन्ना विहस्याशु पार्वती वाक्यमब्रवीत् ॥ २१॥

पार्वत्युवाच ।
भवदीयं वचस्तथ्यं युगान्ते सम्भविष्यति ।
तावच्च तामसी सृष्टिर्भवत्विति मतं मम ॥ २२॥

अन्यथा प्रलयः स्याद्वै सत्यं मे व्याहृतं शिव ।
प्रमाणीक्रियतां नाथ त्वदीयास्मि त्वदाश्रया ॥ २३॥

इयं च दारुका देवी राक्षसी शक्तिका मम ।
बलिष्ठा राक्षसीनां च रक्षोराज्यं प्रशास्तु च ॥ २४॥

इमा राक्षसपत्न्यस्तु प्रसविष्यन्ति पुत्रकान् ।
ते सर्वे मिलिताश्चैव वने वासाय मे मताः ॥ २५॥

सूत उवाच ।
इत्येवं वचनं श्रुत्वा पार्वत्याः स्वस्त्रियाः प्रभुः ।
प्रसन्नमानसो भूत्वा शङ्करो वाक्यमब्रवीत् ॥ २६॥

शङ्कर उवाच ।
इति ब्रवीषि त्वं वै चेच्छृणु मद्वचनं प्रिये ।
स्थास्याम्यस्मिन्वने प्रीत्या भक्तानां पालनाय च ॥ २७॥

अत्र मे वर्णधर्मस्थो दर्शनं प्रीतिसंयुतम् ।
करिष्यति च यो वै स चक्रवर्ती भविष्यति ॥ २८॥

अन्यथा कलिपर्याये सत्यस्यादौ नृपेश्वरः ।
महासेनयुतो यो वै वीरसेनेति विश्रुतः ॥ २९॥

स मे भक्त्यातिविक्रान्तो दर्शनं मे करिष्यति ।

दर्शनं मे स कृत्वैव चक्रवर्ती भविष्यति ॥ ३०॥

सूत उवाच ।
इत्येवं दम्पती तौ च कृत्वा हास्यं परस्परम् ।
स्थितौ तत्र स्वयं साक्षान्महोतीकारकौ द्विजाः ॥ ३१॥

ज्योतिर्लिङ्गस्वरूपो हि नाम्ना नागेश्वरः शिवः ।
नागेश्वरी शिवा देवी बभूव च सतां प्रियौ ॥ ३२॥

ऋषय ऊचुः ।
वीरसेनः कथं तत्र यास्यते दारुकावने ।
कथमर्चिष्यति शिवं त्वं तद्वद महामते ॥ ३३॥

सूत उवाच ।
निषधे सुन्दरे देशे क्षत्रियाणां कुले च सः ।
महासेनसुतो वीरसेनश्चैव शिवप्रियः ॥ ३४॥

पार्थिवेशार्चनं कृत्वा तपः परमदुष्करम् ।
चकार वीरसेनो वै वर्षाणां द्वादशावधिः ॥ ३५॥

ततः प्रसन्नो देवेशः प्रत्यक्षं प्राह शङ्करः ।
काष्ठस्य मत्स्यिकां कृत्वा त्रपुधातुविलेपनाम् ॥ ३६॥

विधाय योगमायां च दास्यामि वीरसेनक ।
तां गृहीत्वा प्रविश्यैनं नौभिः सह व्रजाधुना ॥ ३७॥

ततस्त्वं तत्र गत्वा च विवरे च कृते मया ।
प्रविश्य च तदा पूजां कृत्वा नागेश्वरस्य च ॥ ३८॥

ततः पाशुपतं प्राप्य हत्वा च राक्षसीमुखान् ।
मयि दृष्टे तदा किञ्चिन्न्यूनं ते न भविष्यति ॥ ३९॥

पार्वत्याश्च बलं चैव सम्पूर्णं वै भविष्यति ।
अन्ये च म्लेच्छरूपा ये भविष्यन्ति वने शुभाः ॥ ४०॥

इत्युक्त्वा शङ्करस्तत्र वीरसेनं हि दुःखहा ।
कृत्वा कृपां च महतीं तत्रैवान्तर्दधे प्रभुः ॥ ४१॥

इति दत्तवरः सोऽपि शिवेन परमात्मना ।
शक्तः सर्वं तदा कर्तुं सम्बभूव न संशयः ॥ ४२॥

एवं नागेश्वरो देव उत्पन्नो ज्योतिषां पतिः ।
लिङ्गरूपस्त्रिलोकस्य सर्वकामप्रदः सदा ॥ ४३॥

एतद्यः शृणुयान्नित्यं नागेशोद्भवमादरात् ।
सर्वान्कामानियाद्धीमान्महापातकनाशनान् ॥ ४४॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां नागेश्वरज्योतिर्लिङ्गोद्भवमाहात्म्यवर्णनं नाम त्रिंशोऽध्यायः ॥ ४.३०॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.३१. एकत्रिंशोऽध्यायः । रामेश्वरमाहात्म्यवर्णनम् ।

सूत उवाच ।
अतः परं प्रवक्ष्यामि लिङ्गं रामेश्वराभिधम् ।
उत्पन्नं च यथा पूर्वमृषयः शृणुतादरात् ॥ १॥

पुरा विष्णुः पृथिव्यां चावततार सतां प्रियः ॥ २॥

तत्र सीता हृता विप्रा रावणेनोरुमायिना ।
प्रापिता स्वगृहं सा हि लङ्कायां जनकात्मजा ॥ ३॥

अन्वेषणपरस्तस्याः किष्किन्धाख्यां पुरीमगात् ।
सुग्रीवहितकृद्भूत्वा वालिनं सञ्जघान ह ॥ ४॥

तत्र स्थित्वा कियत्कालं तदन्वेषणतत्परः ।
सुग्रीवाद्यैर्लक्ष्मणेन विचारं कृतवान्स वै ॥ ५॥

कपीन् सम्प्रेषयामास चतुर्दिक्षु नृपात्मजः ।
हनुमत्प्रमुखान् रामस्तदन्वेषणहेतवे ॥ ६॥

अथ ज्ञात्वा गतां लङ्कां सीतां कपिवराननात् ।
सीताचूडामणिं प्राप्य मुमुदे सोऽति राघवः ॥ ७॥

सकपीशस्तदा रामो लक्ष्मणेन युतो द्विजाः ।
सुग्रीवप्रमुखैः पुण्यैर्वानरैर्बलवत्तरैः ॥ ८॥

पद्मैरष्टादशाख्यैश्च ययौ तीरं पयोनिधेः ।
दक्षिणे सागरे यो वै दृश्यते लवणाकरः ॥ ९॥

तत्रागत्य स्वयं रामो वेलायां संस्थितो हि सः ।
वानरैः सेव्यमानस्तु लक्ष्मणेन शिवप्रियः ॥ १०॥

हा जानकि कुतो याता कदा चेयं मिलिष्यति ।
अगाधः सागरश्चैवातार्या सेना च वानरी ॥ ११॥

राक्षसो गिरिधर्ता च महाबलपराक्रमः ।
लङ्काख्यो दुर्गमो दुर्ग इन्द्रजित्तनयोऽस्य वै ॥ १२॥

इत्येवं स विचार्यैव तटे स्थित्वा सलक्ष्मणः ।
आश्वासितो वनौकोभिरङ्गदादिपुरः सरैः ॥ १३॥

एतस्मिन्नन्तरे तत्र राघवः शैवसत्तमः ।
उवाच भ्रातरं प्रीत्या जलार्थी लक्ष्मणाभिधम् ॥ १४॥

श्रीराम उवाच ।
भ्रातर्लक्ष्मण वीरेशाहं जलार्थी पिपासितः ।
तदानय द्रुतं पाथो वानरैः कैश्चिदेव हि ॥ १५॥

सूत उवाच ।
तच्छ्रुत्वा वानरास्तत्र ह्यधावन्त दिशो दश ।
नीत्वा जलं च ते प्रोचुः प्रणिपत्य पुरः स्थिताः ॥ १६॥

वानरा ऊचुः ।
जलं च गृह्यतां स्वामिन्नानीतं तत्त्वदाज्ञया ।
महोत्तमं च सुस्वादु शीतलं प्राणतर्पणम् ॥ १७॥

सूत उवाच ।
सुप्रसन्नतरो भूत्वा कृपादृष्ट्या विलोक्य तान् ।
तच्छ्रुत्वा रामचन्द्रोऽसौ स्वयं जग्राह तज्जलम् ॥ १८॥

स शैवस्तज्जलं नीत्वा पातुमारब्धवान्यदा ।
तदा च स्मरणं जातमित्थमस्य शिवेच्छया ॥ १९॥

न कृतं दर्शनं शम्भोर्गृह्यते च जलं कथम् ।
स्वस्वामिनः परेशस्य सर्वानन्दप्रदस्य वै ॥ २०॥

इत्युक्त्वा च जलं मुक्तं तदा रघुवरेण च ।
पश्चाच्च पार्थिवीं पूजां चकार रघुनन्दनः ॥ २१॥

आवाहनादिकांश्चैव ह्युपचारान्प्रकल्प्य वै ।
विधिवत्षोडशं प्रीत्या देवमानर्च शङ्करम् ॥ २२॥

प्रणिपातैः स्तवैर्दिव्यैः शिवं सन्तोष्य यत्नतः ।
प्रार्थयामास सद्भक्त्या स रामः शङ्करं मुदा ॥ २३॥

श्रीराम उवाच ।
स्वामिन् शम्भो महादेव सर्वदा भक्तवत्सल ।
पाहि मां शरणापन्नं त्वद्भक्तं दीनमानसम् ॥ २४॥

एतज्जलमगाधं च वारिधेर्भवतारण ।
रावणाख्यो महावीरो राक्षसो बलवत्तरः ॥ २५॥

वानराणां बलं ह्येतच्चञ्चलं युद्धसाधनम् ।
मम कार्यं कथं सिद्धं भविष्यति प्रियाप्तये ॥ २६॥

तस्मिन्देव त्वया कार्यं साहाय्यं मम सुव्रत ।
साहाय्यं ते विना नाथ मम कार्यं हि दुर्लभम् ॥ २७॥

त्वदीयो रावणोऽपीह दुर्जयः सर्वथाखिलैः ।
त्वद्दत्तवरदृप्तश्च महावीरस्त्रिलोकजित् ॥ २८॥

अप्यहं तव दासोऽस्मि त्वदधीनश्च सर्वथा ।
विचार्येति त्वया कार्यः पक्षपातः सदाशिव ॥ २९॥

सूत उवाच ।
इत्येवं स च सम्प्रार्थ्य नमस्कृत्य पुनः पुनः ।
तदा जय जयेत्युच्चैरुद्घोषैः शङ्करेति च ॥ ३०॥

इति स्तुत्वा शिवं तत्र मन्त्रध्यानपरायणः ।
पुनः पूजां ततः कृत्वा स्वाम्यग्रे स ननर्त ह ॥ ३१॥

प्रेमविक्लिन्नहृदयो गल्लनादं यदाकरोत् ।
तदा च शङ्करो देवः सुप्रसन्नो बभूव ह ॥ ३२॥

साङ्गः सपरिवारश्च ज्योतीरूपो महेश्वरः ।
यथोक्तरूपममलं कृत्वाविरभवद् द्रुतम् ॥ ३३॥

ततः सन्तुष्टहृदयो रामभक्त्या महेश्वरः ।
शिवमस्तु वरं ब्रूहि रामेति स तदाब्रवीत् ॥ ३४॥

तद्रूपं च तदा दृष्ट्वा सर्वे पूतास्ततः स्वयम् ।
कृतवान् राघवः पूजां शिवधर्मपरायणः ॥ ३५॥

स्तुतिं च विविधां कृत्वा प्रणिपत्य शिवं मुदा ।
जयं च प्रार्थयामास रावणाजौ तदात्मनः ॥ ३६॥

ततः प्रसन्नहृदयो रामभक्त्या महेश्वरः ।
जयोऽस्तु ते महाराज प्रीत्या स पुनरब्रवीत् ॥ ३७॥

शिवदत्तं जयं प्राप्य ह्यनुज्ञां समवाप्य च ।
पुनश्च प्रार्थयामास साञ्जलिर्नतमस्तकः ॥ ३८॥

श्रीराम उवाच ।
त्वया स्थेयमिह स्वामिंल्लोकानां पावनाय च ।
परेषामुपकारार्थं यदि तुष्टोऽसि शङ्कर ॥ ३९॥

सूत उवाच ।
इत्युक्तस्तु शिवस्तत्र लिङ्गरूपोऽभवत्तदा ।
रामेश्वरश्च नाम्ना वै प्रसिद्धो जगतीतले ॥ ४०॥

रामस्तु तत्प्रभावाद्वै सिन्धुमुत्तीर्य चाञ्जसा ।
रावणादीन्निहत्याशु राक्षसान्प्राप तां प्रियाम् ॥ ४१॥

रामेश्वरस्य महिमाद्भुतोऽभूद्भुवि चातुलः ।
भुक्तिमुक्तिप्रदश्चैव सर्वदा भक्तकामदः ॥ ४२॥

दिव्यगङ्गाजलेनैव स्नापयिष्यति यः शिवम् ।
रामेश्वरं च सद्भक्त्या स जीवन्मुक्त एव हि ॥ ४३॥

इह भुक्त्वाखिलान्भोगान्देवानां दुर्लभानपि ।
अन्ते प्राप्य परं ज्ञानं कैवल्यं प्राप्नुयाद् ध्रुवम् ॥ ४४॥

इति वश्च समाख्यातं ज्योतिर्लिंगं शिवस्य तु ।
रामेश्वराभिधं दिव्यं शृण्वतां पापहारकम् ॥ ४५॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां रामेश्वरमाहात्म्यवर्णनं नामैकत्रिंशोऽध्यायः ॥ ४.३१॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.३२. द्वात्रिंशोऽध्यायः । सुदेहासुधर्माचरितवर्णनम् ।

सूत उवाच ।
अतः परं च घुश्मेशं ज्योतिर्लिङ्गमुदाहृतम् ।
तस्यैव च सुमाहात्म्यं श्रूयतामृषिसत्तमाः ॥ १॥

दक्षिणस्यां दिशि श्रेष्ठो गिरिर्देवेति संज्ञकः ।
महाशोभान्वितो नित्यं राजतेऽद्भुतदर्शनः ॥ २॥

तस्यैव निकटे कश्चिद्भारद्वाजकुलोद्भवः ।
सुधर्मा नाम विप्रश्च न्यवसद् ब्रह्मवित्तमः ॥ ३॥

तस्य प्रिया सुदेहा च शिवधर्मपरायणा ।
पतिसेवापरा नित्यं गृहकर्मविचक्षणा ॥ ४॥

सुधर्मा च द्विजश्रेष्ठो देवतातिथिपूजकः ।
वेदमार्गपरो नित्यमग्निसेवापरायणः ॥ ५॥

त्रिकालसन्ध्यया युक्तः सूर्यरूपसमद्युतिः ।
शिष्याणां पाठकश्चैव वेदशास्त्रविचक्षणः ॥ ६॥

धनवांश्च परो दाता सौजन्यगुणभाजनः ।
शिवकर्मरतो नित्यं शैवः शैवजनप्रियः ॥ ७॥

आयुर्बहु व्यतीयाय तस्य धर्मं प्रकुर्वतः ।
पुत्रश्च नाभवत्तस्य ऋतुः स्यादफलः स्त्रियाः ॥ ८॥

तेन दुःखं कृतं नैव वस्तुज्ञानपरेण हि ।
आत्मनस्तारकश्चात्मा ह्यात्मनः पावनश्च सः ॥ ९॥

इत्येवं मानसं धृत्वा दुःखं न कृतवान्स्तदा ।
सुदेहा च तदा दुःखं चकारापुत्रसम्भवम् ॥ १०॥

नित्यं च स्वामिनं सा वै प्रार्थयद्यत्नसाधने ।

पुत्रोत्पादनहेतोश्च सर्वविद्याविशारदम् ॥ ११॥

सोऽपि स्त्रियं तदाभर्त्स्य किं पुत्रश्च करिष्यति ।
का माता कः पिता पुत्रः को बन्धुश्च प्रियश्च कः ॥ १२॥

सर्वं स्वार्थपरं देवि त्रिलोक्यां नात्र संशयः ।
जानीहि त्वं विशेषेण बुद्ध्या शोकं न वै कुरु ॥ १३॥

तस्माद्देवि त्वया दुःखं त्यजनीयं सुनिश्चितम् ।
नित्यं मह्यं त्वया नैव कथनीयं शुभव्रते ॥ १४॥

एवं तां सन्निवार्यैव भगवद्धर्मतत्परः ।
आसीत्परमसन्तुष्टो द्वन्द्वदुःखं समत्यजत् ॥ १५॥

कदाचिच्च सुदेहा वै गेहे च सहवासिनः ।
जगाम प्रियगोष्ठ्यर्थं विवादस्तत्र सङ्गतः ॥ १६॥

तत्पत्नी स्त्रीस्वभावाच्च भर्त्सिता सा तया तदा ।
उक्ता चेति दुरुक्त्या वै सुदेहा विप्रकामिनी ॥ १७॥

पत्न्युवाच ।
अपुत्रिणि कथं गर्वं कुरुषे पुत्रिणी ह्यहम् ।
मद्धनं भोक्ष्यते पुत्रो धनं ते कश्च भोक्ष्यते ॥ १८॥

नूनं हरिष्यते राजा त्वद्धनं नात्र संशयः ।
धिग्धित्त्वां ते धनं धिक्क धिक् ते मानं हि वन्ध्यके ॥ १९॥

सूत उवाच ।
भर्त्सिता ताभिरिति सा गृहमागत्य दुःखिता ।
स्वामिने कथयामास तदुक्तं सर्वमादरात् ॥ २०॥

ब्राह्मणोऽपि तदा दुःखं न चकार सुबुद्धिमान् ।
कथितं कथ्यतामेव यद्भावि तद्भवेत्प्रिये ॥ २१॥

इत्येवं च तदा तेन ह्याश्वस्तापि पुनः पुनः ।
न तदा सात्यजद्दुःखं ह्याग्रहं कृतवत्यसौ ॥ २२॥

सुदेहोवाच ॥

यथा तथा त्वया पुत्रः समुत्पाद्यः प्रियोऽसि मे ।
त्यक्ष्यामि ह्यन्यथाहं च देहं देहभृतां वर ॥ २३॥

सूत उवाच ।
एवमुक्तं तया श्रुत्वा सुधर्मा ब्राह्मणोत्तमः ।
शिवं सस्मार मनसा तदाग्रहनिपीडितः ॥ २४॥

अग्नेरग्रेऽक्षिपत्पुष्पद्वयं विप्रो ह्यतन्द्रितः ।
मनसा दक्षिणं पुष्पं तन्मेने पुत्रकामदम् ॥ २५॥

एवं कृत्वा पणं पत्नीमुवाच ब्राह्मणः स च ।
अनयोर्ग्राह्यमेकं ते पुष्पं पुत्रफलाप्तये ॥ २६॥

तया च मनसा धृत्वा पुत्रश्चैव भवेन्मम ।
तदा च स्वामिना यच्च धृतं पुष्पं समेतु माम् ॥ २७॥

इत्युक्त्वा च तया तत्र नमस्कृत्य शिवं तदा ।
नत्वा चाग्निं पुनः प्रार्थ्य गृहीतं पुष्पमेककम् ॥ २८॥

स्वामिना चिन्तितं यच्च तद् गृहीतं तया न हि ।
सुदेहया विमोहेन शिवेच्छासम्भवेन वै ॥ २९॥

तद् दृष्ट्वा पुरुषश्चैव निःश्वासं पर्यमोचयत् ।
स्मृत्वा शिवपदाम्भोजमुवाच निजकामिनीम् ॥ ३०॥

सुधर्मोवाच ।
निर्मितं चेश्वरेणैव कथं चैवान्यथा भवेत् ।
आशां त्यज प्रिये त्वं च परिचर्यां कुरु प्रभोः ॥ ३१॥

इत्युक्त्वा तु स्वयं विप्र आशां परिविहाय च ।
धर्मकार्यरतः सोऽभूच्छङ्करध्यानतत्परः ॥ ३२॥

सा सुदेहाग्रहं नैव मुमोचात्मजकाम्यया ।
प्रत्युवाच पतिं प्रेम्णा साञ्जलिर्नतमस्तका ॥ ३३॥

सुदेहोवाच ।
मयि पुत्रो न चास्त्वन्यां पत्नीं कुरु मदाज्ञया ।
तस्यां नूनं सुतश्चैव भविष्यति न संशयः ॥ ३४॥

सूत उवाच ।
तदैव प्रार्थितो वै स ब्रह्मणः शैवसत्तमः ।

उवाच स्वप्रियां तां च सुदेहां धर्मतत्परः ॥ ३५॥

सुधर्मोवाच ।
त्वदीयं च मदीयं च सर्वं दुःखं गतं ध्रुवम् ।
तस्मात्त्वं धर्मविघ्नं च प्रिये मा कुरु साम्प्रतम् ॥ ३६॥

सूत उवाच ।
इत्येवं वारिता सा च स्वमातुः पुत्रिकां तदा ।
गृहमानीय भर्तारं वृणु त्वेनामिदं जगौ ॥ ३७॥

सुधर्मोवाच ।
इदानीं वदसि त्वं च मत्प्रियेयं ततः पुनः ।
पुत्रसूश्च यदा स्याद्वै तदा स्पर्धां करिष्यसि ॥ ३८॥

सूत उवाच ।
इत्युक्ता तेन पतिना सा सुदेहा च तत्प्रिया ।
पुनः प्राह करौ बद्ध्वा सुधर्माणं पतिं द्विजाः ॥ ३९॥

नाहं स्पर्धां भगिन्या वै करिष्ये द्विजसत्तम ।
उपयच्छस्व पुत्रार्थमिमामाज्ञापयामि च ॥ ४०॥

इत्येवं प्रार्थितः सोऽपि सुधर्मा प्रियया तया ।
घुश्मां तां समुपायंस्त विवाहविधिना द्विजः ॥ ४१॥

ततस्तां परिणीयाथ प्रार्थयामास तां द्विजः ।
त्वदीयेयं कनिष्ठा हि सदा पोष्याऽनघे प्रिये ॥ ४२॥

उक्त्वैवं स च धर्मात्मा सुधर्मा शैवसत्तमः ।
यथायोग्यं चकाराशु धर्मसङ्ग्रहमात्मनः ॥ ४३॥

सा चापि मातृपुत्रीं तां सखीवत्पर्यवर्त्तत ।
परित्यज्य विरोधं हि पुपोषाहर्निशं प्रिया ॥ ४४॥

कनिष्ठा चैव या पत्नी स्वस्त्रनुज्ञामवाप्य च ।
पार्थिवान्सा चकाराशु नित्यमेकोत्तरं शतम् ॥ ४५॥

विधानपूर्वकं घुश्मा सोपचारसमन्वितम् ।
कृत्वा तान्प्राक्षिपत्तत्र तडागे निकटस्थिते ॥ ४६॥

एवं नित्यं सा चकार शिवपूजां स्वकामदाम् ।

विसृज्य पुनरावाह्य तत्सपर्य्याविधानतः ॥ ४७॥

कुर्वन्त्या नित्यमेवं हि तस्याः शङ्करपूजनम् ।
लक्षसङ्ख्याभवत्पूर्णा सर्वकामफलप्रदा ॥ ४८॥

कृपया शङ्करस्यैव तस्याः पुत्रो व्यजायत ।
सुन्दरः सुभगश्चैव कल्याणगुणभाजनः ॥ ४९॥

तं दृष्ट्वा परमप्रीतः स विप्रो धर्मवित्तमः ।
अनासक्तः सुखं भेजे ज्ञानधर्मपरायणः ॥ ५०॥

सुदेहा तावदस्यास्तु स्पर्धामुग्रां चकार सा ।
प्रथमं शीतलं तस्या हृदयं ह्यसिवत्पुनः ॥ ५१॥

ततः परं च यज्जातं कुत्सितं कर्म दुःखदम् ।
सावधानेन मनसा श्रूयतां तन्मुनीश्वराः ॥ ५२॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां घुश्मेश्वरमाहात्म्ये सुदेहासुधर्माचरितवर्णनं नाम द्वात्रिंशोऽध्यायः ॥ ४.३२॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.३३. त्रयस्त्रिंशोऽध्यायः । घुश्मेशज्योतिर्लिङ्गोत्पत्तिमाहात्म्यवर्णनम् ।

सूत उवाच ।
पुत्रं दृष्ट्वा कनिष्ठाया ज्येष्ठा दुःखमुपागता ।
विरोधं सा चकाराशु न सहन्ती च तत्सुखम् ॥ १॥

सर्वे पुत्रप्रसूतिं तां प्रशसंसुर्निरन्तरम् ।
तया तत्सह्यते न स्म शिशो रूपादिकं तथा ॥ २॥

सुप्रियं तनयं तं च पित्रोः सद्गुणभाजनम् ।
दृष्ट्वाभवत्तदा तस्या हृदयं तप्तमग्निवत् ॥ ३॥

एतस्मिन्नन्तरे विप्राः कन्यां दातुं समागताः ।
विवाहं तस्य तत्रैव चकार विधिवच्च सः ॥ ४॥

सुधर्मा घुश्मया सार्धमानन्दं परं गतः ।
सर्वे सम्बन्धिनस्तस्यां घुश्मायां मानमादधुः ॥ ५॥

तं दृष्ट्वा सा सुदेहा हि मनसि ज्वलिता तदा ।
अत्यन्तं दुःखमापन्ना हा हतास्मीति वादिनी ॥ ६॥

सुधर्मा गृहमागत्य वधूं पुत्रं विवाहितम् ।
उत्साहं दर्शयामास प्रियाभ्यां हर्षयन्निव ॥ ७॥

अभवद् हर्षिता घुश्मा सुदेहा दुःखमागता ।
न सहन्ती सुखं तच्च दुःखं कृत्वापतद्भुवि ॥ ८॥

घुश्मावदद्वधूपुत्रौ त्वदीयौ न मदीयकौ ।
वधूः पुत्रश्च तां प्रीत्या प्रसूं श्वश्रूममन्यत ॥ ९॥

भर्ता प्रियां तां ज्येष्ठां च मेने नैव कनिष्ठिकाम् ।
तथापि सा तदा ज्येष्ठा स्वान्तर्मलवती ह्यभूत् ॥ १०॥

एकस्मिन्दिवसे ज्येष्ठा सा सुदेहा च दुःखिनी ।
हृदये सञ्चिचिन्तेति दुःखशान्तिः कथं भवेत् ॥ ११॥

सुदेहोवाच ।
मदीयो हृदयाग्निश्च घुश्मानेत्रजलेन वै ।
भविष्यति ध्रुवं शान्तो नान्यथा दुःखजेन हि ॥ १२॥

अतोऽहं मारयाम्यद्य तत्पुत्रं प्रियवादिनम् ।
अग्रे भावि भवेदेवं निश्चयः परमो मम ॥ १३॥

सूत उवाच ।
कदर्याणां विचारश्च कृत्याकृत्ये भवेन्नहि ।
कठोरः प्रायशो विप्राः सापत्नो भाव आत्महा ॥ १४॥

एकस्मिन्दिवसे ज्येष्ठा सुप्तं पुत्रं वधूयुतम् ।
चिच्छिदे निशि चाङ्गेषु गृहीत्वा छुरिकां च सा ॥ १५॥

सर्वाङ्गं खण्डयामास रात्रौ घुश्मासुतस्य सा ।
नीत्वा सरसि तत्रैवाक्षिपद् दृप्ता महाबला ॥ १६॥

यत्र क्षिप्तानि लिङ्गानि घुश्मया नित्यमेव हि ।
तत्र क्षिप्त्वा समायाता सुष्वाप सुखमागता ॥ १७॥

प्रातश्चैव समुत्थाय घुश्मा नित्यं तथाकरोत् ।
सुधर्मा च स्वयं श्रेष्ठो नित्यकर्म समाचरत् ॥ १८॥

एतस्मिन्नन्तरे सा च ज्येष्ठा कार्यं गृहस्य वै ।
चकारानन्दसंयुक्ता सुशान्तहृदयानला ॥ १९॥

प्रातःकाले समुत्थाय वधूः शय्यां विलोक्य सा ।
रुधिरार्द्रां देहखण्डैर्युक्तां दुःखमुपागता ॥ २०॥

श्वश्रूं निवेदयामास पुत्रस्ते च कुतो गतः ।
शय्या च रुधिरार्द्रा वै दृश्यन्ते देहखण्डकाः ॥ २१॥

हा हतास्मि कृतं केन दुष्टं कर्म शुचिव्रते ।
इत्युच्चार्य रुरोदाति विविधं तत्प्रिया च सा ॥ २२॥

ज्येष्ठा दुःखं तदापन्ना हा हतास्मि किलेति च ।
बहिर्दुःखं चकारासौ मनसा हर्षसंयुता ॥ २३॥

घुश्मा चापि तदा तस्या वध्वा दुःखं निशम्य सा ।
न चचाल व्रतात्तस्मान्नित्यपार्थिवपूजनात् ॥ २४॥

मनश्चैवोत्सुकं नैव जातं तस्या मनागपि ।
भर्तापि च तथैवासीद्यावद् व्रतविधिर्भवेत् ॥ २५॥

मध्याह्ने पूजनान्ते च दृष्ट्वा शय्यां भयावहाम् ।
तथापि न तदा किञ्चित्कृतं दुःखं हि घुश्मया ॥ २६॥

येनैव चार्पितश्चायं स वै रक्षां करिष्यति ।
भक्तप्रियः स विख्यातः कालकालः सतां गतिः ॥ २७॥

यदि नो रक्षिता शम्भुरीश्वरः प्रभुरेकलः ।
मालाकार इवासौ यान्युङ्क्ते तान्वियुनक्ति च ॥ २८॥

अद्य मे चिन्तया किं स्यादिति तत्त्वं विचार्य सा ।
न चकार तदा दुःखं शिवे धैर्यं समागता ॥ २९॥

पार्थिवांश्च गृहीत्वा सा पूर्ववत्स्वस्थमानसा ।
शम्भोर्नामान्युच्चरन्ती जगाम सरसस्तटे ॥ ३०॥

क्षिप्त्वा च पार्थिवांस्तत्र परावर्तत सा यदा ।
तदा पुत्रस्तडागस्थो दृश्यते स्म तटे तया ॥ ३१॥

पुत्र उवाच ।
मातरेहि मिलिष्यामि मृतोऽहं जीवितोऽधुना ।
तव पुण्यप्रभावाद्धि कृपया शङ्करस्य वै ॥ ३२॥

सूत उवाच ।
जीवितं तं सुतं दृष्ट्वा घुश्मा सा तत्प्रसूर्द्विजाः ।
प्रहृष्टा नाभवत्तत्र दुःखिता न यथा पुरा ॥ ३३॥

एतस्मिन्समये तत्र स्वाविरासीच्छिवो द्रुतम् ।
ज्योतीरूपो महेशश्च सन्तुष्टः प्रत्युवाच ह ॥ ३४॥

शिव उवाच ।
प्रसन्नोऽस्मि वरं ब्रूहि दुष्टया मारितो ह्ययम् ।
एनां च मारयिष्यामि त्रिशूलेन वरानने ॥ ३५॥

सूत उवाच ।
घुश्मा तदा वरं वव्रे सुप्रणम्य शिवं नता ।
रक्षणीया त्वया नाथ सुदेहेयं स्वसा मम ॥ ३६॥

शिव उवाच ।
अपकारः कृतस्तस्यामुपकारः कथं त्वया ।
क्रियते हननीया च सुदेहा दुष्टकारिणी ॥ ३७॥

घुश्मोवाच ॥

तव दर्शनमात्रेण पातकं नैव तिष्ठति ।
इदानीं त्वां च वै दृष्ट्वा तत्पापं भस्मतां व्रजेत् ॥ ३८॥

अपकारेषु यश्चैव ह्युपकारं करोति च ।
तस्य दर्शनमात्रेण पापं दूरतरं व्रजेत् ॥ ३९॥

इति श्रुतं मया देव भगवद्वाक्यमद्भुतम् ।
तस्माच्चैवं कृतं येन क्रियतां च सदाशिव ॥ ४०॥

सूत उवाच ।
इत्युक्तस्तु तया तत्र प्रसन्नोऽत्यभवत्पुनः ।
महेश्वरः कृपासिन्धुः तामूचे भक्तवत्सलः ॥ ४१॥

शिव उवाच ।
अन्यद्वरं ब्रूहि घुश्मे ददामि च हितं तव ।
त्वद्भक्त्या सुप्रसन्नोऽस्मि निर्विकारस्वभावतः ॥ ४२॥

सूत उवाच ।
सोवाच तद्वचः श्रुत्वा यदि देवो वरस्त्वया ।
लोकानां चैव रक्षार्थमत्र स्थेयं मदाख्यया ॥ ४३॥

तदोवाच शिवस्तत्र सुप्रसन्नो महेश्वरः ।
स्थास्येऽत्र तव नाम्नाहं घुश्मेशाख्यः सुखप्रदः ॥ ४४॥

घुश्मेशाख्यं सुप्रसिद्धं लिङ्गं मे जायतां शुभम् ।
इदं सरस्तु लिङ्गानामालयं जायतां सदा ॥ ४५॥

तस्माच्छिवालयं नाम प्रसिद्धं भुवनत्रये ।
सर्वकामप्रदं ह्येतद्दर्शनात्स्यात्सदा सरः ॥ ४६॥

तव वंशे शतं चैकं पुरुषावधि सुव्रते ।
ईदृशाः पुत्रकाः श्रेष्ठा भविष्यन्ति न संशयः ॥ ४७॥

सुस्त्रीकाः सुधनाश्चैव स्वायुष्याश्च विचक्षणाः ।
विद्यावन्तो ह्युदाराश्च भुक्तिमुक्तिफलाप्तये ॥ ४८॥

शतमेकोत्तरं चैव भविष्यन्ति गुणाधिकाः ।
ईदृशो वंशविस्तारो भविष्यति सुशोभनः ॥ ४९॥

सूत उवाच ।
इत्युक्त्वा च शिवस्तत्र लिङ्गरूपोऽभवत्तदा ।
घुश्मेशो नाम विख्यातः सरश्चैव शिवालयम् ॥ ५०॥

सुधर्मा स च घुश्मा च सुदेहा च समागताः ।
प्रदक्षिणं शिवस्याशु शतमेकोत्तरं दधुः ॥ ५१॥

पूजां कृत्वा महेशस्य मिलित्वा च परस्परम् ।
हित्वा चान्तर्मलं तत्र लेभिरे परमं सुखम् ॥ ५२॥

पुत्रं दृष्ट्वा सुदेहा सा जीवितं लज्जिताभवत् ।
तौ क्षमाप्याचरद्विप्रा निजपापापहं व्रतम् ॥ ५३॥

घुश्मेशाख्यमिदं लिङ्गमित्थं जातं मुनीश्वराः ।

तद् दृष्ट्वा पूजयित्वा हि सुखं संवर्धते सदा ॥ ५४॥

इति वश्च समाख्याता ज्योतिर्लिङ्गावली मया ।
द्वादशप्रमिता सर्वकामदा भुक्तिमुक्तिदा ॥ ५५॥

एतज्ज्योतिर्लिङ्गकथां यः पठेच्छृणुयादपि ।
मुच्यते सर्वपापेभ्यो भुक्तिं मुक्तिं च विन्दति ॥ ५६॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां घुश्मेशज्योतिर्लिङ्गोत्पत्तिमाहात्म्यवर्णनं नाम त्रयस्त्रिंशोऽध्यायः ॥ ४.३३॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.३४. चतुस्त्रिंशोऽध्यायः । विष्णुसुदर्शनचक्रलाभवर्णनम् ।

व्यास उवाच ।
इति श्रुत्वा वचस्तस्य सूतस्य च मुनीश्वराः ।
समूचुस्तं सुप्रशस्य लोकानां हितकाम्यया ॥ १॥

ऋषय ऊचुः ।
सूत सर्वं विजानासि ततः पृच्छामहे वयम् ।
हरीश्वरस्य लिङ्गस्य महिमानं वद प्रभो ॥ २॥

चक्रं सुदर्शनं प्राप्तं विष्णुनेति श्रुतं पुरा ।
तदाराधनतस्तात तत्कथां च विशेषतः ॥ ३॥

सूत उवाच ।
श्रूयतां च ऋषिश्रेष्ठा हरीश्वरकथा शुभा ।
यतः सुदर्शनं लब्धं विष्णुना शङ्करात्पुरा ॥ ४॥

कस्मिंश्चित्समये दैत्याः सञ्जाता बलवत्तराः ।
लोकांस्ते पीडयामासुर्धर्मलोपं च चक्रिरे ॥ ५॥

ते देवाः पीडिता दैत्यैर्महाबलपराक्रमैः ।
स्वं दुःखं कथयामासुर्विष्णुं निर्जररक्षकम् ॥ ६॥

देवा ऊचुः ।
कृपां कुरु प्रभो त्वं च दैत्यैः सम्पीडिता भृशम् ।
कुत्र यामश्च किं कुर्मः शरण्यं त्वां समाश्रिताः ॥ ७॥

सूत उवाच ।
इत्येवं वचनं श्रुत्वा देवानां दुःखितात्मनाम् ।
स्मृत्वा शिवपदाम्भोजं विष्णुर्वचनमब्रवीत् ॥ ८॥

विष्णुरुवाच ।
करिष्यामि च वः कार्यमाराध्य गिरिशं सुराः ।
बलिष्ठाः शत्रवो ह्येते विजेतव्याः प्रयत्नतः ॥ ९॥

सूत उवाच ।
इत्युक्तास्ते सुराः सर्वे विष्णुना प्रभविष्णुना ।
मत्वा दैत्यान्हतान्दुष्टान्ययुर्धाम स्वकं स्वकम् ॥ १०॥

विष्णुरप्यमराणां तु जयार्थमभजच्छिवम् ।
सर्वामराणामधिपं सर्वसाक्षिणमव्ययम् ॥ ११॥

गत्वा कैलासनिकटे तपस्तेपे हरिः स्वयम् ।
कृत्वा कुण्डं च संस्थाप्य जातवेदसमग्रतः ॥ १२॥

पार्थिवेन विधानेन मन्त्रैर्नानाविधैरपि ।
स्तोत्रैश्चैवाप्यनेकैश्च गिरिशं चाभजन्मुदा ॥ १३॥

कमलैः सरसो जातैर्मानसाख्यान्मुनीश्वराः ।
बद्ध्वा चैवासनं तत्र न चचाल हरिः स्वयम् ॥ १४॥

प्रसादावधि चैवात्र स्थेयं वै सर्वथा मया ।
इत्येवं निश्चयं कृत्वा समानर्च शिवं हरिः ॥ १५॥

यदा नैव हरस्तुष्टो बभूव हरये द्विजाः ।
तदा स भगवान्विष्णुर्विचारे तत्परोऽभवत् ॥ १६॥

विचार्यैवं स्वमनसि सेवनं बहुधा कृतम् ।
तथापि न हरस्तुष्टो बभूवोतिकरः प्रभुः ॥ १७॥

ततः सुविस्मितो विष्णुर्भक्त्या परमयान्वितः ।
सहस्रैर्नामभिः प्रीत्या तुष्टाव परमेश्वरम् ॥ १८॥

प्रत्येकं कमलं तस्मै नाममन्त्रमुदीर्य च ।
पूजयामास वै शम्भुं शरणागतवत्सलम् ॥ १९॥

परीक्षार्थं विष्णुभक्तेस्तदा वै शङ्करेण ह ।
कमलानां सहस्रात्तु हृतमेकं च नीरजम् ॥ २०॥

न ज्ञातं विष्णुना तच्च मायाकारणमद्भुतम् ।
न्यूनं तच्चापि संज्ञाय तदन्वेषणतत्परः ॥ २१॥

बभ्राम सकलां पृथ्वीं तत्प्रीत्यै सुदृढव्रतः ।
तदप्राप्य विशुद्धात्मा नेत्रमेकमुदाहरत् ॥ २२॥

तं दृष्ट्वा स प्रसन्नोऽभूच्छङ्करः सर्वदुःखहा ।
आविर्बभूव तत्रैव जगाद वचनं हरिम् ॥ २३॥

शिव उवाच ।
प्रसन्नोऽस्मि हरे तुभ्यं वरं ब्रूहि यथेप्सितम् ।
मनोऽभिलषितं दद्मि नादेयं विद्यते तव ॥ २४॥

सूत उवाच ।
तच्छ्रुत्वा शम्भुवचनं केशवः प्रीतमानसः ।
महाहर्षसमापन्नो ह्यब्रवीत्साञ्जलिः शिवम् ॥ २५॥

विष्णुरुवाच ।
वाच्यं किं मे त्वदग्रे वै ह्यन्तर्यामी त्वमास्थितः ।
तथापि कथ्यते नाथ तव शासनगौरवात् ॥ २६॥

दैत्यैश्च पीडितं विश्वं सुखं नो नः सदाशिव ।
दैत्यान् हन्तुं मम स्वामिन्स्वायुधं न प्रवर्तते ॥ २७॥

किं करोमि क्व गच्छामि नान्यो मे रक्षकः परः ।
अतोऽहं परमेशान शरणं त्वां समागतः ॥ २८॥

सूत उवाच ।
इत्युक्त्वा च नमस्कृत्य शिवाय परमात्मने ।
स्थितश्चैवाग्रतः शम्भोः स्वयं च पुरुपीडितः ॥ २९॥

सूत उवाच ।
इति श्रुत्वा वचो विष्णोर्देवदेवो महेश्वरः ।

ददौ तस्मै स्वकं चक्रं तेजोराशिं सुदर्शनम् ॥ ३०॥

तत्प्राप्य भगवान्विष्णुर्दैत्यांस्तान्बलवत्तरान् ।
जघान तेन चक्रेण द्रुतं सर्वान्विना श्रमम् ॥ ३१॥

जगत्स्वास्थ्यं परं लेभे बभूवुः सुखिनः सुराः ।
सुप्रीतः स्वायुधं प्राप्य हरिरासीन्महासुखी ॥ ३२॥

ऋषय ऊचुः ॥

किं तन्नामसहस्रं वै कथय त्वं हि शाङ्करम् ।
येन तुष्टो ददौ चक्रं हरये स महेश्वरः ॥ ३३॥

तन्माहात्म्यं मम ब्रूहि शिवसंवादपूर्वकम् ।
कृपालुत्वं च शम्भोर्हि विष्णूपरि यथातथम् ॥ ३४॥

व्यास उवाच ।
इति तेषां वचः श्रुत्वा मुनीनां भावितात्मनाम् ।
स्मृत्वा शिवपदाम्भोजं सूतो वचनमब्रवीत् ॥ ३५॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां विष्णुसुदर्शनचक्रलाभवर्णनं नाम चतुस्त्रिंशोऽध्यायः ॥ ४.३४॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.३५. पञ्चत्रिंशोऽध्यायः । शिवसहस्रनामवर्णनम् ।

सूत उवाच ।
श्रूयतां भो ऋषिश्रेष्ठा येन तुष्टो महेश्वरः ।
तदहं कथयाम्यद्य शैवं नामसहस्रकम् ॥ १॥

श्रीविष्णुरुवाच ।
शिवो हरो मृडो रुद्रः पुष्करः पुष्पलोचनः ।
अर्थिगम्यः सदाचारः शर्वः शम्भुर्महेश्वरः ॥ २॥

चन्द्रापीडश्चन्द्रमौलिर्विश्वं विश्वम्भरेश्वरः ।

वेदान्तसारसन्दोहः कपाली नीललोहितः ॥ ३॥

ध्यानाधारोऽपरिच्छेद्यो गौरीभर्ता गणेश्वरः ।
अष्टमूर्तिर्विश्वमूर्तिस्त्रिवर्गस्वर्गसाधनः ॥ ४॥

ज्ञानगम्यो दृढप्रज्ञो देवदेवस्त्रिलोचनः ।
वामदेवो महादेवः पटुः परिवृढो दृढः ॥ ५॥

विश्वरूपो विरूपाक्षो वागीशः शुचिसत्तमः ।
सर्वप्रमाणसंवादी वृषाङ्को वृषवाहनः ॥ ६॥

ईशः पिनाकी खट्वाङ्गी चित्रवेषश्चिरन्तनः ।
तमोहरो महायोगी गोप्ता ब्रह्मा च धूर्जटिः ॥ ७॥

कालकालः कृत्तिवासाः सुभगः प्रणवात्मकः ।
उन्नध्रः पुरुषो जुष्यो दुर्वासाः पुरशासनः ॥ ८॥

दिव्यायुधः स्कन्दगुरुः परमेष्ठी परात्परः ।
अनादिमध्यनिधनो गिरीशो गिरिजाधवः ॥ ९॥

कुबेरबन्धुः श्रीकण्ठो लोकवर्णोत्तमो मृदुः ।
समाधिवेद्यः कोदण्डी नीलकण्ठः परश्वधी ॥ १०॥

विशालाक्षो मृगव्याधः सुरेशः सूर्यतापनः ।
धर्मधाम क्षमाक्षेत्रं भगवान् भगनेत्रभित् ॥ ११॥

उग्रः पशुपतिस्तार्क्ष्यः प्रियभक्तः परन्तपः ।
दाता दयाकरो दक्षः कपर्दी कामशासनः ॥ १२॥

श्मशाननिलयः सूक्ष्मः श्मशानस्थो महेश्वरः ।
लोककर्ता मृगपतिर्महाकर्ता महौषधिः ॥ १३॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
नीतिः सुनीतिः शुद्धात्मा सोमः सोमरतः सुखी ॥ १४॥

सोमपोऽमृतपः सौम्यो महातेजा महाद्युतिः ।
तेजोमयोऽमृतमयोऽन्नमयश्च सुधापतिः ॥ १५॥

अजातशत्रुरालोकः सम्भाव्यो हव्यवाहनः ।
लोककरो वेदकरः सूत्रकारः सनातनः ॥ १६॥

महर्षिकपिलाचार्यो विश्वदीप्तिस्त्रिलोचनः ।
पिनाकपाणिर्भूदेवः स्वस्तिदः स्वस्तिकृत्सुधीः ॥ १७॥

धातृधामा धामकरः सर्वगः सर्वगोचरः ।
ब्रह्मसृग्विश्वसृक्सर्गः कर्णिकारप्रियः कविः ॥ १८॥

शाखो विशाखो गोशाखः शिवो भिषगनुत्तमः ।
गङ्गाप्लवोदको भव्यः पुष्कलः स्थपतिः स्थिरः ॥ १९॥

विजितात्मा विधेयात्मा भूतवाहनसारथिः ।
सगणो गणकायश्च सुकीर्तिश्छिन्नसंशयः ॥ २०॥

कामदेवः कामपालो भस्मोद्धूलितविग्रहः ।
भस्मप्रियो भस्मशायी कामी कान्तः कृतागमः ॥ २१॥

समावर्तोऽनिवृत्तात्मा धर्मपुञ्जः सदाशिवः ।
अकल्मषश्चतुर्बाहुर्दुरावासो दुरासदः ॥ २२॥

दुर्लभो दुर्गमो दुर्गः सर्वायुधविशारदः ।
अध्यात्मयोगनिलयः सुतन्तुस्तन्तुवर्धनः ॥ २३॥

शुभाङ्गो लोकसारङ्गो जगदीशो जनार्दनः ।
भस्मशुद्धिकरो मेरुरोजस्वी शुद्धविग्रहः ॥ २४॥

असाध्यः साधुसाध्यश्च भृत्यमर्कटरूपधृक् ।
हिरण्यरेताः पौराणो रिपुजीवहरो बली ॥ २५॥

महाह्रदो महागर्तः सिद्धवृन्दारवन्दितः ।
व्याघ्रचर्माम्बरो व्याली महाभूतो महानिधिः ॥ २६॥

अमृताशोऽमृतवपुः पाञ्चजन्यः प्रभञ्जनः ।
पञ्चविंशतितत्त्वस्थः पारिजातः परावरः ॥ २७॥

सुलभः सुव्रतः शूरो ब्रह्मवेदनिधिर्निधिः ।
वर्णाश्रमगुरुर्वर्णी शत्रुजिच्छत्रुतापनः ॥ २८॥

आश्रमः क्षपणः क्षामो ज्ञानवानचलेश्वरः ।
प्रमाणभूतो दुर्ज्ञेयः सुपर्णो वायुवाहनः ॥ २९॥

धनुर्धरो धनुर्वेदो गुणराशिर्गुणाकरः ।
सत्यः सत्यपरोऽदीनो धर्माङ्गो धर्मसाधनः ॥ ३०॥

अनन्तदृष्टिरानन्दो दण्डो दमयिता दमः ।
अभिवाद्यो महामायो विश्वकर्मविशारदः ॥ ३१॥

वीतरागो विनीतात्मा तपस्वी भूतभावनः ।
उन्मत्तवेषः प्रच्छन्नो जितकामोऽजितप्रियः ॥ ३२॥

कल्याणप्रकृतिः कल्पः सर्वलोकप्रजापतिः ।
तरस्वी तारको धीमान् प्रधानः प्रभुरव्ययः ॥ ३३॥

लोकपालोऽन्तर्हितात्मा कल्पादिः कमलेक्षणः ।
वेदशास्त्रार्थतत्त्वज्ञोऽनियमो नियताश्रयः ॥ ३४॥

चन्द्रः सूर्यः शनिः केतुर्वराङ्गो विद्रुमच्छविः ।
भक्तिवश्यः परब्रह्म मृगबाणार्पणोऽनघः ॥ ३५॥

अद्रिरद्र्यालयः कान्तः परमात्मा जगद्गुरुः ।
सर्वकर्मालयस्तुष्टो मङ्गल्यो मङ्गलावृतः ॥ ३६॥

महातपा दीर्घतपाः स्थविष्ठः स्थविरो ध्रुवः ।
अहः संवत्सरो व्याप्तिः प्रमाणं परमं तपः ॥ ३७॥

संवत्सरकरो मन्त्रप्रत्ययः सर्वदर्शनः ।
अजः सर्वेश्वरः सिद्धो महारेता महाबलः ॥ ३८॥

योगी योग्यो महातेजाः सिद्धिः सर्वादिरग्रहः ।
वसुर्वसुमनाः सत्यः सर्वपापहरो हरः ॥ ३९॥

सुकीर्तिशोभनः श्रीमान् वेदाङ्गो वेदविन्मुनिः ।
भ्राजिष्णुर्भोजनं भोक्ता लोकनाथो दुराधरः ॥ ४०॥

अमृतः शाश्वतः शान्तो बाणहस्तः प्रतापवान् ।
कमण्डलुधरो धन्वी अवाङ्मनसगोचरः ॥ ४१॥

अतीन्द्रियो महामायः सर्वावासश्चतुष्पथः ।
कालयोगी महानादो महोत्साहो महाबलः ॥ ४२॥

महाबुद्धिर्महावीर्यो भूतचारी पुरन्दरः ।
निशाचरः प्रेतचारी महाशक्तिर्महाद्युतिः ॥ ४३॥

अनिर्देश्यवपुः श्रीमान् सर्वाचार्यो मनोगतिः ।

बहुश्रुतोऽमहामायो नियतात्मा ध्रुवोऽध्रुवः ॥ ४४॥

ओजस्तेजोद्युतिधरो जनकः सर्वशासनः ।
नृत्यप्रियो नित्यनृत्यः प्रकाशात्मा प्रकाशकः ॥ ४५॥

स्पष्टाक्षरो बुधो मन्त्रः समानः सारसम्प्लवः ।
युगादिकृद्युगावर्तो गम्भीरो वृषवाहनः ॥ ४६॥

इष्टोऽविशिष्टः शिष्टेष्टः सुलभः सारशोधनः ।
तीर्थरूपस्तीर्थनामा तीर्थदृश्यस्तु तीर्थदः ॥ ४७॥

अपान्निधिरधिष्ठानं दुर्जयो जयकालवित् ।
प्रतिष्ठितः प्रमाणज्ञो हिरण्यकवचो हरिः ॥ ४८॥

विमोचनः सुरगणो विद्येशो बिन्दुसंश्रयः ।
बालरूपोऽबलोन्मत्तोऽविकर्ता गहनो गुहः ॥ ४९॥

करणं कारणं कर्ता सर्वबन्धविमोचनः ।
व्यवसायो व्यवस्थानः स्थानदो जगदादिजः ॥ ५०॥

गुरुदो ललितोऽभेदो भावात्मात्मनि संस्थितः ।
वीरेश्वरो वीरभद्रो वीरासनविधिर्विराट् ॥ ५१॥

वीरचूडामणिर्वेत्ता चिदानन्दो नदीधरः ।
आज्ञाधारस्त्रिशूली च शिपिविष्टः शिवालयः ॥ ५२॥

बालखिल्यो महाचापस्तिग्मांशुर्बधिरः खगः ।
अभिरामः सुशरणः सुब्रह्मण्यः सुधापतिः ॥ ५३॥

मघवान्कौशिको गोमान्विरामः सर्वसाधनः ।
ललाटाक्षो विश्वदेहः सारः संसारचक्रभृत् ॥ ५४॥

अमोघदण्डो मध्यस्थो हिरण्यो ब्रह्मवर्चसी ।
परमार्थः परो मायी शम्बरो व्याघ्रलोचनः ॥ ५५॥

रुचिर्विरञ्चिः स्वर्बन्धुर्वाचस्पतिरहर्पतिः ।
रविर्विरोचनः स्कन्दः शास्ता वैवस्वतो यमः ॥ ५६॥

युक्तिरुन्नतकीर्तिश्च सानुरागः परञ्जयः ।
कैलासाधिपतिः कान्तः सविता रविलोचनः ॥ ५७॥

विद्वत्तमो वीतभयो विश्वभर्त्तानिवारितः ।
नित्यो नियतकल्याणः पुण्यश्रवणकीर्तनः ॥ ५८॥

दूरश्रवा विश्वसहो ध्येयो दुःस्वप्ननाशनः ।
उत्तारणो दुष्कृतिहा विज्ञेयो दुःसहोऽभवः ॥ ५९॥

अनादिर्भूर्भुवो लक्ष्मीः किरीटी त्रिदशाधिपः ।
विश्वगोप्ता विश्वकर्ता सुवीरो रुचिराङ्गदः ॥ ६०॥

जननो जनजन्मादिः प्रीतिमान्नीतिमान्धवः ।
वसिष्ठः कश्यपो भानुर्भीमो भीमपराक्रमः ॥ ६१॥

प्रणवः सत्पथाचारो महाकोशो महाधनः ।
जन्माधिपो महादेवः सकलागमपारगः ॥ ६२॥

तत्त्वं तत्त्वविदेकात्मा विभुर्विश्वविभूषणः ।
ऋषिर्ब्राह्मण ऐश्वर्यजन्ममृत्युजरातिगः ॥ ६३॥

पञ्चयज्ञसमुत्पत्तिर्विश्वेशो विमलोदयः ।
आत्मयोनिरनाद्यन्तो वत्सलो भक्तलोकधृक् ॥ ६४॥

गायत्रीवल्लभः प्रांशुर्विश्वावासः प्रभाकरः ।
शिशुर्गिरिरतः सम्राट् सुषेणः सुरशत्रुहा ॥ ६५॥

अमोघोऽरिष्टनेमिश्च कुमुदो विगतज्वरः ।
स्वयञ्ज्योतिस्तनुज्योतिरात्मज्योतिरचञ्चलः ॥ ६६॥

पिङ्गलः कपिलश्मश्रुर्भालनेत्रस्त्रयीतनुः ।
ज्ञानस्कन्दो महानीतिर्विश्वोत्पत्तिरुपप्लवः ॥ ६७॥

भगो विवस्वानादित्यो योगपारो दिवस्पतिः ।
कल्याणगुणनामा च पापहा पुण्यदर्शनः ॥ ६८॥

उदारकीर्तिरुद्योगी सद्योगी सदसन्मयः ।
नक्षत्रमाली नाकेशः स्वाधिष्ठानपदाश्रयः ॥ ६९॥

पवित्रः पापहारी च मणिपूरो नभोगतिः ।
हृत्पुण्डरीकमासीनः शक्रः शान्तो वृषाकपिः ॥ ७०॥

उष्णो गृहपतिः कृष्णः समर्थोऽनर्थनाशनः ।
अधर्मशत्रुरज्ञेयः पुरुहूतः पुरुश्रुतः ॥ ७१॥

ब्रह्मगर्भो बृहद्गर्भो धर्मधेनुर्धनागमः ।
जगद्धितैषी सुगतः कुमारः कुशलागमः ॥ ७२॥

हिरण्यवर्णो ज्योतिष्मान्नानाभूतरतो ध्वनिः ।
अरागो नयनाध्यक्षो विश्वामित्रो धनेश्वरः ॥ ७३॥

ब्रह्मज्योतिर्वसुधामा महाज्योतिरनुत्तमः ।
मातामहो मातरिश्वा नभस्वान्नागहारधृक् ॥ ७४॥

पुलस्त्यः पुलहोऽगस्त्यो जातूकर्ण्यः पराशरः ।
निरावरणनिर्वारो वैरञ्च्यो विष्टरश्रवाः ॥ ७५॥

आत्मभूरनिरुद्धोऽत्रिर्ज्ञानमूर्तिर्महायशाः ।
लोकवीराग्रणीर्वीरश्चण्डः सत्यपराक्रमः ॥ ७६॥

व्यालकल्पो महाकल्पः कल्पवृक्षः कलाधरः ।
अलङ्करिष्णुरचलो रोचिष्णुर्विक्रमोन्नतः ॥ ७७॥

आयुःशब्दपतिर्वेगी प्लवनः शिखिसारथिः ।
असंसृष्टोऽतिथिः शक्रप्रमाथी पादपासनः ॥ ७८॥

वसुश्रवा हव्यवाहः प्रतप्तो विश्वभोजनः ।
जप्यो जरादिशमनो लोहितात्मा तनूनपात् ॥ ७९॥

बृहदश्वो नभोयोनिः सुप्रतीकस्तमिस्रहा ।
निदाघस्तपनो मेघः स्वक्षः परपुरञ्जयः ॥ ८०॥

सुखानिलः सुनिष्पन्नः सुरभिः शिशिरात्मकः ।
वसन्तो माधवो ग्रीष्मो नभस्यो बीजवाहनः ॥ ८१॥

अङ्गिरा गुरुरात्रेयो विमलो विश्ववाहनः ।
पावनः सुमतिर्विद्वांस्त्रैविद्यो वरवाहनः ॥ ८२॥

मनोबुद्धिरहङ्कारः क्षेत्रज्ञः क्षेत्रपालकः ।
जमदग्निर्बलनिधिर्विगालो विश्वगालवः ॥ ८३॥

अघोरोऽनुत्तरो यज्ञः श्रेष्ठो निःश्रेयसप्रदः ।
शैलो गगनकुन्दाभो दानवारिररिन्दमः ॥ ८४॥

रजनीजनकश्चारुर्निःशल्यो लोकशल्यधृक् ।

चतुर्वेदश्चतुर्भावश्चतुरश्चतुरप्रियः ॥ ८५॥

आम्नायोऽथ समाम्नायस्तीर्थदेवशिवालयः ।
बहुरूपो महारूपः सर्वरूपश्चराचरः ॥ ८६॥

न्यायनिर्मायको न्यायी न्यायगम्यो निरञ्जनः ।
सहस्रमूर्धा देवेन्द्रः सर्वशस्त्रप्रभञ्जनः ॥ ८७॥

मुण्डो विरूपो विक्रान्तो दण्डी दान्तो गुणोत्तमः ।
पिङ्गलाक्षो जनाध्यक्षो नीलग्रीवो निरामयः ॥ ८८॥

सहस्रबाहुः सर्वेशः शरण्यः सर्वलोकधृक् ।
पद्मासनः परं ज्योतिः पारम्पर्यफलप्रदः ॥ ८९॥

पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः ।
परावरज्ञो वरदो वरेण्यश्च महास्वनः ॥ ९०॥

देवासुरगुरुर्देवो देवासुरनमस्कृतः ।
देवासुरमहामित्रो देवासुरमहेश्वरः ॥ ९१॥

देवासुरेश्वरो दिव्यो देवासुरमहाश्रयः ।
देवदेवमयोऽचिन्त्यो देवदेवात्मसम्भवः ॥ ९२॥

सद्योनिरसुरव्याघ्रो देवसिंहो दिवाकरः ।
विबुधाग्रचरश्रेष्ठः सर्वदेवोत्तमोत्तमः ॥ ९३॥

शिवज्ञानरतः श्रीमान् शिखिश्रीपर्वतप्रियः ।
वज्रहस्तः सिद्धखड्गो नरसिंहनिपातनः ॥ ९४॥

ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः ।
नन्दी नन्दीश्वरोऽनन्तो नग्नव्रतधरः शुचिः ॥ ९५॥

लिङ्गाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः ।
स्वधर्मा स्वर्गतः स्वर्गस्वरः स्वरमयस्वनः ॥ ९६॥

बाणाध्यक्षो बीजकर्ता धर्मकृद्धर्मसम्भवः ।
दम्भो लोभोऽर्थविच्छम्भुः सर्वभूतमहेश्वरः ॥ ९७॥

श्मशाननिलयस्त्र्यक्षः सेतुरप्रतिमाकृतिः ।
लोकोत्तरस्फुटालोकस्त्र्यम्बको नागभूषणः ॥ ९८॥

अन्धकारिर्मखद्वेषी विष्णुकन्धरपातनः ।
हीनदोषोऽक्षयगुणो दक्षारिः पूषदन्तभित् ॥ ९९॥

धूर्जटिः खण्डपरशुः सकलो निष्कलोऽनघः ।
अकालः सकलाधारः पाण्डुराभो मृडो नटः ॥ १००॥

पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः ।
सामगेयप्रियोऽक्रूरः पुण्यकीर्तिरनामयः ॥ १०१॥

मनोजवस्तीर्थकरो जटिलो जीवितेश्वरः ।
जीवितान्तकरो नित्यो वसुरेता वसुप्रदः ॥ १०२॥

सद्गतिः सत्कृतिः सिद्धिः सज्जातिः खलकण्टकः ।
कलाधरो महाकालभूतः सत्यपरायणः ॥ १०३॥

लोककल्याणकर्ता च लोकोत्तरसुखालयः ।
चन्द्रसञ्जीवनः शास्ता लोकगूढो महाधिपः ॥ १०४॥

लोकबन्धुर्लोकनाथः कृतज्ञः कीर्तिभूषणः ।
अनपायोऽक्षरः कान्तः सर्वशास्त्रभृतां वरः ॥ १०५॥

तेजोमयो द्युतिधरो लोकानामग्रणीरणुः ।
शुचिस्मितः प्रसन्नात्मा दुर्जेयो दुरतिक्रमः ॥ १०६॥

ज्योतिर्मयो जगन्नाथो निराकारो जलेश्वरः ।
तुम्बवीणो महाकोपो विशोकः शोकनाशनः ॥ १०७॥

त्रिलोकपस्त्रिलोकेशः सर्वशुद्धिरधोक्षजः ।
अव्यक्तलक्षणो देवो व्यक्ताव्यक्तो विशाम्पतिः ॥ १०८॥

वरशीलो वरगुणः सारो मानधनो मयः ।
ब्रह्मा विष्णुः प्रजापालो हंसो हंसगतिर्वयः ॥ १०९॥

वेधा विधाता धाता च स्रष्टा हर्ता चतुर्मुखः ।
कैलासशिखरावासी सर्वावासी सदागतिः ॥ ११०॥

हिरण्यगर्भो द्रुहिणो भूतपालोऽथ भूपतिः ।
सद्योगी योगविद्योगी वरदो ब्राह्मणप्रियः ॥ १११॥

देवप्रियो देवनाथो देवज्ञो देवचिन्तकः ।
विषमाक्षो विशालाक्षो वृषदो वृषवर्धनः ॥ ११२॥

निर्ममो निरहङ्कारो निर्मोहो निरुपद्रवः ।
दर्पहा दर्पदो दृप्तः सर्वर्तुपरिवर्तकः ॥ ११३॥

सहस्रजित् सहस्रार्चिः स्निग्धप्रकृतिदक्षिणः ।
भूतभव्यभवन्नाथः प्रभवो भूतिनाशनः ॥ ११४॥

अर्थोऽनर्थो महाकोशः परकार्यैकपण्डितः ।
निष्कण्टकः कृतानन्दो निर्व्याजो व्याजमर्दनः ॥ ११५॥

सत्त्ववान्सात्त्विकः सत्यकीर्तिः स्नेहकृतागमः ।
अकम्पितो गुणग्राही नैकात्मा नैककर्मकृत् ॥ ११६॥

सुप्रीतः सुमुखः सूक्ष्मः सुकरो दक्षिणानिलः ।
नन्दिस्कन्धधरो धुर्यः प्रकटः प्रीतिवर्धनः ॥ ११७॥

अपराजितः सर्वसत्त्वो गोविन्दः सत्त्ववाहनः ।
अधृतः स्वधृतः सिद्धः पूतमूर्तिर्यशोधनः ॥ ११८॥

वाराहशृङ्गधृक्छृङ्गी बलवानेकनायकः ।
श्रुतिप्रकाशः श्रुतिमानेकबन्धुरनेककृत् ॥ ११९॥

श्रीवत्सलशिवारम्भः शान्तभद्रः समो यशः ।
भूशयो भूषणो भूतिर्भूतकृद् भूतभावनः ॥ १२०॥

अकम्पो भक्तिकायस्तु कालहा नीललोहितः ।
सत्यव्रतमहात्यागी नित्यशान्तिपरायणः ॥ १२१॥

परार्थवृत्तिर्वरदो विरक्तस्तु विशारदः ।
शुभदः शुभकर्ता च शुभनामा शुभः स्वयम् ॥ १२२॥

अनर्थितोऽगुणः साक्षी ह्यकर्ता कनकप्रभः ।
स्वभावभद्रो मध्यस्थः शत्रुघ्नो विघ्ननाशनः ॥ १२३॥

शिखण्डी कवची शूली जटी मुण्डी च कुण्डली ।
अमृत्युः सर्वदृक्सिंहस्तेजोराशिर्महामणिः ॥ १२४॥

असङ्ख्येयोऽप्रमेयात्मा वीर्यवान् वीर्यकोविदः ।
वेद्यश्चैव वियोगात्मा परावरमुनीश्वरः ॥ १२५॥

अनुत्तमो दुराधर्षो मधुरप्रियदर्शनः ।

सुरेशः शरणं सर्वः शब्दब्रह्म सतां गतिः ॥ १२६॥

कालपक्षः कालकालः कङ्कणीकृतवासुकिः ।
महेष्वासो महीभर्ता निष्कलङ्को विशृङ्खलः ॥ १२७॥

द्युमणिस्तरणिर्धन्यः सिद्धिदः सिद्धिसाधनः ।
विश्वतः संवृतः स्तुत्यो व्यूढोरस्को महाभुजः ॥ १२८॥

सर्वयोनिर्निरातङ्को नरनारायणप्रियः ।
निर्लेपो निष्प्रपञ्चात्मा निर्व्यङ्गो व्यङ्गनाशनः ॥ १२९॥

स्तव्यः स्तवप्रियः स्तोता व्यासमूर्तिर्निरङ्कुशः ।
निरवद्यमयोपायो विद्याराशी रसप्रियः ॥ १३०॥

प्रशान्तबुद्धिरक्षुण्णः सङ्ग्रही नित्यसुन्दरः ।
वैयाघ्रधुर्यो धात्रीशः शाकल्यः शर्वरीपतिः ॥ १३१॥

परमार्थगुरुर्दत्तः सूरिराश्रितवत्सलः ।
सोमो रसज्ञो रसदः सर्वसत्त्वावलम्बनः ॥ १३२॥

एवं नाम्नां सहस्रेण तुष्टाव हि हरं हरिः ।
प्रार्थयामास शम्भुं वै पूजयामास पङ्कजैः ॥ १३३॥

ततः स कौतुकी शम्भुश्चकार चरितं द्विजाः ।
महद्भुतं सुखकरं तदेव शृणुतादरात् ॥ १३४॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां शिवसहस्रनामवर्णनं नाम पञ्चत्रिंशोऽध्यायः ॥ ४.३५॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.३६. षट्त्रिंशोऽध्यायः । शिवसहस्रनामस्तोत्रफलवर्णनम् ।

सूत उवाच ।
श्रुत्वा विष्णुकृतं दिव्यं परनामविभूषितम् ।
सहस्रनाम स्वस्तोत्रं प्रसन्नोऽभून्महेश्वरः ॥ १॥

परीक्षार्थं हरेरीशः कमलेषु महेश्वरः ।
गोपयामास कमलं तदैकं भुवनेश्वरः ॥ २॥

पङ्कजेषु तदा तेषु सहस्रेषु बभूव च ।
न्यूनमेकं तदा विष्णुर्विह्वलः शिवपूजने ॥ ३॥

हृदा विचारितं तेन कुतो वै कमलं गतम् ।
यातं यातु सुखेनैव मन्नेत्रं कमलं न किम् ॥ ४॥

ज्ञात्वेति नेत्रमुद्धृत्य सर्वसत्त्वावलम्बनात् ।
पूजयामास भावेन स्तवयामास तेन च ॥ ५॥

ततस्तुतमथो दृष्ट्वा तथाभूतं हरो हरिम् ।
मा मेति व्याहरन्नेव प्रादुरासीज्जगद्गुरुः ॥ ६॥

तस्मादवतताराशु मण्डलात्पार्थिवस्य च ।
प्रतिष्ठितस्य हरिणा स्वलिङ्गस्य महेश्वरः ॥ ७॥

यथोक्तरूपिणं शम्भुं तेजोराशिसमुत्थितम् ।
नमस्कृत्य पुरः स्थित्वा स तुष्टाव विशेषतः ॥ ८॥

तदा प्राह महादेवः प्रसन्नः प्रहसन्निव ।
सम्प्रेक्ष्य कृपया विष्णुं कृताञ्जलिपुटं स्थितम् ॥ ९॥

शङ्कर उवाच ।
ज्ञातं मयेदं सकलं तव चित्तेप्सितं हरे ।
देवकार्यं विशेषेण देवकार्यरतात्मनः ॥ १०॥

देवकार्यस्य सिद्ध्यर्थं दैत्यनाशाय चाश्रमम् ।
सुदर्शनाख्यं चक्रं च ददामि तव शोभनम् ॥ ११॥

यद्रूपं भवता दृष्टं सर्वलोकसुखावहम् ।
हिताय तव देवेश धृतं भावय तद्भवम् ॥ १२॥

रणाजिरे स्मृतं तद्वै देवानां दुःखनाशनम् ।
इदं चक्रमिदं रूपमिदं नामसहस्रकम् ॥ १३॥

ये शृण्वन्ति सदा भक्त्या सिद्धिः स्यादनपायिनी ।
कामानां सकलानां च प्रसादान्मम सुव्रत ॥ १४॥

सूत उवाच ।

एवमुक्त्वा ददौ चक्रं सूर्यायुतसमप्रभम् ।
सुदर्शनं स्वपादोत्थं सर्वशत्रुविनाशनम् ॥ १५॥

विष्णुश्चापि सुसंस्कृत्य जग्राहोदङ्मुखस्तदा ।
नमस्कृत्य महादेवं विष्णुर्वचनमब्रवीत् ॥ १६॥

विष्णुरुवाच ।
शृणु देव मया ध्येयं पठनीयं च किं प्रभो ।
दुःखानां नाशनार्थं हि वद त्वं लोकशङ्कर ॥ १७॥

सूत उवाच ।
इति पृष्टस्तदा तेन सन्तुष्टस्तु शिवोऽब्रवीत् ।
प्रसन्नमानसो भूत्वा विष्णुं देवसहायकम् ॥ १८॥

शिव उवाच ।
रूपं ध्येयं हरे मे हि सर्वानर्थप्रशान्तये ।
अनेकदुःखनाशार्थं पठ नामसहस्रकम् ॥ १९॥

धार्यं चक्रं सदा मे हि सर्वाभीष्टस्य सिद्धये ।
त्वया विष्णो प्रयत्नेन सर्वचक्रवरं त्विदम् ॥ २०॥

अन्ये च ये पठिष्यन्ति पाठयिष्यन्ति नित्यशः ।
तेषां दुःखं न स्वप्नेऽपि जायते नात्र संशयः ॥ २१॥

राज्ञां च सङ्कटे प्राप्ते शतावृत्तिं चरेद्यदा ।
साङ्गं च विधिसंयुक्तं कल्याणं लभते नरः ॥ २२॥

रोगनाशकरं ह्येतद्विद्याविक्तदमुत्तमम् ।
सर्वकामप्रदं पुण्यं शिवभक्तिप्रदं सदा ॥ २३॥

यदुद्दिश्य फलं श्रेष्ठं पठिष्यन्ति नरास्त्विह ।
लप्स्यन्ते नात्र सन्देहः फलं तत्सत्यमुत्तमम् ॥ २४॥

यश्च प्रातः समुत्थाय पूजां कृत्वा मदीयिकाम् ।
पठते मत्समक्षं वै नित्यं सिद्धिर्न दूरतः ॥ २५॥

ऐहिकीं सिद्धिमाप्नोति निखिलां सर्वकामिकाम् ।
अन्ते सायुज्यमुक्तिं वै प्राप्नोत्यत्र न संशयः ॥ २६॥

सूत उवाच ।

एवमुक्त्वा तदा विष्णुं शङ्करः प्रीतमानसः ।
उपस्पृश्य कराभ्यां तमुवाच गिरिशः पुनः ॥ २७॥

शिव उवाच ।
वरदोऽस्मि सुरश्रेष्ठ वरान्वृणु यथेप्सितान् ।
भक्त्या वशीकृतो नूनं स्तवेनानेन सुव्रत ॥ २८॥

सूत उवाच ।
इत्युक्तो देवदेवेन देवदेवं प्रणम्य तम् ।
सुप्रसन्नतरो विष्णुः साञ्जलिर्वाक्यमब्रवीत् ॥ २९॥

विष्णुरुवाच ।
यथेदानीं कृपा नाथ क्रियते चान्यतः परा ।
कार्या चैव विशेषेण कृपालुत्वात्त्वया प्रभो ॥ ३०॥

त्वयि भक्तिर्महादेव प्रसीद वरमुत्तमम् ।
नान्यमिच्छामि भक्तानामार्त्तयो नैव यत्प्रभो ॥ ३१॥

सूत उवाच ।
तच्छ्रुत्वा वचनं तस्य दयावान्सुतरां भवः ।
पस्पर्श च तदङ्गं वै प्राह शीतांशुशेखरः ॥ ३२॥

शिव उवाच ।
मयि भक्तिः सदा ते तु हरे स्यादनपायिनी ।
सदा वन्द्यश्च पूज्यश्च लोके भव सुरैरपि ॥ ३३॥

विश्वम्भरेति ते नाम सर्वपापहरं परम् ।
भविष्यति न सन्देहो मत्प्रसादात्सुरोत्तम ॥ ३४॥

सूत उवाच ।
इत्युक्त्वान्तर्दधे रुद्रः सर्वदेवेश्वरः प्रभुः ।
पश्यतस्तस्य विष्णोस्तु तत्रैव च मुनीश्वराः ॥ ३५॥

जनार्दनोऽपि भगवान् वचनाच्छङ्करस्य च ।
प्राप्य चक्रं शुभं तद्वै जहर्षाति स्वचेतसि ॥ ३६॥

कृत्वा ध्यानं च तच्छम्भोः स्तोत्रमेतन्निरन्तरम् ।
पपाठाध्यापयामास भक्तेभ्यस्तदुपादिशत् ॥ ३७॥

इति पृष्टं मयाख्यातं शृण्वतां पापहारकम् ।
अतः परं च किं श्रेष्ठाः प्रष्टुमिच्छथ वै पुनः ॥ ३८॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां शिवसहस्रनामस्तोत्रफलवर्णनं नाम षड्विंशोऽध्यायः ॥ ४.३६॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.३७. सप्तत्रिंशोऽध्यायः । देवर्षिनृपशैवत्ववर्णनम् ।

ऋषय ऊचुः ।
सूत सूत महाभाग ज्ञानवानसि सुव्रत ।
पुनरेव शिवस्यैव चरितं ब्रूहि विस्तरात् ॥ १॥

पुरातनाश्च राजान ऋषयो देवतास्तथा ।
आराधनं च तस्यैव चक्रुर्देववरस्य हि ॥ २॥

सूत उवाच ।
साधु पृष्टमृषिश्रेष्ठाः श्रूयतां कथयामि वः ।
चरित्रं शाङ्करं रम्यं शृण्वतां भुक्तिमुक्तिदम् ॥ ३॥

एतदेव पुरा पृष्टो नारदेन पितामहः ।
प्रत्युवाच प्रसन्नात्मा नारदं मुनिसत्तमम् ॥ ४॥

ब्रह्मोवाच ।
शृणु नारद सुप्रीत्या शाङ्करं चरितं वरम् ।
प्रवक्ष्यामि भवत्स्नेहान्महापातकनाशनम् ॥ ५॥

रमया सहितो विष्णुः शिवपूजां चकार ह ।
कृपया परमेशस्य सर्वान्कामानवाप हि ॥ ६॥

अहं पितामहश्चापि शिवपूजनकारकः ।
तस्यैव कृपया तात विश्वसृष्टिकरः सदा ॥ ७॥

शिवपूजाकरा नित्यं मत्पुत्राः परमर्षयः ।

अन्ये च ऋषयो ये ते शिवपूजनकारकाः ॥ ८॥

नारद त्वं विशेषेण शिवपूजनकारकः ।
सप्तर्षयो वसिष्ठाद्याः शिवपूजनकारकाः ॥ ९॥

अरुन्धती महासाध्वी लोपामुद्रा तथैव च ।
अहल्या गौतमस्त्री च शिवपूजनकारिकाः ॥ १०॥

दुर्वासाः कौशिकः शक्तिर्दधीचो गौतमस्तथा ।
कणादो भार्गवो जीवो वैशम्पायन एव च ॥ ११॥

एते च मुनयः सर्वे शिवपूजाकरा मताः ।
तथा पराशरो व्यासः शिवपूजारतः सदा ॥ १२॥

उपमन्युर्महाभक्तः शिवस्य परमात्मनः ।
याज्ञवल्क्यो महाशैवो जैमिनिर्गर्ग एव च ॥ १३॥

शुकश्च शौनकाद्याश्च शङ्करस्य प्रपूजकाः ।
अन्येऽपि बहवः सन्ति मुनयो मुनिसत्तमाः ॥ १४॥

अदितिर्देवमाता च नित्यं प्रीत्या चकार ह ।
पार्थिवीं शैवपूजां वै सवधूः प्रेमतत्परा ॥ १५॥

शक्रादयो लोकपाला वसवश्च सुरास्तथा ।
महाराजिकदेवाश्च साध्याश्च शिवपूजकाः ॥ १६॥

गन्धर्वाः किन्नराद्याश्चोपसुराः शिवपूजकाः ।
तथासुरा महात्मानः शिवपूजाकरा मताः ॥ १७॥

हिरण्यकशिपुर्दैत्यः सानुजः ससुतो मुने ।
शिवपूजाकरो नित्यं विरोचनबली तथा ॥ १८॥

महाशैवः स्मृतो बाणो हिरण्याक्षसुतास्तथा ।
वृषपर्वा दनुस्तात दानवाः शिवपूजकाः ॥ १९॥

शेषश्च वासुकिश्चैव तक्षकश्च तथाऽपरे ।
शिवभक्ता महानागा गरुडाद्याश्च पक्षिणः ॥ २०॥

सूर्यचन्द्रावुभौ देवौ पृथ्व्यां वंशप्रवर्तकौ ।
शिवसेवारतौ नित्यं सवश्यौ तौ मुनीश्वर ॥ २१॥

मनवश्च तथा चक्रुः स्वायम्भुवपुरः सराः ।
शिवपूजां विशेषेण शिववेषधरा मुने ॥ २२॥

प्रियव्रतश्च तत्पुत्रास्तथा चोत्तानपात्सुतः ।
तद्वंशाश्चैव राजानः शिवपूजनकारकाः ॥ २३॥

ध्रुवश्च ऋषभश्चैव भरतो नवयोगिनः ।
तद्भ्रातरः परे चापि शिवपूजनकारकाः ॥ २४॥

वैवस्वतसुतास्तार्क्ष्य इक्ष्वाकुप्रमुखा नृपाः ।
शिवपूजारतात्मानः सर्वदा सुखभोगिनः ॥ २५॥

ककुत्स्थश्चापि मान्धाता सगरः शैवसत्तमः ।
मुचुकुन्दो हरिश्चन्द्रः कल्माषाङ्घ्रिस्तथैव च ॥ २६॥

भगीरथादयो भूपा बहवो नृपसत्तमाः ।
शिवपूजाकरा ज्ञेयाः शिववेषविधायिनः ॥ २७॥

खट्वाङ्गश्च महाराजो देवसाहाय्यकारकः ।
विधितः पार्थिवीं मूर्तिं शिवस्यापूजयत्सदा ॥ २८॥

तत्पुत्रो हि दिलीपश्च शिवपूजनकृत् सदा ।
रघुस्तत्तनयः शैवः सुप्रीत्या शिवपूजकः ॥ २९॥

अजः शिवार्चकस्तस्य तनयो धर्मयुद्धकृत् ।
जातो दशरथो भूयो महाराजो विशेषतः ॥ ३०॥

पुत्रार्थे पार्थिवीं मूर्त्तिं शैवीं दशरथो हि सः ।
समानर्च विशेषेण वसिष्ठस्याज्ञया मुनेः ॥ ३१॥

पुत्रेष्टिं च चकारासौ पार्थिवो भवभक्तिमान् ।
ऋष्यशृङ्गमुनेराज्ञां सम्प्राप्य नृपसत्तमः ॥ ३२॥

कौसल्या तत्प्रिया मूर्त्तिं पार्थिवीं शाङ्करीं मुदा ।
ऋष्यशृङ्गसमादिष्टा समानर्च सुताप्तये ॥ ३३॥

सुमित्रा च शिवं प्रीत्या कैकेयी नृपवल्लभा ।
पूजयामास सत्पुत्रप्राप्तये मुनिसत्तम ॥ ३४॥

शिवप्रसादतस्ता वै पुत्रान्प्रापुः शुभङ्करान् ।
महाप्रतापिनो वीरान् सन्मार्गनिरतान्मुने ॥ ३५॥

ततः शिवाज्ञया तस्मात्तासु राज्ञः स्वयं हरिः ।
चतुर्भिश्चैव रूपैश्चाविर्बभूव नृपात्मजः ॥ ३६॥

कौसल्यायाः सुतो रामः सुमित्रायाश्च लक्ष्मणः ।
शत्रुघ्नश्चैव कैकेय्या भरतश्चेति सुव्रताः ॥ ३७॥

रामः स सहजो नित्यं पार्थिवं समपूजयत् ।
भस्मरुद्राक्षधारी च विरजागममास्थितः ॥ ३८॥

तद्वंशे ये समुत्पन्ना राजानः सानुगा मुने ।
ते सर्वे पार्थिवं लिङ्गं शिवस्य समपूजयन् ॥ ३९॥

सुद्युम्नश्च महाराजः शैवो मनुसुतो मुने ।
शिवशापात्प्रियाहेतोरभून्नारी ससवेकः ॥ ४०॥

पार्थिवेशसमर्चातः पुनः सोऽभूत्पुमान्वरः ।
मासं स्त्री पुरुषो मासमेवं स्त्रीत्वं न्यवर्तत ॥ ४१॥

ततो राज्यं परित्यज्य शिवधर्मपरायणः ।
शिववेषधरो भक्त्या दुर्लभं मोक्षमाप्तवान् ॥ ४२॥

पुरूरवाश्च तत्पुत्रो महाराजः सुपूजकः ।
शिवस्य देवदेवस्य तत्सुतः शिवपूजकः ॥ ४३॥

भरतस्तु महापूजां शिवस्यैव सदाऽकरोत् ।
नहुषश्च महाशैवः शिवपूजारतो ह्यभूत् ॥ ४४॥

ययातिः शिवपूजातः सर्वान्कामानवाप्तवान् ।
अजीजनत्सुतान्पञ्च शिवधर्मपरायणान् ॥ ४५॥

तत्सुता यदुमुख्याश्च पञ्चापि शिवपूजकाः ।
शिवपूजाप्रभावेण सर्वान्कामांश्च लेभिरे ॥ ४६॥

अन्येऽपि ये महाभागाः समानर्चुः शिवं हि ते ।
तद्वंश्या अन्यवंश्याश्च भुक्तिमुक्तिप्रदं मुने ॥ ४७॥

कृष्णेन च कृतं नित्यं बदरीपर्वतोत्तमे ।
पूजनं तु शिवस्यैव सप्तमासावधि स्वयम् ॥ ४८॥

प्रसन्नाद्भगवांस्तस्माद्वरान्दिव्याननेकशः ।

सम्प्राप्य च जगत्सर्वं वशेऽनयत शङ्करात् ॥ ४९॥

प्रद्युम्नः तत्सुतस्तात शिवपूजाकरः सदा ।
अन्ये च कार्ष्णिप्रवराः साम्बाद्याः शिवपूजकाः ॥ ५०॥

जरासन्धो महाशैवस्तद्वंश्याश्च नृपास्तथा ।
निमिः शैवश्च जनकः तत्पुत्राः शिवपूजकाः ॥ ५१॥

नलेन च कृता पूजा वीरसेनसुतेन वै ।
पूर्वजन्मनि यो भिल्लो वने पान्थसुरक्षकः ॥ ५२॥

यतिश्च रक्षितस्तेन पुरा हरसमीपतः ।
स्वयं व्याघ्रादिभी रात्रौ भक्षितश्च मृतो वृषात् ॥ ५३॥

तेन पुण्यप्रभावेण स भिल्लो हि नलोऽभवत् ।
चक्रवर्ती महाराजो दमयन्तीप्रियोऽभवत् ॥ ५४॥

इति ते कथितं तात यत्पृष्टं भवतानघ ।
शाङ्करं चरितं दिव्यं किमन्यत्प्रष्टुमिच्छसि ॥ ५५॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां देवर्षिनृपशैवत्ववर्णनं नाम सप्तत्रिंशोऽध्यायः ॥ ४.३७॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.३८. अष्टत्रिंशोऽध्यायः । शिवरात्रिव्रतमहिमनिरूपणम् ।

ऋषय ऊचुः ।
धन्योऽसि कृतकृत्योऽसि जीवितं सफलं तव ।
यच्छ्रावयसि नस्तात महेश्वरकथां शुभाम् ॥ १॥

बहुभिश्चर्षिभिः सूत श्रुतं यद्यपि वस्तु सत् ।
सन्देहो न गतोऽस्माकं तदेतत्कथयामि ते ॥ २॥

केन व्रतेन सन्तुष्टः शिवो यच्छति सत्सुखम् ।
कुशलः शिवकृत्ये त्वं तस्मात्पृच्छामहे वयम् ॥ ३॥

भुक्तिर्मुक्तिश्च लभ्येत भक्तैर्येन व्रतेन वै ।
तद्वद त्वं विशेषेण व्यासशिष्य नमोऽस्तु ते ॥ ४॥

सूत उवाच ।
सम्यक्पृष्टमृषिश्रेष्ठा भवद्भिः करुणात्मभिः ।
स्मृत्वा शिवपदाम्भोजं कथयामि यथाश्रुतम् ॥ ५॥

यथा भवद्भिः पृच्छ्येत तथा पृष्टं हि वेधसा ।
हरिणा शिवया चैव तथा वै शङ्करं प्रति ॥ ६॥

कस्मिंश्चित्समये तैस्तु पृष्टं च परमात्मने ।
केन व्रतेन सन्तुष्टो भुक्तिं मुक्तिं च यच्छसि ॥ ७॥

इति पृष्टस्तदा तैस्तु हरिणा तेन वै तदा ।
तदहं कथयाम्यद्य शृण्वतां पापहारकम् ॥ ८॥

। शिव उवाच ॥

भूरि व्रतानि मे सन्ति भुक्तिमुक्तिप्रदानि च ।
मुख्यानि तत्र ज्ञेयानि दशसङ्ख्यानि तानि वै ॥ ९॥

दश शैवव्रतान्याहुर्जाबालश्रुतिपारगाः ।
तानि व्रतानि यत्नेन कार्याण्येव द्विजैः सदा ॥ १०॥

प्रत्यष्टम्यां प्रयत्नेन कर्तव्यं नक्तभोजनम् ।
कालाष्टम्यां विशेषेण हरे त्याज्यंऽह्निभोजनम् ॥ ११॥

एकादश्यां सितायां तु त्याज्यं विष्णोऽह्निभोजनम् ।
असितायां तु भोक्तव्यं नक्तमभ्यर्च्य मां हरे ॥ १२॥

त्रयोदश्यां सितायां तु कर्तव्यं निशि भोजनम् ।
असितायां तु भूतायां तन्न कार्यं शिवव्रतैः ॥ १३॥

निशि यत्नेन कर्तव्यं भोजनं सोमवासरे ।
उभयोः पक्षयोर्विष्णो सर्वस्मिञ्छिवतत्परैः ॥ १४॥

व्रतेष्वेतेषु सर्वेषु शैवा भोज्याः प्रयत्नतः ।
यथाशक्ति द्विजश्रेष्ठा व्रतसम्पूर्तिहेतवे ॥ १५॥

व्रतान्येतानि नियमात्कर्तव्यानि द्विजन्मभिः ।
व्रतान्येतानि तु त्यक्त्वा जायन्ते तस्करा द्विजाः ॥ १६॥

मुक्तिमार्गप्रवीणैश्च कर्तव्यं नियमादिति ।
मुक्तेस्तु प्रापकं चैव चतुष्टयमुदाहृतम् ॥ १७॥

शिवार्चनं रुद्रजप उपवासः शिवालये ।
वाराणस्यां च मरणं मुक्तिरेषा सनातनी ॥ १८॥

अष्टमी सोमवारे च कृष्णपक्षे चतुर्दशी ।
शिवतुष्टिकरं चैतन्नात्र कार्या विचारणा ॥ १९॥

चतुर्ष्वपि बलिष्ठं हि शिवरात्रिव्रतं हरे ।
तस्मात्तदेव कर्तव्यं भुक्तिमुक्तिफलेप्सुभिः ॥ २०॥

एतस्माच्च व्रतादन्यन्नास्ति नृणां हितावहम् ।
एतद् व्रतं तु सर्वेषां धर्मसाधनमुत्तमम् ॥ २१॥

निष्कामानां सकामानां सर्वेषां च नृणां तथा ।
वर्णानामाश्रमाणां च स्त्रीबालानां तथा हरे ॥ २२॥

दासानां दासिकानां च देवादीनां तथैव च ।
शरीरिणां च सर्वेषां हितमेतद् व्रतं वरम् ॥ २३॥

माघस्य ह्यसिते पक्षे विशिष्टा साति कीर्तिता ।
निशीथव्यापिनी ग्राह्या हत्याकोटिविनाशिनी ॥ २४॥

तद्दिने चैव यत्कार्यं प्रातरारभ्य केशव ।
श्रूयतां तन्मनो दत्त्वा सुप्रीत्या कथयामि ते ॥ २५॥

प्रातरुत्थाय मेधावी परमानन्दसंयुतः ।
समाचरेन्नित्यकृत्यं स्नानादिकमतन्द्रितः ॥ २६॥

शिवालये ततो गत्वा पूजयित्वा यथाविधि ।
नमस्कृत्य शिवं पश्चात्सङ्कल्पं सम्यगाचरेत् ॥ २७॥

देवदेव महादेव नीलकण्ठ नमोऽस्तु ते ।
कर्तुमिच्छाम्यहं देव शिवरात्रिव्रतं तव ॥ २८॥

तव प्रभावाद्देवेश निर्विघ्नेन भवेदिति ।
कामाद्याः शत्रवो मां वै पीडां कुर्वन्तु नैव हि ॥ २९॥

एवं सङ्कल्पमास्थाय पूजाद्रव्यं समाहरेत् ।

सुस्थले चैव यल्लिङ्गं प्रसिद्धं चागमेषु वै ॥ ३०॥

रात्रौ तत्र स्वयं गत्वा सम्पाद्य विधिमुत्तमम् ॥

शिवस्य दक्षिणे भागे पश्चिमे वा स्थले शुभे ॥ ३१॥

निधाय चैव तद् द्रव्यं पूजार्थं शिवसन्निधौ ।
पुनः स्नायात्तदा तत्र विधिपूर्वं नरोत्तमः ॥ ३२॥

परिधाय शुभं वस्त्रमन्तर्वासः शुभं तथा ।
आचम्य च त्रिवारं हि पूजारम्भं समाचरेत् ॥ ३३॥

यस्य मन्त्रस्य यद् द्रव्यं तेन पूजां समाचरेत् ।
अमन्त्रकं न कर्तव्यं पूजनं तु हरस्य च ॥ ३४॥

गीतैर्वाद्यैस्तथा नृत्यैर्भक्तिभावसमन्वितैः ।
पूजनं प्रथमे यामे कृत्वा मन्त्रं जपेद् बुधः ॥ ३५॥

पार्थिवं च तदा श्रेष्ठं विदध्यान्मन्त्रवान्यदि ।
कृतनित्यक्रियः पश्चात्पार्थिवं च समर्चयेत् ॥ ३६॥

प्रथमं पार्थिवं कृत्वा पश्चात्स्थापनमाचरेत् ।
स्तोत्रैर्नानाविधैर्देवं तोषयेद् वृषभध्वजम् ॥ ३७॥

माहात्म्यं व्रतसम्भूतं पठितव्यं सुधीमता ।
श्रोतव्यं भक्तवर्येण व्रतसम्पूर्तिकाम्यया ॥ ३८॥

चतुर्ष्वपि च यामेषु मूर्तीनां च चतुष्टयम् ।
कृत्वावाहनपूर्वं हि विसर्गावधि वै क्रमात् ॥ ३९॥

कार्यं जागरणं प्रीत्या महोत्सवसमन्वितम् ।
प्रातः स्नात्वा पुनस्तत्र स्थापयेत्पूजयेच्छिवम् ॥ ४०॥

ततः सम्प्रार्थयेच्छम्भुं नतस्कन्धः कृताञ्जलिः ।
कृतसम्पूर्णव्रतको नत्वा तं च पुनः पुनः ॥ ४१॥

नियमो यो महादेव कृतश्चैव त्वदाज्ञया ।
विसृज्यते मया स्वामिन् व्रतं जातमनुत्तमम् ॥ ४२॥

व्रतेनानेन देवेश यथाशक्तिकृतेन च ।
सन्तुष्टो भव शर्वाद्य कृपां कुरु ममोपरि ॥ ४३॥

पुष्पाञ्जलिं शिवे दत्त्वा दद्याद्दानं यथाविधि ।
नमस्कृत्य शिवायैव नियमं तं विसर्जयेत् ॥ ४४॥

यथाशक्ति द्विजाञ्छैवान्यतिनश्च विशेषतः ।
भोजयित्वा सुसन्तोष्य स्वयं भोजनमाचरेत् ॥ ४५॥

यामे यामे यथा पूजा कार्या भक्तवरैर्हरे ।
शिवरात्रौ विशेषेण तामहं कथयामि ते ॥ ४६॥

प्रथमे चैव यामे च स्थापितं पार्थिवं हरे ।
पूजयेत्परया भक्त्या सूपचारैरनेकशः ॥ ४७॥

पञ्चद्रव्यैश्च प्रथमं पूजनीयो हरः सदा ।
तस्य तस्य च मन्त्रेण पृथग्द्रव्यं समर्पयेत् ॥ ४८॥

तच्च द्रव्यं समर्प्यैव जलधारां ददेत वै ।
पश्चाच्च जलधाराभिर्द्रव्याणुत्तारयेद् बुधः ॥ ४९॥

शतमष्टोत्तरं मन्त्रं पठित्वा जलधारया ।
पूजयेच्च शिवं तत्र निर्गुणं गुणरूपिणम् ॥ ५०॥

गुरुदत्तेन मन्त्रेण पूजयेद् वृषभध्वजम् ।
अन्यथा नाममन्त्रेण पूजयेद्वै सदाशिवम् ॥ ५१॥

चन्दनेन विचित्रेण तण्डुलैश्चाप्यखण्डितैः ।
कृष्णैश्चैव तिलैः पूजा कार्या शम्भोः परात्मनः ॥ ५२॥

पुष्पैश्च शतपत्रैश्च करवीरैस्तथा पुनः ।
अष्टभिर्नाममन्त्रैश्चार्पयेत्पुष्पाणि शङ्करे ॥ ५३॥

भवः शर्वस्तथा रुद्रः पुनः पशुपतिस्तथा ।
उग्रो महांस्तथा भीम ईशान इति तानि वै ॥ ५४॥

श्रीपूर्वैश्च चतुर्थ्यन्तैर्नामभिः पूजयेच्छिवम् ।
पश्चाद्धूपं च दीपं च नैवेद्यं च ततः परम् ॥ ५५॥

आद्ये यामे च नैवेद्यं पक्वान्नं कारयेद् बुधः ।
अर्घं च श्रीफलं दत्त्वा ताम्बूलं च निवेदयेत् ॥ ५६॥

नमस्कारं ततो ध्यानं जपः प्रोक्तो गुरोर्मनोः ।
अन्यथा पञ्चवर्णेन तोषयेत्तेन शङ्करम् ॥ ५७॥

धेनुमुद्रां प्रदर्श्याथ सुजलैस्तर्पणं चरेत् ।
पञ्चब्राह्मणभोजं च कल्पयेद्वै यथाबलम् ॥ ५८॥

महोत्सवश्च कर्तव्यो यावद्यामो भवेदिह ।
ततः पूजाफलं तस्मै निवेद्य च विसर्जयेत् ॥ ५९॥

पुनर्द्वितीये यामे च सङ्कल्पं सुसमाचरेत् ।
अथवैकदैव सङ्कल्प्य कुर्यात्पूजां तथाविधाम् ॥ ६०॥

द्रव्यैः पूर्वैस्तथा पूजां कृत्वा धारां समर्पयेत् ।
पूर्वतो द्विगुणं मन्त्रं समुच्चार्यार्चयेच्छिवम् ॥ ६१॥

पूर्वैस्तिलयवैश्चाथ कमलैः पूजयेच्छिवम् ।
बिल्वपत्रैर्विशेषेण पूजयेत्परमेश्वरम् ॥ ६२॥

अर्घ्यं च बीजपूरेण नैवेद्यं पायसं तथा ।
मन्त्रावृत्तिस्तु द्विगुणा पूर्वतोऽपि जनार्दन ॥ ६३॥

ततश्च ब्राह्मणानां हि भोज्यसङ्कल्पमाचरेत् ।
अन्यत्सर्वं तथा कुर्याद्यावच्च द्वितयावधि ॥ ६४॥

यामे प्राप्ते तृतीये च पूर्ववत्पूजनं चरेत् ।
यवस्थाने च गोधूमाः पुष्पाण्यर्कभवानि च ॥ ६५॥

धूपैश्च विविधैस्तत्र दीपैर्नानाविधैरपि ।
नैवेद्यापूपकैर्विष्णो शाकैर्नानाविधैरपि ॥ ६६॥

कृत्वैवं चाथ कर्पूरैरारार्तिकविधिं चरेत् ।
अर्घ्यं सदाडिमं दद्याद् द्विगुणं जपमाचरेत् ॥ ६७॥

ततश्च ब्रह्मभोजस्य सङ्कल्पं च सदक्षिणम् ।
उत्सवं पूर्ववत्कुर्याद्यावद्यामावधिर्भवेत् ॥ ६८॥

यामे चतुर्थे सम्प्राते कुर्यात्तस्य विसर्जनम् ।
प्रयोगादि पुनः कृत्वा पूजां विधिवदाचरेत् ॥ ६९॥

माषैः प्रियङ्गुभिर्मुद्गैः सप्तधान्यैस्तथाथवा ।
शङ्खीपुष्पैर्बिल्वपत्रैः पूजयेत्परमेश्वरम् ॥ ७०॥

नैवेद्यं तत्र दद्याद्वै मधुरैर्विविधैरपि ।

अथवा चैव माषान्नैस्तोषयेच्च सदाशिवम् ॥ ७१॥

अर्घं दद्यात्कदल्याश्च फलेनैवाथ वा हरे ।
विविधैश्च फलैश्चैव दद्यादर्घ्यं शिवाय च ॥ ७२॥

पूर्वतो द्विगुणं कुर्यान्मन्त्रजापं नरोत्तमः ।
सङ्कल्पं ब्रह्मभोजस्य यथाशक्ति चरेद् बुधः ॥ ७३॥

गीतैर्वाद्यैस्तथा नृत्यैर्नयेत्कालं च भक्तितः ।
महोत्सवैर्भक्तजनैर्यावत्स्यादरुणोदयः ॥ ७४॥

उदये च तथा जाते पुनः स्नात्वार्चयेच्छिवम् ।
नानापूजोपहारैश्च स्वाभिषेकमथाचरेत् ॥ ७५॥

नानाविधानि दानानि भोज्यं च विविधं तथा ।
ब्राह्मणानां यतीनां च कर्तव्यं यामसङ्ख्यया ॥ ७६॥

शङ्कराय नमस्कृत्य पुष्पाञ्जलिमथाचरेत् ।
प्रार्थयेत्सुस्तुतिं कृत्वा मन्त्रैरेतैर्विचक्षणः ॥ ७७॥

तावकस्त्वद्गतप्राणस्त्वच्चित्तोऽहं सदा मृड ।
कृपानिधे इति ज्ञात्वा यथायोग्यं तथा कुरु ॥ ७८॥

अज्ञानाद्यदि वा ज्ञानाज्जपपूजादिकं मया ।
कृपानिधित्वाज्ज्ञात्वैव भूतनाथ प्रसीद मे ॥ ७९॥

अनेनैवोपवासेन यज्जातं फलमेव च ।
तेनैव प्रीयतां देवः शङ्करः सुखदायकः ॥ ८०॥

कुले मम महादेव भजनं तेऽस्तु सर्वदा ।
माभूत्तस्य कुले जन्म यत्र त्वं नहि देवता ॥ ८१॥

पुष्पाञ्जलिं समर्प्यैवं तिलकाशिष एव च ।
गृह्णीयाद् ब्राह्मणेभ्यश्च ततः शम्भुं विसर्जयेत् ॥ ८२॥

एवं व्रतं कृतं येन तस्माद् दूरो हरो न हि ।
न शक्यते फलं वक्तुं नादेयं विद्यते मम ॥ ८३॥

अनायासतया चेद्वै कृतं व्रतमिदं परम् ।
तस्य वै मुक्तिबीजं च जातं नात्र विचारणा ॥ ८४॥

प्रतिमासं व्रतं चैव कर्तव्यं भक्तितो नरैः ।
उद्यापनविधिं पश्चात्कृत्वा साङ्गफलं लभेत् ॥ ८५॥

व्रतस्य करणान्नूनं शिवोऽहं सर्वदुःखहा ।
दद्मि भुक्तिं च मुक्तिं च सर्वं वै वाञ्छितं फलम् ॥ ८६ ॥

सूत उवाच ।
इति शिववचनं निशम्य विष्णु-
र्हिततरमद्भुतमाजगाम धाम ।
तदनु व्रतमुत्तमं जनेषु
समचरदात्महितेषु चैतदेव ॥ ८७॥

कदाचिन्नारदायाथ शिवरात्रिव्रतं त्विदम् ।
भुक्तिमुक्तिप्रदं दिव्यं कथयामास केशवः ॥ ८८॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां व्याधेश्वरमाहात्म्ये शिवरात्रिव्रतमहिमनिरूपणं नामाष्टत्रिंशोऽध्यायः ॥ ४.३८॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.३९. एकोनचत्वारिंशोऽध्यायः । शिवरात्रिव्रतोद्यापनम् ।

ऋषय उचुः ।
उद्यापनविधिं ब्रूहि शिवरात्रिव्रतस्य च ।
यत्कृत्वा शङ्करः साक्षात्प्रसन्नो भवति ध्रुवम् ॥ १॥

सूत उवाच ।
श्रूयतामृषयो भक्त्या तदुद्यापनमादरात् ।
यस्यानुष्ठानतः पूर्णं व्रतं भवति तद् ध्रुवम् ॥ २॥

चतुर्दशाब्दं कर्तव्यं शिवरात्रिव्रतं शुभम् ।
एकभक्तं त्रयोदश्यां चतुर्दश्यामुपोषणम् ॥ ३॥

शिवरात्रिदिने प्राप्ते नित्यं सम्पाद्य वै विधिम् ।
शिवालयं ततो गत्वा पूजां कृत्वा यथाविधि ॥ ४॥

ततश्च कारयेद्दिव्यं मण्डलं तत्र यत्नतः ।
गौरीतिलकनाम्ना वै प्रसिद्धं भुवनत्रये।५॥

तन्मध्ये लेखयेद्दिव्यं लिङ्गतोभद्रमण्डलम् ।
अथवा सर्वतोभद्रं मण्डपान्तः प्रकल्पयेत् ॥ ६॥

कुम्भास्तत्र प्रकर्तव्याः प्राजापत्यविसंज्ञया ।
सवस्त्राः सफलास्तत्र दक्षिणासहिताः शुभाः ॥ ७॥

मण्डलस्य च पार्श्वे वै स्थापनीयाः प्रयत्नतः ।
मध्ये चैकश्च संस्थाप्यः सौवर्णो वापरो घटः ॥ ८॥

तत्रोमासहितां शम्भुमूर्तिं निर्माय हाटकीम् ।
पलेन वा तदर्धेन यथाशक्त्याथवा व्रती ॥ ९॥

निधाय वामभागे तु शिवामूर्तिमतन्द्रितः ।
मदीयां दक्षिणे भागे कृत्वा रात्रौ प्रपूजयेत् ॥ १०॥

आचार्यं वरयेत्तत्र चर्त्विग्भिः सहितं शुचिम् ।
अनुज्ञातश्च तैर्भक्त्या शिवपूजां समाचरेत् ॥ ११॥

रात्रौ जागरणं कुर्यात्पूजां यामोद्भवां चरन् ।
रात्रिमाक्रमयेत्सर्वां गीतनृत्यादिना व्रती ॥ १२॥

एवं सम्पूज्य विधिवत्सन्तोष्य प्रातरेव च ।
पुनः पूजां ततः कृत्वा होमं कुर्याद्यथाविधि ॥ १३॥

यथाशक्ति विधानं च प्राजापत्यं समाचरेत् ।
ब्राह्मणान्भोजयेत्प्रीत्या दद्याद्दानानि भक्तितः ॥ १४॥

ऋत्विजश्च सपत्नीकान्वस्त्रालङ्कारभूषणैः ।
अलङ्कृत्य विधानेन दद्याद्दानं पृथक्पृथक् ॥ १५॥

गां सवत्सां विधानेन यथोपस्करसंयुताम् ।
उक्त्वाचार्याय वै दद्याच्छिवो मे प्रीयतामिति ॥ १६॥

ततः सकुम्भां तन्मूर्तिं सवस्त्रां वृषभे स्थिताम् ।
सर्वालङ्कारसहितामाचार्याय निवेदयेत् ॥ १७॥

ततः सम्प्रार्थयेद्देवं महेशानं महाप्रभुम् ।

कृताञ्जलिर्नतस्कन्धः सुप्रीत्या गद्गदाक्षरः ॥ १८॥

देवदेव महादेव शरणागतवत्सल ।
व्रतेनानेन देवेश कृपां कुरु ममोपरि ॥ १९॥

मया भक्त्यनुसारेण व्रतमेतत्कृतं शिव ।
न्यूनं सम्पूर्णतां यातु प्रसादात्तव शङ्कर ॥ २०॥

अज्ञानाद्यदि वा ज्ञानाज्जपपूजादिकं मया ।
कृतं तदस्तु कृपया सफलं तव शङ्कर ॥ २१॥

एवं पुष्पाञ्जलिं दत्त्वा शिवाय परमात्मने ।
नमस्कारं ततः कुर्यात्प्रार्थनां पुनरेव च ॥ २२॥

एवं व्रतं कृतं येन न्यूनं तस्य न विद्यते ।
मनोभीष्टां ततः सिद्धिं लभते नात्र संशयः ॥ २३॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां शिवरात्रिव्रतोद्यापनं नामैकोनचत्वारिंशोऽध्यायः ॥ ४.३९॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.४०. चत्वारिंशोऽध्यायः । शिवरात्रिव्रतमाहात्म्यवर्णनम् ।

ऋषय ऊचुः ।
सूत ते वचनं श्रुत्वा परानन्दं वयं गताः ।
विस्तरात्कथय प्रीत्या तदेव व्रतमुत्तमम् ॥ १॥

कृतं पुरा च केनेह सूतैतद् व्रतमुत्तमम् ।
कृत्वाप्यज्ञानतश्चैव प्राप्तं किं फलमुत्तमम् ॥ २॥

सूत उवाच ।
श्रूयतामृषयः सर्वे कथयामि पुरातनम् ।
इतिहासं निषादस्य सर्वपापप्रणाशनम् ॥ ३॥

पुरा कश्चिद्वने भिल्लो नाम्ना ह्यासीद् गुरुद्रुहः ।

कुटुम्बी बलवान्क्रूरः क्रूरकर्मपरायणः ॥ ४॥

निरन्तरं वने गत्वा मृगान् हन्ति स्म नित्यशः ।
चौर्यं च विविधं तत्र करोति स्म वने वसन् ॥ ५॥

बाल्यादारभ्य तेनेह कृतं किञ्चिच्छुभं न हि ।
महान्कालो व्यतीयाय वने तस्य दुरात्मनः ॥ ६॥

कदाचिच्छिवरात्रिश्च प्राप्तासीत्तत्र शोभना ।
न दुरात्मा स्म जानाति महद्वननिवासकृत् ॥ ७॥

एतस्मिन् समये भिल्लो मात्रा पित्रा स्त्रिया तथा ।
प्रार्थितश्च क्षुधाविष्टैर्भक्ष्यं देहि वनेचर ॥ ८॥

इति सम्प्रार्थितः सोऽपि धनुरादाय सत्वरम् ।
जगाम मृगहिंसार्थं बभ्राम सकलं वनम् ॥ ९॥

दैवयोगात्तदा तेन न प्राप्तं किञ्चिदेव हि ।
अस्तं प्राप्तस्तदा सूर्यः स वै दुःखमुपागतः ॥ १०॥

किं कर्तव्यं क्व गन्तव्यं न प्राप्तं मेऽद्य किञ्चन ।
बालाश्च ये गृहे तेषां किं पित्रोश्च भविष्यति ॥ ११॥

मदीयं वै कलत्रं च तस्याः किञ्चिद्भविष्यति ।
किञ्चिद् गृहीत्वा हि मया गन्तव्यं नान्यथा भवेत् ॥ १२॥

इत्थं विचार्य स व्याधो जलाशयसमीपगः ।
जलावतरणं यत्र तत्र गत्वा स्वयं स्थितः ॥ १३॥

अवश्यमत्र कश्चिद्वै जीवश्चैवागमिष्यति ।
तं हत्वा स्वगृहं प्रीत्या यास्यामि कृतकार्यकः ॥ १४॥

इति मत्वा स वै वृक्षमेकं बिल्वेति संज्ञकम् ।
समारुह्य स्थितस्तत्र जलमादाय भिल्लकः ॥ १५॥

कदायास्यति कश्चिद्वै कदा हन्यामहं पुनः ।
इति बुद्धिं समास्थाय स्थितोऽसौ क्षुत्तृषान्वितः ॥ १६॥

तद्रात्रौ प्रथमे यामे मृगी त्वेका समागता ।
तृषार्ता चकिता सा च प्रोत्फालं कुर्वती तदा ॥ १७॥

तां दृष्ट्वा च तदा तेन तद्वधार्थमथो शरः ।
संहृष्टेन द्रुतं बाणं धनुषि स्वे हि सन्दधे ॥ १८॥

इत्येवं कुर्वतस्तस्य जलं बिल्वदलानि च ।
पतितानि ह्यधस्तत्र शिवलिङ्गमभूत्ततः ॥ १९॥

यामस्य प्रथमस्यैव पूजा जाता शिवस्य च ।
तन्महिम्ना हि तस्यैव पातकं गलितं तदा ॥ २०॥

तत्रत्यं चैव तच्छब्दं श्रुत्वा सा हरिणी भिया ।
व्याधं दृष्ट्वा व्याकुला हि वचनं चेदमब्रवीत् ॥ २१॥

मृग्युवाच ।
किं कर्तुमिच्छसि व्याध सत्यं वद ममाग्रतः ।
तच्छ्रुत्वा हरिणीवाक्यं व्याधो वचनमब्रवीत् ॥ २२॥

व्याध उवाच ।
कुटुम्बं क्षुधितं मेऽद्य हत्वा त्वां तर्पयाम्यहम् ।
दारुणं तद्वचः श्रुत्वा दृष्ट्वा तं दुर्धरं खलम् ॥ २३॥

किं करोमि क्व गच्छामि ह्युपायं रचयाम्यहम् ।
इत्थं विचार्य सा तत्र वचनं चेदमब्रवीत् ॥ २४॥

मृग्युवाच ।
मन्मांसेन सुखं ते स्याद्देहस्यानर्थकारिणः ।
अधिकं किं महत्पुण्यं धन्याहं नात्र संशयः ॥ २५॥

उपकारकरस्यैव यत्पुण्यं जायते त्विह ।
तत्पुण्यं शक्यते नैव वक्तुं वर्षशतैरपि ॥ २६॥

परं तु शिशवो मेऽद्य वर्तन्ते स्वाश्रमेऽखिलाः ।
भगिन्यै तान्समर्प्यैव प्रायास्ये स्वामिनेऽथवा ॥ २७॥

न मे मिथ्यावचस्त्वं हि विजानीहि वनेचर ।
आयास्येऽहं पुनश्चेह समीपं ते न संशयः ॥ २८॥

स्थिता सत्येन धरणी सत्येनैव च वारिधिः ।
सत्येन जलधाराश्च सत्ये सर्वं प्रतिष्ठितम् ॥ २९॥

सूत उवाच ।

इत्युक्तोऽपि तया व्याधो न मेने तद्वचो यदा ।
तदा सुविस्मिता भीता वचनं साब्रवीत्पुनः ॥ ३०॥

मृग्युवाच ।
शृणु व्याध प्रवक्ष्यामि शपथं हि करोम्यहम् ।
आगच्छेयं यथा ते न समीपं स्वगृहाद्गता ॥ ३१॥

ब्राह्मणो वेदविक्रेता सन्ध्याहीनस्त्रिकालकम् ।
स्त्रियः स्वस्वामिनो ह्याज्ञां समुल्लङ्घ्य क्रियान्विताः ॥ ३२॥

कृतघ्ने चैव यत्पापं यत्पापं विमुखे हरे ।
द्रोहिणश्चैव यत्पापं यत्पापं धर्मलङ्घने ॥ ३३॥

विश्वासघातके यच्च तथा वै छलकर्तरि ।
तेन पापेन लिम्पामि यद्यहं नागमे पुनः ॥ ३४॥

इत्याद्यनेकशपथान्मृगी कृत्वा स्थिता यदा ।
तदा व्याधः स विश्वस्य गच्छेति गृहमब्रवीत् ॥ ३५॥

मृगी हृष्टा जलं पीत्वा गता स्वाश्रममण्डलम् ।
तावच्च प्रथमो यामस्तस्य निद्रां विना गतः ॥ ३६॥

तदीया भगिनी या वै मृगी च परिभाविता ।
तस्या मार्गं विचिन्वन्ती ह्याजगाम जलार्थिनी ॥ ३७॥

तां दृष्ट्वा च स्वयं भिल्लोऽकार्षीद्बाणस्य कर्षणम् ।
पूर्ववज्जलपत्राणि पतितानि शिवोपरि ॥ ३८॥

यामस्य च द्वितीयस्य तेन शम्भोर्महात्मनः ।
पूजा जाता प्रसङ्गेन व्याधस्य सुखदायिनी ॥ ३९॥

मृगी सा प्राह तं दृष्ट्वा किं करोषि वनेचर ।
पूर्ववत् कथितं तेन तच्छ्रुत्वाह मृगी पुनः ॥ ४०॥

मृग्युवाच ।
धन्याहं श्रूयतां व्याध सफलं देहधारणम् ।
अनित्येन शरीरेण ह्युपकारो भविष्यति ॥ ४१॥

परन्तु मम बालाश्च गृहे तिष्ठन्ति चार्भकाः ।
भर्त्रे तांश्च समर्प्यैव ह्यागमिष्याम्यहं पुनः ॥ ४२॥

व्याध उवाच ।
त्वया चोक्तं न मन्येऽहं हन्मि त्वां नात्र संशयः ।
तच्छ्रुत्वा हरिणी प्राह शपथं कुर्वती हरेः ॥ ४३॥

मृग्युवाच ।
शृणु व्याध प्रवक्ष्यामि नागच्छेयं पुनर्यदि ।
वाचा विचलितो यस्तु सुकृतं तेन हारितम् ॥ ४४॥

परिणीतां स्त्रियं हित्वा गच्छत्यन्यां च यः पुमान् ।
वेदधर्मं समुल्लङ्घ्य कल्पितेन च यो व्रजेत् ॥ ४५॥

विष्णुभक्तिसमायुक्तः शिवनिन्दां करोति यः ।
पित्रोः क्षयाहमासाद्य शून्यं चैवाक्रमेदिह ॥ ४६॥

कृत्वा च परितापं हि करोति वचनं पुनः ।
तेन पापेन लिम्पामि नागच्छेयं पुनर्यदि ॥ ४७॥

सूत उवाच ।
इत्युक्तश्च तया व्याधो गच्छेत्याह मृगीं च सः ।
सा मृगी च जलं पीत्वा हृष्टागच्छत्स्वमाश्रमम् ॥ ४८॥

तावद् द्वितीयो यामो वै तस्य निद्रां विना गतः ।
एतस्मिन्समये तत्र प्राप्ते यामे तृतीयके ॥ ४९॥

ज्ञात्वा विलम्बं चकितस्तदन्वेषणतत्परः ।
तद्यामे मृगमद्राक्षीज्जलमार्गगतं ततः ॥ ५०॥

पुष्टं मृगं च तं दृष्ट्वा हृष्टो वनचरः स वै ।
शरं धनुषि सन्धाय हन्तुं तं हि प्रचक्रमे ॥ ५१॥

तदैवं कुर्वतस्तस्य बिल्वपत्राणि कानिचित् ।
तत्प्रारब्धवशाद् द्विजाः पतितानि शिवोपरि ॥ ५२॥

तेन तृतीययामस्य तद्रात्रौ तस्य भाग्यतः ।
पूजा जाता शिवस्यैव कृपालुत्वं प्रदर्शितम् ॥ ५३॥

श्रुत्वा तत्र च तं शब्दं किं करोषीति प्राह सः ।
कुटुम्बार्थमहं हन्मि त्वां व्याधश्चेति सोऽब्रवीत् ॥ ५४॥

तच्छ्रुत्वा व्याधवचनं हरिणो हृष्टमानसः ।

द्रुतमेव च तं व्याधं वचनं चेदमब्रवीत् ॥ ५५॥

हरिण उवाच ।
धन्योऽहं पुष्टिमानद्य भवत्तृप्तिर्भविष्यति ।
यस्याङ्गं नोपकारार्थं तस्य सर्वं वृथा गतम् ॥ ५६॥

यो वै सामर्थ्ययुक्तश्च नोपकारं करोति वै ।
तत्सामर्थ्यं भवेद् व्यर्थं परत्र नरकं व्रजेत् ॥ ५७॥

परन्तु बालकान् स्वांश्च समर्प्य जननीं शिशून् ।
आश्वास्याप्यथ तान् सर्वानागमिष्याम्यहं पुनः ॥ ५८॥

इत्युक्तस्तेन स व्याधो विस्मितोऽतीव चेतसि ।
मनाक् शुद्धमना नष्टपापपुञ्जो वचोऽब्रवीत् ॥ ५९॥

व्याध उवाच ।
ये ये समागताश्चात्र ते ते सर्वे त्वया यथा ।
कथयित्वा गता ह्यत्र नायान्त्यद्यापि वञ्चकाः ॥ ६०॥

त्वं चापि सङ्कटे प्राप्तो व्यलीकं च गमिष्यसि ।
मम सञ्जीवनं चाद्य भविष्यति कथं मृग ॥ ६१॥

मृग उवाच ।
शृणु व्याध प्रवक्ष्यामि नानृतं विद्यते मयि ।
सत्येन सर्वं ब्रह्माण्डं तिष्ठत्येव चराचरम् ॥ ६२॥

यस्य वाणी व्यलीका हि तत्पुण्यं गलितं क्षणात् ।
तथापि शृणु वै सत्यां प्रतिज्ञां मम भिल्लक ॥ ६३॥

सन्ध्यायां मैथुने घस्रे शिवरात्र्यां च भोजने ।
कूटसाक्ष्ये न्यासहारे सन्ध्याहीने द्विजे तथा ॥ ६४॥

शिवहीनं मुखं यस्य नोपकर्ता क्षमोऽपि सन् ।
पर्वणि श्रीफलस्यैव त्रोटनेऽभक्ष्यभक्षणे ॥ ६५॥

असम्पूज्य शिवं भस्मरहितश्चान्नभुक् च यः ।
एतेषां पातकं मे स्यान्नागच्छेयं पुनर्यदि ॥ ६६॥

सूत उवाच ।
इति श्रुत्वा वचस्तस्य गच्छ शीघ्रं समाव्रज ।

स व्याधेनैवमुक्तस्तु जलं पीत्वा गतो मृगः ॥ ६७॥

ते सर्वे मिलितास्तत्र स्वाश्रमे कृतसुप्रणाः ।
वृत्तान्तं चैव तं सर्वं श्रुत्वा सम्यक् परस्परम् ॥ ६८॥

गन्तव्यं निश्चयेनेति सत्यपाशेन यन्त्रिताः ।
आश्वास्य बालकांस्तत्र गन्तुमुत्कण्ठितास्तदा ॥ ६९॥

मृगी ज्येष्ठा च या तत्र स्वामिनं वाक्यमब्रवीत् ।
त्वां विना बालका ह्यत्र कथं स्थास्यन्ति वै मृग ॥ ७०॥

प्रथमं तु मया तत्र प्रतिज्ञा च कृता प्रभो ।
तस्मान्मया च गन्तव्यं भवद्भ्यां स्थीयतामिह ॥ ७१॥

इति तद्वचनं श्रुत्वा कनिष्ठा वाक्यमब्रवीत् ।
अहं त्वत्सेविका चाद्य गच्छामि स्थीयतां त्वया ॥ ७२॥

तच्छ्रुत्वा च मृगः प्राह गम्यते तत्र वै मया ।
भवत्यौ तिष्ठतां चात्र मातृतः शिशुरक्षणम् ॥ ७३॥

तत्स्वामिवचनं श्रुत्वा मेनाते तन्न धर्मतः ।
प्रोचुः प्रीत्या स्वभर्तारं वैधव्ये जीवितं च धिक् ॥ ७४॥

बालानाश्वास्य तांस्तत्र समर्प्य सहवासिनः ।
गतास्ते सर्व एवाशु यत्रास्ते व्याधसत्तमः ॥ ७५॥

ते बाला अपि सर्वे वै विलोक्यानुसमागताः ।
एतेषां या गतिः स्याद्वै ह्यस्माकं सा भवत्विति ॥ ७६॥

तान् दृष्ट्वा हर्षितो व्याधो बाणं धनुषि सन्दधे ।
पुनश्च जलपत्राणि पतितानि शिवोपरि ॥ ७७॥

तेन जाता चतुर्थस्य पूजा यामस्य वै शुभा ।
तस्य पापं तदा सर्वं भस्मसादभवत् क्षणात् ॥ ७८॥

मृगी मृगी मृगश्चोचुः शीघ्रं वै व्याधसत्तम ।
अस्माकं सार्थकं देहं कुरु त्वं हि कृपां कुरु ॥ ७९॥

इति तेषां वचः श्रुत्वा व्याधो विस्मयमागतः ।
शिवपूजाप्रभावेण ज्ञानं दुर्लभमाप्तवान् ॥ ८०॥

एते धन्या मृगाश्चैव ज्ञानहीनाः सुसम्मताः ।
स्वीयेनैव शरीरेण परोपकरणे रताः ॥ ८१॥

मानुष्यं जन्म सम्प्राप्य साधितं किं मयाधुना ।
परकायं च सम्पीड्य शरीरं पोषितं मया ॥ ८२॥

कुटुम्बं पोषितं नित्यं कृत्वा पापान्यनेकशः ।
एवं पापानि हा कृत्वा का गतिर्मे भविष्यति ॥ ८३॥

कां वा गतिं गमिष्यामि पातकं जन्मतः कृतम् ।
इदानीं चिन्तयाम्येवं धिग् धिक् च जीवनं मम ॥ ८४॥

इति ज्ञानं समापन्नो बाणं संवारयंस्तदा ।
गम्यतां च मृगश्रेष्ठा धन्याः स्थ इति चाब्रवीत् ॥ ८५॥

इत्युक्ते च तदा तेन प्रसन्नः शङ्करस्तदा ।
पूजितं च स्वरूपं हि दर्शयामास सम्मतम् ॥ ८६॥

संस्पृश्य कृपया शम्भुस्तं व्याधं प्रीतितोऽब्रवीत् ।
वरं ब्रूहि प्रसन्नोऽस्मि व्रतेनानेन भिल्लक ॥ ८७॥

व्याधोऽपि शिवरूपं च दृष्ट्वा मुक्तोऽभवत्क्षणात् ।
पपात शिवपादाग्रे सर्वं प्राप्तमिति ब्रुवन् ॥ ८८॥

शिवोऽपि सुप्रसन्नात्मा नाम दत्वा गुहेति च ।
विलोक्य तं कृपादृष्ट्या तस्मै दिव्यान्वरानदात् ॥ ८९॥

शिव उवाच ।
शृणु व्याधाद्य भोगांस्त्वं भुङ्क्ष्व दिव्यान्यथेप्सितान् ।
राजधानीं समाश्रित्य शृङ्गवेरपुरे पराम् ॥ ९०॥

अनपाया वंशवृद्धिः श्लाघनीयः सुरैरपि ।
गृहे रामस्तव व्याध समायास्यति निश्चितम् ॥ ९१॥

करिष्यति त्वया मैत्रीं मद्भक्तस्नेहकारकः ।
मत्सेवासक्तचेतास्त्वं मुक्तिं यास्यसि दुर्लभाम् ॥ ९२॥

सूत उवाच ।
एतस्मिन्नन्तरे ते तु कृत्वा शङ्करदर्शनम् ।
सर्वे प्रणम्य सन्मुक्तिं मृगयोनेः प्रपेदिरे ॥ ९३॥

विमानं च समारुह्य दिव्यदेहा गतास्तदा ।
शिवदर्शनमात्रेण शापान्मुक्ता दिवं गताः ॥ ९४॥

व्याधेश्वरः शिवो जातः पर्वते ह्यर्बुदाचले ।
दर्शनात्पूजनात्सद्यो भुक्तिमुक्तिप्रदायकः ॥ ९५॥

व्याधोऽपि तद्दिनान्नूनं भोगान्स भूसुरसत्तमाः ।
भुक्त्वा रामकृपां प्राप्य शिवसायुज्यमाप्तवान् ॥ ९६॥

अज्ञानात्स व्रतं चैतत् कृत्वा सायुज्यमाप्तवान् ।
किं पुनर्भक्तिसम्पन्ना यान्ति तन्मयतां शुभाम् ॥ ९७॥

विचार्य सर्वशास्त्राणि धर्मांश्चैवाप्यनेकशः ।
शिवरात्रिव्रतमिदं सर्वोत्कृष्टं प्रकीर्तितम् ॥ ९८॥

व्रतानि विविधान्यत्र तीर्थानि विविधानि च ।
दानानि च विचित्राणि मखाश्च विविधास्तथा ॥ ९९॥

तपांसि विविधान्येव जपाश्चैवाप्यनेकशः ।
नैतेन समतां यान्ति शिवरात्रिव्रतेन च ॥ १००॥

तस्माच्छुभतरं चैतत्कर्तव्यं हितमीप्सुभिः ।
शिवरात्रिव्रतं दिव्यं भुक्तिमुक्तिप्रदं सदा ॥ १०१॥

एतत्सर्वं समाख्यातं शिवरात्रिव्रतं शुभम् ।
व्रतराजेति विख्यातं किमन्यच्छ्रोतुमिच्छसि ॥ १०२॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां व्याधेश्वरमाहात्म्ये शिवरात्रिव्रतमाहात्म्यवर्णनं नाम चत्वारिंशोऽध्यायः ॥ ४.४०॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.४१. एकचत्वारिंशोऽध्यायः । मुक्तिनिरूपणम् ।

ऋषय ऊचुः ।
मुक्तिर्नाम त्वया प्रोक्ता तस्यां किं नु भवेदिह ।

अवस्था कीदृशी तत्र भवेदिति वदस्व नः ॥ १॥

सूत उवाच ।
मुक्तिश्चतुर्विधा प्रोक्ता श्रूयतां कथयामि वः ।
संसारक्लेशसंहर्त्री परमानन्ददायिनी ॥ २॥

सारूप्या चैव सालोक्या सान्निध्या च तथा परा ।
सायुज्या च चतुर्थी सा व्रतेनानेन या भवेत् ॥ ३॥

मुक्तेर्दाता मुनिश्रेष्ठाः केवलं शिव उच्यते ।
ब्रह्माद्या न हि ते ज्ञेयाः केवलं च त्रिवर्गदाः ॥ ४॥

ब्रह्माद्यास्त्रिगुणाधीशाः शिवस्त्रिगुणतः परः ।
निर्विकारी परब्रह्म तुर्यः प्रकृतितः परः ॥ ५॥

ज्ञानरूपोऽव्ययः साक्षी ज्ञानगम्योऽद्वयः स्वयम् ।
कैवल्यमुक्तिदः सोऽत्र त्रिवर्गस्य प्रदोऽपि हि ॥ ६॥

कैवल्याख्या पञ्चमी च दुर्लभा सर्वथा नृणाम् ।
तल्लक्षणं प्रवक्ष्यामि श्रूयतामृषिसत्तमाः ॥ ७॥

उत्पद्यते यतः सर्वं येनैतत्पाल्यते जगत् ।
यस्मिंश्च लीयते तद्धि येन सर्वमिदं ततम् ॥ ८॥

तदेव शिवरूपं हि पठ्यते च मुनीश्वराः ।
सकलं निष्कलं चेति द्विविधं वेदवर्णितम् ॥ ९॥

विष्णुना तच्च न ज्ञातं ब्रह्मणा न च तत्तथा ।
कुमाराद्यैश्च न ज्ञातं न ज्ञातं नारदेन वै ॥ १०॥

शुकेन व्यासपुत्रेण व्यासेन च मुनीश्वरैः ।
तत्पूर्वैश्चाखिलैर्देवैर्वेदैः शास्त्रैस्तथा न हि ॥ ११॥

सत्यं ज्ञानमनन्तं च सच्चिदानन्दसंज्ञितम् ।
निर्गुणो निरुपाधिश्चाव्ययः शुद्धो निरञ्जनः ॥ १२॥

न रक्तो नैव पीतश्च न श्वेतो नील एव च ।
न ह्रस्वो न च दीर्घश्च न स्थूलः सूक्ष्म एव च ॥ १३॥

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
तदेव परमं प्रोक्तं ब्रह्मैव शिवसंज्ञकम् ॥ १४॥

आकाशं व्यापकं यद्वत्तथैव व्यापकं त्विदम् ।
मायातीतं परात्मानं द्वन्द्वातीतं विमत्सरम् ॥ १५॥

तत्प्राप्तिश्च भवेदत्र शिवज्ञानोदयाद् ध्रुवम् ।
भजनाद्वा शिवस्यैव सूक्ष्ममत्या सतां द्विजाः ॥ १६॥

ज्ञानं तु दुष्करं लोके भजनं सुकरं मतम् ।
तस्माच्छिवं च भजत मुक्त्यर्थमपि सत्तमाः ॥ १७॥

शिवो हि भजनाधीनो ज्ञानात्मा मोक्षदः परः ।
भक्त्यैव बहवः सिद्धा मुक्तिं प्रापुः परां मुदा ॥ १८॥

ज्ञानमाता शम्भुभक्तिर्मुक्तिभुक्तिप्रदा सदा ।
सुलभा यत्प्रसादाद्धि सत्प्रेमाङ्कुरलक्षणा ॥ १९॥

सा भक्तिर्द्विविधा ज्ञेया सगुणा निर्गुणा द्विजाः ।
वैधी स्वाभाविकी या या वरा सा सा स्मृता परा ॥ २०॥

नैष्ठिक्यनैष्ठिकीभेदाद् द्विविधैव हि कीर्तिता ।
षड्विधा नैष्ठिकी ज्ञेया द्वितीयैकविधा स्मृता ॥ २१॥

विहिताविहिताभेदात्तामनेकां विदुर्बुधाः ।
तयोर्बहुविधत्वाच्च विस्तारो न हि वर्ण्यते ॥ २२॥

ते नवाङ्गे उभे ज्ञेये श्रवणादिकभेदतः ।
सुदुष्करे तत्प्रसादं विना च सुकरे ततः ॥ २३॥

भक्तिज्ञाने न भिन्ने हि शम्भुना वर्णिते द्विजाः ।
तस्माद्भेदो न कर्तव्यः तत्कर्तुः सर्वदा सुखम् ॥ २४॥

विज्ञानं न भवत्येव द्विजा भक्तिविरोधिनः ।
शम्भुभक्तिकरस्यैव भवेज्ज्ञानोदयो द्रुतम् ॥ २५॥

तस्माद्भक्तिर्महेशस्य साधनीया मुनीश्वराः ।
तयैव निखिलं सिद्धं भविष्यति न संशयः ॥ २६॥

इति पृष्टं भवद्भिर्यत्तदेव कथितं मया ।
तच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ २७॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां मुक्तिनिरूपणं नामैकचत्वारिंशोऽध्यायः
॥ ४.४१ ॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.४२. द्विचत्वारिंशोऽध्यायः । सगुणनिर्गुणभेदवर्णनम् ।

ऋषय ऊचुः ।
शिवः को वा हरिः को वा रुद्रः को वा विधिश्च कः ।
एतेषु निर्गुणः को वा ह्येतं नश्छिन्धि संशयम् ॥ १॥

सूत उवाच ।
यच्चादौ हि समुत्पन्नं निर्गुणात्परमात्मनः ।
तदेव शिवसंज्ञं हि वेदवेदान्तिनो विदुः ॥ २॥

तस्मात्प्रकृतिरुत्पन्ना पुरुषेण समन्विता ।
ताभ्यां तपः कृतं तत्र मूलस्थे च जले सुधीः ॥ ३॥

पञ्चक्रोशीति विख्याता काशी सर्वातिवल्लभा ।
व्याप्तं च सकलं ह्येतत्तज्जलं विश्वतो गतम् ॥ ४॥

सम्भाव्य मायया युक्तस्तत्र सुप्तो हरिः स वै ।
नारायणेति विख्यातो माया नारायणी मता ॥ ५॥

तन्नाभिकमले यो वै जातः स च पितामहः ।
तेनैव तपसा दृष्टः स वै विष्णुरुदाहृतः ॥ ६॥

उभयोर्वादशमने यद्रूपं स दर्शितं बुधाः ।
महादेवेति विख्यातं निर्गुणेन शिवेन हि ॥ ७॥

तेन प्रोक्तमहं शम्भुर्भविष्यामि कभालतः ।
रुद्रो नाम स विख्यातो लोकानुग्रहकारकः ॥ ८॥

ध्यानार्थं चैव सर्वेषामरूपो रूपवानभूत् ।
स एव च शिवः साक्षाद्भक्तवात्सल्यकारकः ॥ ९॥

शिवे त्रिगुणसम्भिन्ने रुद्रे तु गुणधामनि ।
वस्तुतो न हि भेदोऽस्ति स्वर्णे तद्भूषणे यथा ॥ १०॥

समानरूपकर्माणौ समभक्तगतिप्रदौ ।
समानाखिलसंसेव्यौ नानालीलाविहारिणौ ॥ ११॥

सर्वथा शिवरूपो हि रुद्रो रौद्रपराक्रमः ।
उत्पन्नो भक्तकार्यार्थं हरिब्रह्मसहायकृत् ॥ १२॥

अन्ये च ये समुत्पन्ना यथानुक्रमतो लयम् ।
यान्ति नैव तथा रुद्रः शिवे रुद्रो विलीयते ॥ ४३॥

ते वै रुद्रं मिलित्वा तु प्रयान्ति प्रकृता इमे ।
इमान् रुद्रो मिलित्वा तु न याति श्रुतिशासनम् ॥ १४॥

सर्वे रुद्रं भजन्त्येव रुद्रः कञ्चिद्भजेन्न हि ।
स्वात्मना भक्तवात्सल्याद्भजत्येव कदाचन ॥ १५॥

अन्यं भजन्ति ये नित्यं तस्मिंस्ते लीनतां गताः ।
तेनैव रुद्रं ते प्राप्ताः कालेन महता बुधाः ॥ १६॥

रुद्रभक्तास्तु ये केचित्तत्क्षणं शिवतां गताः ।
अन्यापेक्षा न वै तेषां श्रुतिरेषा सनातनी ॥ १७॥

अज्ञानं विविधं ह्येतद्विज्ञानं विविधं न हि ।
तत्प्रकारमहं वक्ष्ये शृणुतादरतो द्विजाः ॥ १८॥

ब्रह्मादितृणपर्यन्तं यत्किञ्चिद् दृश्यते त्विह ।
तत्सर्वं शिव एवास्ति मिथ्या नानात्वकल्पना ॥ १९॥

सृष्टेः पूर्वं शिवः प्रोक्तः सृष्टेर्मध्ये शिवस्तथा ।
सृष्टेरन्ते शिवः प्रोक्तः सर्वशून्ये सदाशिवः ॥ २०॥

तस्माच्चतुर्गुणः प्रोक्तः शिव एव मुनीश्वराः ।
स एव सगुणो ज्ञेयः शक्तिमत्त्वाद् द्विधापि सः ॥ २१॥

येनैव विष्णवे दत्ताः सर्वे वेदाः सनातनाः ।
वर्णा मात्रा ह्यनेकाश्च ध्यानं स्वस्य च पूजनम् ॥ २२॥

ईशानः सर्वविद्यानां श्रुतिरेषा सनातनी ।
वेदकर्ता वेदपतिस्तस्माच्छम्भुरुदाहृतः ॥ २३॥

स एव शङ्करः साक्षात्सर्वानुग्रहकारकः ।
कर्ता भर्ता च हर्ता च साक्षी निर्गुण एव सः ॥ २४॥

अन्येषां कालमानं च कालस्य कलना न हि ।
महाकालः स्वयं साक्षान्महाकालीसमाश्रितः ॥ २५॥

तथा च ब्राह्मणा रुद्रं तथा कालीं प्रचक्षते ।
सर्वं ताभ्यां ततः प्राप्तमिच्छया सत्यलीलया ॥ २६॥

न तस्योत्पादकः कश्चिद्भर्ता हर्ता न तस्य हि ।
स्वयं सर्वस्य हेतुस्ते कार्यभूताच्युतादयः ॥ २७॥

स्वयं च कारणं कार्यं स्वस्य नैव कदाचन ।
एकोऽप्यनेकतां यातोऽप्यनेकोऽप्येकतां व्रजेत् ॥ २८॥

एकं बीजं बहिर्भूत्वा पुनर्बीजं च जायते ।
बहुत्वे च स्वयं सर्वं शिवरूपी महेश्वरः ॥ २९॥

एतत्परं शिवज्ञानं तत्त्वतस्तदुदाहृतम् ।
जानाति ज्ञानवानेव नान्यः कश्चिदृषीश्वराः ॥ ३०॥

मुनय ऊचुः ।
ज्ञानं सलक्षणं ब्रूहि यज्ज्ञात्वा शिवतां व्रजेत् ।
कथं शिवश्च तत्सर्वं सर्वं वा शिव एव च ॥ ३१॥

व्यास उवाच ।
एतदाकर्ण्य वचनं सूतः पौराणिकोत्तमः ।
स्मृत्वा शिवपदाम्भोजं मुनींस्तानब्रवीद्वचः ॥ ३२॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां सगुणनिर्गुणभेदवर्णनं नाम द्विचत्वारिंशोऽध्यायः ॥ ४.४२॥

॥ श्रीगणेशाय नमः ॥
॥ श्रीगौरीशङ्कराभ्यां नमः ॥
॥ श्रीशिवमहापुराणम् ॥
चतुर्थी कोटिरुद्रसंहिता

## ४.४३. त्रिचत्वारिंशोऽध्यायः । ज्ञाननिरूपणम् ।

सूत उवाच ।
श्रूयतामृषयः सर्वे शिवज्ञानं यथा श्रुतम् ।
कथयामि महागुह्यं परमुक्तिस्वरूपकम् ॥ १॥

कनारदकुमाराणां व्यासस्य कपिलस्य च ।
एतेषां च समाजे तैर्निश्चित्य समुदाहृतम् ॥ २॥

इति ज्ञानं सदा ज्ञेयं सर्वं शिवमयं जगत् ।
शिवः सर्वमयो ज्ञेयः सर्वज्ञेन विपश्चिता ॥ ३॥

आब्रह्मतृणपर्यन्तं यत्किञ्चिद् दृश्यते जगत् ।
तत्सर्वं शिव एवास्ति स देवः शिव उच्यते ॥ ४॥

यदेच्छा तस्य जायेत तदा च क्रियते त्विदम् ।
सर्वं स एव जानाति तं न जानाति कश्चन ॥ ५॥

रचयित्वा स्वयं तच्च प्रविश्य दूरतः स्थितः ।
न तत्र च प्रविष्टोऽसौ निर्लिप्तश्चित्स्वरूपवान् ॥ ६॥

यथा च ज्योतिषश्चैव जलादौ प्रतिबिम्बता ।
वस्तुतो न प्रवेशो वै तथैव च शिवः स्वयम् ॥ ७॥

वस्तुतस्तु स्वयं सर्वं क्रमो हि भासते शुभः ।
अज्ञानं च मतेर्भेदो नास्त्यन्यच्च द्वयं पुनः ॥ ८॥

दर्शनेषु च सर्वेषु मतिभेदः प्रदर्श्यते ।
परं वेदान्तिनो नित्यमद्वैतं प्रतिचक्षते ॥ ९॥

स्वस्याप्यंशस्य जीवांऽशो ह्यविद्यामोहितोऽवशः ।
अन्योऽहमिति जानाति तया मुक्तो भवेच्छिवः ॥ १०॥

सर्वं व्याप्य शिवः साक्षाद् व्यापकः सर्वजन्तुषु ।
चेतनाचेतनेशोऽपि सर्वत्र शङ्करः स्वयम् ॥ ११॥

उपायं यः करोत्यस्य दर्शनार्थं विचक्षणः ।
वेदान्तमार्गमाश्रित्य तद्दर्शनफलं लभेत् ॥ १२॥

यथाग्निर्व्यापकश्चैव काष्ठे काष्ठे च तिष्ठति ।
यो वै मन्थति तत्काष्ठं स वै पश्यत्यसंशयम् ॥ १३॥

भक्त्यादिसाधनानीह यः करोति विचक्षणः ।
स वै पश्यत्यवश्यं हि तं शिवं नात्र संशयः ॥ १४॥

शिवःशिवःशिवश्चैव नान्यदस्तीति किञ्चन ।
भ्रान्त्या नानास्वरूपो हि भासते शङ्करः सदा ॥ १५॥

यथा समुद्रो मृच्चैव सुवर्णमथवा पुनः ।
उपाधितो हि नानात्वं लभते शङ्करस्तथा ॥ १६॥

कार्यकारणयोर्भेदो वस्तुतो न प्रवर्तते ।
केवलं भ्रान्तिबुद्ध्यैव तदभावे स नश्यति ॥ १७॥

यदा बीजात्प्ररोहश्च नानात्वं हि प्रकाशयेत् ।
अन्ते च बीजमेव स्यात्तत्प्ररोहश्च नश्यति ॥ १८॥

ज्ञानी च बीजमेव स्यात्प्ररोहो विकृतीर्मता ।
तन्निवृत्तौ पुनर्ज्ञानी नात्र कार्या विचारणा ॥ १९॥

सर्वं शिवः शिवः सर्वो नास्ति भेदश्च कश्चन ।
कथं च विविधं पश्यत्येकत्वं च कथं पुनः ॥ २०॥

यथैकं चैव सूर्याख्यं ज्योतिर्नानाविधं जनैः ।
जलादौ च विशेषेण दृश्यते तत्तथैव सः ॥ २१॥

सर्वत्र व्यापकश्चैव स्पर्शत्वं न विबध्यते ।
तथैव व्यापको देवो बध्यते न क्वचित्स वै ॥ २२॥

साहङ्कारस्तथा जीवस्तन्मुक्तः शङ्करः स्वयम् ।
जीवस्तुच्छः कर्मभोगी निर्लिप्तः शङ्करो महान् ॥ २३॥

यथैकं च सुवर्णादि मिलितं रजतादिना ।
अल्पमूल्यं प्रजायेत तथा जीवोऽप्यहंयुतः ॥ २४॥

यथैव हि सुवर्णादि क्षारादेः शोधितं शुभम् ।
पूर्ववन्मूल्यतां याति तथा जीवोऽपि संस्कृतेः ॥ २५॥

प्रथमं सद्गुरुं प्राप्य भक्तिभावसमन्वितः ।
शिवबुद्ध्या करोत्युच्चैः पूजनं स्मरणादिकम् ॥ २६॥

तद्बुध्या देहतो याति सर्वपापादिको मलः ।

तदाज्ञानं च नश्येत ज्ञानवाञ्जायते यदा ॥ २७॥

तदाहङ्कारनिर्मुक्तो जीवो निर्मलबुद्धिमान् ।
शङ्करस्य प्रसादेन याति शङ्करतां पुनः ॥ २८॥

यथादर्शस्वरूपे च स्वीयरूपं प्रदृश्यते ।
तथा सर्वत्रगं शम्भुं पश्यतीति सुनिश्चितम् ॥ २९॥

जीवन्मुक्तः स एवासौ देहः शिर्णः शिवे मिलेत् ।
प्रारब्धवशगो देहस्तद्भिन्नो ज्ञानवान् मतः ॥ ३०॥

शुभं लब्ध्वा न हृष्येत कुप्येल्लब्ध्वाशुभं न हि ।
द्वन्द्वेषु समता यस्य ज्ञानवानुच्यते हि सः ॥ ३१॥

आत्मयोगेन तत्त्वानामथवा च विवेकतः ।
यथा शरीरतो यायाच्छरीरं मुक्तिमिच्छता ॥ ३२॥

सदाशिवो विलीयेत मुक्तो विरहमेव च ।
ज्ञानमूलं तथाध्यात्म्यं तस्य भक्तिः शिवस्य च ॥ ३३॥

भक्तेश्च प्रेम सम्प्रोक्तं प्रेम्णश्च श्रवणं तथा ।
श्रवणाच्चापि सत्सङ्गः सत्सङ्गाच्च गुरुर्बुधः ॥ ३४॥

सम्पन्ने च तथा ज्ञाने मुक्तो भवति निश्चितम् ।
इति चेज्ज्ञानवान्यो वै शम्भुमेव सदा भजेत् ॥ ३५॥

अनन्यया च भक्त्या वै युक्तः शम्भुं भजेत्पुनः ।
अन्ते च मुक्तिमायाति नात्र कार्या विचारणा ॥ ३६॥

अतोऽधिको न देवोऽस्ति मुक्तिप्राप्त्यै च शङ्करात् ।
शरणं प्राप्य यं चैव संसाराद्विनिवर्तते ॥ ३७॥

इति मे विविधं वाक्यमृषीणां च समागतैः ।
निश्चित्य कथितं विप्रा धिया धार्यं प्रयत्नतः ॥ ३८॥

प्रथमं विष्णवे दत्तं शम्भुना लिङ्गसम्मुखे ।
विष्णुना ब्रह्मणे दत्तं ब्रह्मणा सनकादिषु ॥ ३९॥

नारदाय ततः प्रोक्तं तज्ज्ञानं सनकादिभिः ।
व्यासाय नारदेनोक्तं तेन मह्यं कृपालुना ॥ ४०॥

मया चैव भवद्भ्यश्च भवद्भिर्लोकहेतवे ।
स्थापनीयं प्रयत्नेन शिवप्राप्तिकरं च तत् ॥ ४१॥

इति वश्च समाख्यातं यत्पृष्टोऽहं मुनीश्वराः ।
गोपनीयं प्रयत्नेन किमन्यच्छ्रोतुमिच्छथ ॥ ४२॥

व्यास उवाच ।
एतच्छ्रुत्वा तु ऋषय आनन्दं परमं गताः ।
हर्षगद्गदया वाचा नत्वा ते तुष्टुवुर्मुहुः ॥ ४३॥

ऋषय ऊचुः ।
व्यासशिष्य नमस्तेऽस्तु धन्यस्त्वं शैवसत्तम ।
श्रावितं नः परं वस्तु शैवं ज्ञानमनुत्तमम् ॥ ४४॥

अस्माकं चेतसो भ्रान्तिर्गता हि कृपया तव ।
सन्तुष्टाः शिवसज्ज्ञानं प्राप्य त्वत्तो विमुक्तिदम् ॥ ४५॥

सूत उवाच ।
नास्तिकाय न वक्तव्यमश्रद्धाय शठाय च ।
अभक्ताय महेशस्य न चाशुश्रुषवे द्विजाः ॥ ४६॥

इतिहासपुराणानि वेदाच्छास्त्राणि चासकृत् ।
विचार्य्योद्धृत्य तत्सारं मह्यं व्यासेन भाषितम् ॥ ४७॥

एतच्छ्रुत्वा ह्येकवारं भवेत्पापं हि भस्मसात् ।
अभक्तो भक्तिमाप्नोति भक्तस्य भक्तिवर्धनम् ॥ ४८॥

पुनः श्रुते च सद्भक्तिर्मुक्तिः स्याच्च श्रुतेः पुनः ।
तस्मात्पुनः पुनः श्राव्यं भुक्तिमुक्तिफलेप्सुभिः ॥ ४९॥

आवृत्तयः पञ्च कार्याः समुद्दिश्य फलं परम् ।
तत्प्राप्नोति न सन्देहो व्यासस्य वचनं त्विदम् ॥ ५०॥

न दुर्लभं हि तस्यैव येनेदं श्रुतमुत्तमम् ।
पञ्चकृत्वस्तदावृत्त्या लभ्यते शिवदर्शनम् ॥ ५१॥

पुरातनाश्च राजानो विप्रा वैश्याश्च सत्तमाः ।
इदं श्रुत्वा पञ्चकृत्वो धिया सिद्धिं परां गताः ॥ ५२॥

श्रोष्यत्यद्यापि यश्चेदं मानवो भक्तितत्परः ।

विज्ञानं शिवसंज्ञं वै भुक्तिं मुक्तिं लभेच्च सः ॥ ५३॥

व्यास उवाच ।
इति तद्वचनं श्रुत्वा परमानन्दमागताः ।
समानर्चुश्च ते सूतं नानावस्तुभिरादरात् ॥ ५४॥

नमस्कारैः स्तवैश्चैव स्वस्तिवाचनपूर्वकम् ।
आशीर्भिर्वर्धयामासुः सन्तुष्टाश्छिन्नसंशयाः ॥ ५५॥

परस्परं च सन्तुष्टाः सूतस्ते च सुबुद्धयः ।
शम्भुं देवं परं मत्वा नमन्ति स्म भजन्ति च ॥ ५६॥

एतच्छिवसुविज्ञानं शिवस्यातिप्रियं महत् ।
भुक्तिमुक्तिप्रदं दिव्यं शिवभक्तिविवर्धनम् ॥ ५७॥

इयं हि संहिता पुण्या कोटिरुद्राह्वया परा ।
चतुर्थी शिवपुराणस्य कथिता मे मुदावहा ॥ ५८॥

एतां यः शृणुयाद्भक्त्या श्रावयेद्वा समाहितः ।
स भुक्त्वेहाखिलान्भोगानन्ते परगतिं लभेत् ॥ ५९॥

इति श्रीशिवमहापुराणे चतुर्थ्यां कोटिरुद्रसंहितायां ज्ञाननिरूपणं नाम त्रिचत्वारिंशोऽध्यायः ॥ ४.४३॥

॥ समाप्तेयं शिवमहापुराणान्तर्गतकोटिरुद्रसंहिता चतुर्थी ॥

*Shri Shiva Mahapuranam 4 Kotirudra Samhita*

pdf was typeset on January 23, 2026

Please send corrections to *sanskrit@cheerful.com*